प.से.
१

ॐस्वस्तिश्रीगणेशायनमः ॐशृङ्गाग्रेणलयेधृता
णुतरणीयेनाम्लयस्याखिला धारायेनधरोद्धृतानैर
तिकूर्मोयस्समायावडः येनेयंजगतीजितागुरुवशो
योयोमहीभारहृयःशान्तोन्यजनाश्रपद्मोसभवतां
स्त्वाद्दिग्वतारोमुदे १ योनिश्शेषजनिर्ययतोखिलमि
दंतत्पयदःपाककृद्योयेनानितिसर्वमेतडदरेयस्या
स्तिनिर्यन्त्रणम् योशेषाण्डविभासकःफलदिदंय
स्यामृतास्फालनात्सवेदंयदनुग्रहात्सभवतांस्ताद
बमूर्तिर्मुदे २ भवन्नियमयन्त्रितंनिखिलमेतदा
द्योगुरुर्भवांस्त्रिजगतांत्वयाज्वलनपूर्वमूर्छास्पदं
कथंशवधृतालबुत्रिपथगोत्तमाङ्केकृतंमयेतिशिव
यास्मितंपितृवनाश्रितंसंश्रये ३ अवोधमात्मर्येत
मोवृतेत्वणैरनर्घसद्रत्नशलाकिकामुथा तिरस्कृ
ताप्यात्मगुणान्कदापिसौविवर्दरीत्यैवयथापनन्त
ा ४ पराशयान्तरत्तत्वंभूतिर्भूमौसतांखलु न
ज्ञान्तैरेस्मिन्कलयेदुर्लभामण्डलाशयाः ५ अतश्च

स्वयमेवात्रदिङ्मात्रंदर्शयाम्यहं स्वीकटाद्दन्याये
नवुध्यन्तांविबुधाइति ६ अथात्रसत्कथासारसुधा।
यांवीररत्नशेखरशिलाभिख्यायामनन्तरायसमाप्ति
प्रचयगमनार्थंस्वाभिप्रेतंमङ्गलवचोभाविसत्याद्या
वेत्तयोपनिवध्नन्सिद्धान्तसारतयोपश्लोकयतिक
विः जयतीत्यादिना सप्रकःस्वतन्त्रोजयतीतिवाक्या

ॐजयतिजगतिसैकःसर्वकारीस्वतन्त्रः प
रमविमलवोधःस्वप्रकाशस्वरूपः ॥१॥

न्वयः सैकइत्यत्रसोविलोपइत्यनेनपादपूरणोसं।
धिः सइतिसर्वप्रसिद्धः आदिसिद्धस्य एकोद्वितीयः
सर्वव्यापीस्वतन्त्रो॰न्यानपेक्षः जगतीतिगच्छति।
विकारमितिजगतस्थावरजङ्गमात्मकंनामरूपजा
तंसर्वंतत्रविषयेजयतिसर्वोत्कर्षेणवर्तते विदित
वेद्यानांतथात्वेनाभातीत्यर्थः तथाभूतेनात्रकाय

प.सं
२

वाङ्मनसांतदेकविषयतालक्षणप्रह्वतास्वमर्थो
दायातीतितंप्रत्यहंप्रणतएवास्मीतिवक्तव्यध्यते त
तश्चरतिर्देवादिविषयाव्यभिचारीतथाञ्जितः भावः
प्रोक्तइतिभावध्वनिरपिसहृदयहृदयाह्लादकोव्य
ज्यते मध्यस्थतयाचतडन्मुखीभावनादनुग्राह्यस
र्वजनिमतामेतादृगाशंसनमप्यर्थादायातीतिसर्वा
नुग्राह्येषतडत्कर्षः स्वप्रह्वताचप्राडुर्भवतादित्याशी
र्लक्षणमपिवस्त्वाशयमावर्जयतेवेतिबोध्यं तत
श्चसत्वामपीदृशंसद्गीतौ आशीर्नमस्क्रियावस्तु
निर्देशोवापितन्मुखमितित्रितयमथादेकेनचा
रितार्थ्यमिति तादृकप्रकारेणैकविनाश्रितोयत्र
त्रितयमप्येतद्युगपडल्लसति तत्रचमङ्गलवाहुल्ला
नार्थवाहुल्यमित्याशयः कारणानुगुणेपनकार्ये
ष्वपिदर्शनात् कोसौकीदृक्स्वरूपश्चेत्यतआह प
रमविमलबोधइति अस्तिचबोधवैमल्यंपरत्रापीति
परमविशेषणवैशिष्ट्यम् यद्बोधलेशमात्रयापिज

गत्यन्येपिकेचिद्विमलबोधाइतिगण्यन्ते सस्वयंपर
मविमलबोधइति चिदानन्दघनस्वरूपइत्यर्थः अतो
स्यतत्वमितिहेतुगर्भितंविशेषणमाह स्वप्रकाशस्वरू
पइति यदधीनंसर्वस्यप्रकाशनंसस्वयंस्वप्रकाशस्वरू
पइतिनात्रकाचित्कल्पनायच्छ्रुतिः तमेवभान्तमनु
भातिसर्वंतस्यभासासर्वमिदंविभातीति निवद्धंचसूत्र
कृता प्रकृतेस्तस्यचेति इतिविशेषणद्वयेनस्वरूप
लक्षणेसाक्षादुक्तेपितटस्थलक्षणमपिसर्वज्ञत्वलक्ष
णमनुषङ्गतःकथितंभवति साक्षाच्चाधुनातदेवसा
धयति सर्वकारीति सर्वकर्त्रेत्यर्थः इयंसर्वकर्तासर्व
ज्ञश्चस्वयंवेद्यैकमात्रस्वरूपोयएकःपरमेश्वरःस्वरससि
द्धःसएवजगतिजयतीतिसिद्धम् विधेयमङ्गलोपयोगा
दादिसिद्धमपिस्वप्रकाशंतत्वंतच्छब्दयोगेनविधेयप
देसमर्प्येदानीमनुवाद्यंयच्छब्दापास्ततच्छब्दापेक्षत
यायथानिराकाङ्क्षंभवेत्तथाप्रतिपादयितुंवाक्यान्तर
मारचयति अकलितेत्यादि यःपरमेश्वरोऽकलितमहि

प·मे
त्र

मा सर्वत्रहिदेशकालैर्मूर्तिक्रियावैचित्र्याभाससारै
र्यत्कल्पितैर्यदाभासितमितजडवस्तुपरिच्छेदकैस्तै
कथंतत्परिच्छेदकैःस्यात्तामितिसस्वयमपरिच्छिन्नम
हिमादेशतःकालतःस्वरूपतश्चापरिच्छिन्नत्वादनन्तः
सर्वदेशव्यापीसर्वकालव्यापीसर्वाकारव्यापीचेति त
थाचापरिच्छिन्नतामेवास्यवक्तुंतत्रभवान्सूरिः दिक्का

अकलितमहिमायःसर्वमिच्छाविलासं प्रभु
पशुजडरूपंस्वात्ममात्रेविधत्ते ॥ १० ॥

लाद्यनवच्छिन्नानन्तचिन्मात्रमूर्तयेइत्यादस्य पत
देवालम्बसर्वथासङ्कोचशङ्कोत्तेसनायमात्मादेवस
न्दृग्याविश्वात्मकत्वात्श्रीवसिष्ठश्चाह दिविभूमौतथा
काशेवहिरन्तश्चमेविभुः योवभात्यवभासात्मातस्मै
सर्वात्मनेनमइति यएतादृग्विभवःसर्वमिच्छाविला
संस्वात्ममात्रेविधत्ते कथंचविधत्तइत्याह प्रभुपशुज

डरूपमिति तत्राद्यैजडाजडभेदेनद्विधैवजगत्स्थितिः
यतोवेद्यवेदकोभयात्मकमेवसर्वम् तत्रवेद्यस्यनाना
त्वेपिजडमित्येववर्गाकारेणैकरूपमेव वेदकवर्गस्या
वान्तरवैचित्र्येपिभेदद्वयमेवमुख्यम् येनशुद्धाशुद्ध
प्रमातृवर्गमूर्तिःस्यात् तदाह प्रभुपशुजडरूपमिति
तत्रप्रभुवर्गःकारणादिदेवान्तः पशुवर्गश्चमनुष्या
दिनारकिपर्यन्तः एतेहिपशवइवप्रभूणांयोगक्षे
मादौपाल्याइतिपशवः पालकास्तुकारणाद्यापतद
पेक्षयास्वाधीनस्वयोगक्षेमाइतिप्रभवइतिस्थूलोयं
पन्थाः परमार्थतस्तु मायोत्तीर्णविदितात्मतत्त्वाः
प्रभवः मायाधोवर्तिनोनात्मज्ञाःपशवइति तथा
चानुत्तरनये स्वाङ्गरूपेषुभावेषुप्रमाताकथ्यतेपतिः
मायातोभेदिषुक्लेशकर्मादिकलुषःपशुरिति नचै
तत्सर्वमिच्छाविलासमित्यनेनास्यपराधीनतानिरा
कृता मायायाश्चैतत्प्रभवत्वंसूचितम् जडत्वेनास्या
अनादित्वासम्भवात् श्रुतिश्चसोकामयतवहुस्यामि

प॰सं
४

ति तथाचस्मृतिरपि चिदात्मैव हि देवोन्तःस्थितमि
च्छावशाद्वहिः योगीव निरुपादानमर्थजातं प्रकाश
येदिति तथा स्वात्ममात्रमित्यनेन अभिन्नोपादाननि
मित्तमिति मायापरमाणुवादादिनिरासः तथाचसो
कामयत बहुस्यां प्रजायेयेति तदैक्षत बहुस्यां प्रजा
येयेति च इच्छार्विकायाः स्वातन्त्र्यप्रवृत्तेर्निमित्त
मिति बहुस्यामिति च प्रयोगात्मविषयताहृद्भव
नाभिधानस्योपादानमिति च गम्यते अन्यत्र च सा
त्वादेवोभयमयत्तमस्योक्तम् तदात्मानं स्वयमकु
रुतेति आत्मानमिति कर्मणोपादानत्वम् स्वयमि
ति कर्तृत्वेन निमित्तत्वम् पार्थक्येनापि चोपादानत्वं
निमित्तत्वं च तस्य गम्यते सर्वाणि ह वा इमानि भूता
न्याकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यान्तीति
प्रभवप्रलययोरुपादानएव प्रसिद्धत्वादुपादानत्व
म् एकमेवाद्वितीयमित्यवधारणान्निमित्तत्वं च प
तच्च सर्वं कृतद्गलिभिः प्रकृतिश्चप्रतिज्ञादृष्टान्तानु

परोधादित्यधिकरणतो वेद्यमिति सिद्धं स्वात्ममात्रं
विधत्त इति १ इत्यमवाङ्मनसगोचरं श्रुत्यैकगम्यं
विद्वदनुभवैकसिद्धं परस्वरूपं जयतीत्यनुवाद्यतात
स्य परामर्शेनानुसंहितमपि साक्षादध्यारोढुमशक्तं
मत्वाथेदानीं तदध्यारोहसोपानकल्पं स्वेच्छावभासि
तं वाच्यवाचकोभयात्मकं तदपरस्वरूपं साक्षात्सम्मु
खीकरणेन यदशेषार्थावहं तन्निरूपयितुं तावदाद्य
स्वरूपं तदेकश्रवणतायै परामृशति यएषइति तं ह
रिमीडइत्यधिकारितां द्योतयितमन्त्रमपुरुषप्रयोगः
तथाचानौदासीन्येन तदुत्कर्षस्य प्रकृतालक्षणेन
मस्कारस्य पुरुषार्थपर्यवसायित्वं सिद्धं भवति त
था हि स्मरणमात्रेणापि पापानि हरतीति हरिः त
था च यस्य तन्मात्रेण स्वभावसिद्धं हरित्वं तस्य प्रयास
साध्येनादिना किं किं न सिद्ध्यतीत्यर्थापत्त्यैव दण्डा
पूपिकावत्सिद्धमिति प्रभुमिति विशेषणेन द्योतित
म् तथाच महाकविभिरुपनिबद्धम् केवलं स्मर

प॰सं
५

5

णैनैव पुनासि पुरुषं यदा अनेनहृन्नयः शेषानिवेदि
तफलास्त्वयीति तमितितच्छब्देनसर्वनाम्ना प्रक्रान्तेवा
चकेनयादृशोयमौ विवक्षितस्तं निरूपयितुं तत्स्वरूप
मनुवदति यएषइति एषइतिसमीपतरवर्त्तिचैतदोरू
पमित्यभियुक्तस्मरणात एषसर्वान्तर्यामी विभुर्वा

यएषपरमाद्भुतोविभुरशेषहृद्बोधकः परं
जगतिराजतेस्वतनुभिस्त्वरामादिभिः अनु
ग्रहलवास्पदंवयमपीहधूतामया भवाम
इहयस्यतंप्रभुमनन्तमीडेहरिम् २ ॥

पकः सर्वानुस्यूतः अतएवाशेषाणां स्वस्वकर्मविपा
वाक्सुरनरपशुपक्षियोनीनां प्रमातॄणां हृदोबुद्धेर्बो
धकः अधिष्ठातृतयासर्वप्रेरकः साक्षीत्यर्थः अयं
चसर्वप्रेरकत्वेपिस्वयमलेपात्परमाद्भुतइति एव
माश्चर्यस्वरूपइत्यर्थः अतः सर्वान्तर्यामित्वात्सकल

कलनाकलापभरितत्वादनुग्राह्यानुग्राहकबोध्यबो
धकव्याप्यव्यापकत्वादिभावेनजगतिविषयेपरंकेव
लंस्वात्मनैवराजते अयंभावः स्वयमशेषात्मकः स
न्कर्त्तृकर्मात्मनाविचित्रलीलाविरचनाचतुरः शोभते
इतिपरमात्ममूर्त्तिकथनम इत्थमशेषात्मकत्वेसत्य
पिसात्विकमूर्त्तेराधिक्यमाह स्वतनुभिस्त्वरामादिभि
रिति अयंभावः अशेषात्मकत्वेनव्याप्यव्यापकताया
त्मनास्थितोपिपरमशान्तमूर्त्तिस्वैर्लोकोपप्लावकदु
ष्प्रकृतिनिग्रहार्थंविमलतमसन्मार्गविशदीकरणा
र्थंचरामादितनुभिस्त्वराजते तथाचभगवान्व्यासः प
रित्राणायसाधूनांविनाशायचदुष्कृतां धर्मसंस्थाप
नार्थायसम्भवामियुगेयुगेइति नचैषाममीषांतन
वोद्यतनवद्विकारमात्रमपितुस्वरूपभूताएवेतिविशे
षकथनार्थंस्वेतिविशेषणम यतोजनीभृतंत्वस्यैव
जलकरकादिन्यायेनरामादयः ब्रह्मणोहिप्रतिष्ठा
हमितिभगवदुक्तेश्च प्रतिष्ठाप्रतिमेत्यर्थः अतएवच

यथापूर्वयुगेषुजगदुपप्लावकरदृष्टादृष्टदुष्टशान्त्यर्थं
तेतेवतारादृष्टास्तथाधुनापिदृष्टादृष्टोपप्लावकवाधा
न्तरदुष्टशान्त्यर्थमवतारा इतिमन्महे इत्याह अनुग्र
हेत्यादि वयमपीति श्रुतभगवन्माहात्म्यसाक्षात्कार
णोद्युक्तमतय इत्यर्थः इहलोकेपतन्नस्त्यादिनाश्रुता
मयानिष्पेषीकृतवाह्याभ्यन्तरकषायाः सन्तोयस्या
नुग्रहलेशास्पदंभवाम इति भवाम इतिवर्तमानसा
मीप्यलट् तथाचाज्ञानुग्रहस्याशीर्त्रकारित्वंद्योतय
ति २ इयंवाचात्मिकांतदपरमूर्तिंपरामृश्यवाचका
त्मिकांचतांश्लेषेणचवाच्यस्वरूपस्यतस्यक्रियांलीला
स्वरूपांतदुभयस्याप्यकथनपूर्वंतथैवपरामृषति
जीयाच्चेति तस्यभगवतोवाक श्रुतिरित्यर्थः महेशा
वचनोत्पन्नेविद्योमार्हद्दयसम्भवेइत्यायुक्तेः साचजीया
त्इतिपूर्ववत् आशीस्त्वेनचनिरन्तराभ्यासतत्क
मानुष्ठानादिनाःविच्छिन्नप्रवाहत्वेनतदेकसमानाभि
हामत्रकुशलभाजनत्वमाशास्ते तदनुरोधेनचतस्या

अध्याशीर्विभक्त्यानिर्देशोनवयइतिबोध्यम् तथा
तस्याक्रियाचसदाचारपालनलक्षणाइष्टदमनल
क्षणावाजीयादित्यादिपूर्ववत् प्रणतिभावः आशी
स्त्वेचेहोक्तसमानम् इदानींश्लेषः श्रुतिस्तावत् अ
मलभावगम्या शुद्धाशयस्यैवाथाभिप्राया तथा
सर्वार्थानांजगद्वर्तिनन्तानन्तपदार्थानांसन्दर्शने

जीयाच्चतस्यामलभावगम्यासर्वार्थसन्दर्शि
नवद्दकल्पा सदन्तरैकप्रवणार्थदाजीवा
क्रियायनीसाचक्रियास्तशीला ३ ॥

वद्दकल्पावद्योयमा नहिवाचकशक्तिंविनाकस्य
चिद्वाच्यस्यावगमः समयानुप्राणादिसर्वार्थस्थि
तिः नचासङ्केतितोर्थः कांचिदर्थक्रियांविधातुम
लम् यथाहहरिः नसोस्तिप्रत्ययोलोकेयः शब्दानु
गमादृते अनुविद्धमिवज्ञानंसर्वंशब्देनगम्यतेइति

तथा चास्याः सर्वार्थसन्दर्शनबहुकल्पत्वे सति यो
र्ग्यंशित्वादीनां व्यापारः स तदङ्गत्वादेव तेषां तदनुवा
दकतामात्रपरमार्थ इति नापूर्वसाधक इति मन्तव्य
म् अनेनैवाशयेन सिद्धे शब्दार्थसम्बन्ध इति भाष्य
कारो विहितवान् यत्र शब्दानुशासनस्यापि चापि
चानुशासनत्वमेव तत्र का कथैवान्येषामिति सुव्य
क्तम् तथा सदसत्त्वैकप्रवणा इति सत्त्वेन तद्द
र्शनस्य सर्वव्यापकं च ब्रह्मतत्त्वैकप्रवणा सत्त्वलग्ना
दृशादिकारणादपि नदीस्रोतसामिवार्णवेन तत्स्र
तिप्रवृत्तत्वात्तत्कर्मणां तत्रैवैकस्मिंस्तात्पर्यतो वृत्ते
स्तत्र सत्त्वतात्पर्यवती तथार्थदात्री चतुर्वर्गप्राप
यित्री सकामाकामभेदेन हि याजकानां स्थितिः सा
न्यैवार्थभागिति तथा शोधनी अर्थानां मलिनाश
यानाम् तथा सुशीला सञ्चारिणी अविद्यात्मक
मायादिदूरीकरणहेतुत्वात् न हि पुण्यं विनान्यतः
सुशीला वा निर्वृत्ते इति कारणे कार्योपचारः सु

शीलदात्री वा दियमपि सुशीलेति तस्य क्रियापि अ
मलभावगम्यादेव भावशोध्या दैवी सम्यग्हिमोक्ता
येति स्मृतेः तथा सर्वेषामर्थसन्दर्शनेऽर्थानां सम्य
क्यापणो बहुकल्पा न मे पार्थास्ति कर्तव्यं त्रिषु लो
केषु किञ्चन नानवाप्तमवाप्तव्यं वर्त एव च कर्म
णीति स्मृतेः तथा सदसत्त्वैकप्रवणा तन्मयी तथा
र्थदात्री अर्थः परमार्थस्तद्दात्री सत्ति च पदेषु पदै
कदेशा भीमो भीमसेन इतिवत् तथा शोधनी शो
धनादयित्री तथा सुशीला सत्स्वभावा इत्युभय
श्लेषेण श्रुतेस्तत्क्रियाश्रयत्वं तत्क्रियायाश्च श्रुत्येक
विषयत्वमक्कं भवतीति ३ इत्थं तत्त्वरूपरूपे
ण स्वरूपतो लक्षणतश्च निरूपितमपि चाथ निरा का
ङ्क्षा सिद्धये तस्यैव सर्वात्मना विशदीकरणार्थं
करामलकवद्यथा तत्त्वं भाति तथा विभूतिस्वरूपे
णापि निरूपयति यत्तेजः इति सर्वार्थसन्द्योतक
मिति सर्वेषामर्थानां सम्यग्द्योतकं सत्ताप्रदर्शी

प.सं
८
8

पादितेजोपिचार्थप्रकाशकंतद्यावच्छेदार्थंसम्यग्
हणम् तेषांतेजोमात्ररूपत्वादस्यतमेवभान्तीतिप्र
काशान्तर्भावेनस्फुरणात् प्रकाशकत्वात्परेषांस्व
स्यचस्वयंप्रकाशत्वात्स्वप्रकाशत्वमस्यसिद्धम् ए
तदेवहिस्वप्रकाशत्वंयत्स्वयमात्मनास्फुरणम्

यत्तेजोविमलंविराजतितरांसर्वार्थसन्दो
तकंमात्रायस्यचसात्रिलोकभवनालङ्कार
भूतोरविः यत्किञ्चिज्जगतीतलेस्तिनि
यतंज्योतिश्चयत्तेजसोलेशास्तस्यकथंस्व
भावविमलंमाहात्म्यमुक्तावृयः ४ ॥

पिप्रकाशयतीति सैषादिविभूतिर्यथापरानप्य
पकरोतीति अतएवाह विमलमिति यदिदंकि
ञ्चिज्जगतीतलेप्रकाशकत्वेनामप्रसिद्धं तत्के
वलस्वाच्छालक्षणंनिर्विमर्शत्वादस्यमात्राणाले

शापकदेशश्छेदोभागइत्याह मात्रेति नन्वन्यदपिच
ज्वलनप्रभृतिवाह्यंचन्द्रादिवान्तरमपितेजःसमस्त्ये
व कथंतस्यैवसर्वोत्कृष्टत्वमित्यतआह यत्किञ्चि
दिति नियतमिति नियतार्थग्राहिसमीपदेशस्थमे
वहिवह्निःप्रकाशयतिनदूरादिदेशस्थम् तथाह
पमेवचक्षुःप्रकाशयतिनरसम् एवंरसमेवजिह्वा
स्वादयतिनरूपमित्यादिनानियतंतत् इदंतुदूरस
मीपरूपरसादिग्राहकमतोऽनियतम् तथापिक
थंतत्स्वसत्तयाभासकमुक्तमित्यत्राह यत्तेजसोले
शाइति तथात्वमपितस्यैवमाहात्म्यमित्यर्थः तेन
स्वपरोपाधिकमेवंतत्रतत्रतत्स्वाभाविकमित्यर्थः
एतद्विशदीकरणार्थंमाहात्म्यमाह तस्येति तस्यमा
हात्म्यंकथमुक्तावृयः अवच्छेदाभावादितिभावः
यतोवाचोनिवर्तन्तइतिन्यायाश्रयणात् अत्रहेतु
गर्भंविशेषणंस्वभावविमलमिति नैसर्गिकमेव
तस्यतत् नसूर्यादिप्रकाशवत्परोपाधिकमित्यर्थः

सर्वनाम्नोविधेयानुवाद्यलिङ्गग्राहित्वात्सेतिग्रत्रवा
द्यमात्रालिङ्गाश्रयेण यदुक्तंकातन्त्रमीमांसायाम्
सर्वाणिसर्वनामानितत्त्याधिकरणान्यपि स्वेच्छया
गृह्णन्तेलिङ्गमनुवाद्यविधेययोरिति उक्ताश्रयइ
ति उक्तिरूपलक्षणम् तेनमननाश्रयमपिकथ
मित्यर्थः इदंसृष्टारम्भोन्मुखत्वाद्वस्यसर्वस्येयम्
ततएवचरत्वादीनांप्रादुर्भावात् यदाहभृगुः यत
त्कारणमव्यक्तंनित्यंसदसदात्मकं तद्विसृष्टः स
पुरुषोलोकेब्रह्मेतिकीर्त्यतेइति ४ इत्यंभावाश्रा
यसूचकंपीठिकाबन्धंविधायशास्त्रावतरणमार
चयति असौस्वेच्छाशालीति असाविति भगवद्
परमूर्तिर्ब्रह्मापरपर्यायः कलनासम्बन्धः केन
कथंचकंसम्बन्धयामीतिसम्बन्धार्थेस्वांवरतनुं
तेजोमूर्तिमनुमकलयत् प्रादुरभीभवत् इच्छा
मात्रेणमनुज्ञातइत्यर्थः यदाहभृगुः द्विधाकृत्वा
त्मनोदेहमर्धेनपुरुषोभवत् अर्धेननारीतस्यांस

विराजमसृजत्प्रभुरिति स्थिरचरजगज्जावकलनासि
द्धयेस्यसृष्टत्वान्नच्छक्तिसामर्थ्यसूचनार्थंविशेषणप्र
वृत्तमनुवदतियएकइत्यादि तच्छास्त्राङ्कितोविधिनि
षेधात्मचोदनाधिकारीसम्पन्नइत्यर्थः परमतेजःस्फा
रात्मकशासनपद्धत्याधारणवशाच्चवर्तितात्तः कृतार्थो

असौस्वेच्छाशालीस्थिरचरजगज्जावकलनो
स्वहत्केशीकृत्वामनुमकलयत्स्वांवरतनूम्
यएकस्तच्छास्त्राङ्कितइहयदापावनवपुः स
शीलःस्वच्छात्माधिकृतिपदमध्यास्तसवितः
५ ॥

भवदित्याहविशेषणमुखेनसूचितइति शासनपद्ध
प्राक्सावधिहेतुगर्भेविशेषणद्वयम् सुशीलःस्वच्छात्मे
ति अतएवसर्वतः शासनप्रवर्तनादुदापावनवपुरि
ति यदापावनेवपुर्यस्येतिकृत्वाथदाशब्देनतत्स्यात्वद्
ने अथवायरैवमुख्याचाचार्यसंस्कारेणाधेयसंस्का
रवत् ५

प.से
९

अधिकृतपदमध्यास्तेत्येतस्माययति सोऽभूदिति यद्य
पिवहवोऽधिकारिणः स्मृतिकाराः शासनपदृच्यारिणस्त
थापिसएकएवाग्रजः साक्षाद्ब्रह्मपुत्रोऽन्येतुपरम्परयेति
भावः तथाचाह तेषांमुनीनांवरइति षड्त्रिंशतोऽप्यधि
कारिणामित्यर्थः तेच मन्वत्रिदक्षाङ्गिरोविसृष्ट

सोऽभूदग्रजएकएवमहतांतेषांमुनीनांवरो
येर्वाणाथरणीयमङ्गतपःस्वच्छाशयैःसन्त
तम् ऊर्ध्वस्रोतसमान्तरान्तकलनायेकेपिदि
वौकसस्तेषामप्यधिराजएषजगतीविश्वेऽधि
कारीमहान् ९ ॥

हस्पत्युशनोऽपस्तम्भवसिष्ठकात्यायनपराशरव्यास
शङ्खलिखितसंवर्तगौतमशातातपहारीतयाज्ञवल्क्य
प्रचेतोबुधदेवलयमजमदग्निविश्वामित्रप्रजापतिना
रदपैठीनसिपितामहबौधायनच्छागलेयजाबालिम
रीचिकश्यपात्रेयाइति नकेवलमधिकृतिशालिना

मेवमप्यएषवरोयेनप्रवृत्तिमार्गप्रदर्शकत्वमेवास्य
सिध्यति यावदपास्तभवाडम्बराणांनिवृत्तिमार्गाश्रि
तानामप्येषएवैकोवरइत्याह ऊर्ध्वस्रोतसइति ते
चकुमाराःसनन्दनाद्याब्रह्मचारिणऊर्ध्वस्रोतस्तादे
वान्तरान्तकलनाः आन्तर्यान्ताकलनायैर्ब्रह्मैकतत्प

सैषोशिक्षितएवसर्वकलनांसंस्थाप्यभूमण्ड
लेस्वात्मज्योतिरवेक्षितात्मकलनःसन्क्रील
त्याल्पान्तरः स्वस्थोभूच्चयदात्तदैवपरमात्मैनै
त्यसर्वात्मनासर्वेषामधिकारिणांपरगुरुर्ज्ये
ष्ठश्रेष्ठःकृतः ८ ॥

णइत्यर्थः ८ तेनसिद्धत्वमेषा
मुक्तम् सएषकर्मिणांयोगिनांचवरोविदितपरावर
उभयात्मकःसिद्धइत्यर्थः ९ तत्त्वमप्याहार्यानाहार्य
भेदेनद्विधा तत्रयेषांसाधनसाधितंतत्त्वंतआहार्यत्वा
द्गौणसिद्धाः येषांतुजन्मतएवसिद्धत्वंतअनाहार्य
त्वानाःसांसिद्धिकत्वान्मुख्यसिद्धाइत्युच्यन्ते तत्रमुख्य

निसेधोऽशिदितइत्यादिना।

सिद्धत्वमेवास्य साधयन्नशिक्षितइत्यनाद्याचार्येज्ञानःस्व
तस्सिद्धइत्यर्थः सर्वकलनामितिनियतिरूपाम् वि
धिनिषेधरूपांच कथमस्यतथात्वमित्याह स्वात्मज्यो
तिरित्यादि आत्मकलनाश्रुतिसागरः तत्रापिदेवगर्भे
विशेषणंसच्छीलशाल्यन्तरइति नियतिसंस्थापने
नास्यकृतकृत्यतामाह स्वस्याभूदित्यादि राजत्वस्था
त्वादिकलनासंस्थांवाह्योदृष्टफलामदृष्टफलांचान्त
रीविधेयप्रतिषेध्यकलनासंस्थांविधायकृतकृत्यता
यदास्वस्याभूत्तदैवसर्वात्मनापरमात्मेनविष्णुरपर
मूर्तिनाब्रह्मणासम्भावीभूयसर्वेषामधिकारिणांप
रमगुरुर्ज्येष्ठश्रेष्ठश्चकृतः सर्वेषामान्यःकृतइतिव
धोविनयादिमान्यस्यानत्वमापादितइतिभावः तथा
चबृहस्पतिः वेदार्थोपनिबन्धृत्वात्प्राधान्यंहिमनोः
स्मृतम् मन्वर्थविपरीतातुयास्मृतिःसानशस्यते ता
वच्छास्त्राणिशोभन्तेतर्कव्याकरणानिच धर्मार्थमो
क्षोपदेष्टामनुर्यावन्नदृश्यतइति ॥ ७ ॥ ॥

एतदेवशपञ्चयति सौशील्येति सौशील्यस्वाच्छ्यमि
तिसमाहारैकत्वम् एतेचवक्ष्यमाणलक्षणे स्वतइति
साधनापेक्षांविनास्वयंसिद्धमित्यर्थः भूतभाव्यधि
कृतंस्मृतिकर्त्तृणांमूर्ध्नि अस्यमनोरनुशासनंविदि
तवानिति ८ इत्थंसमाश्वस्तहृदयवादीशस्थापित
त्वपरमकारुणिकत्वमित्यस्माकमपितत्त्वपरमादर

सौशील्यस्वाच्छ्यमस्यासौस्वतोवेदयथहृष्टधीः
भूतभाव्यधिकृन्मूर्ध्निचकारस्यानुशासनं ८
इत्थंसमपूर्णेनिर्भीतिर्व्यवस्थापितसत्क्रियः प्र
सादपात्रमीशस्ययस्तस्मैमनवेनमः ९ ॥

इत्यादद्युगलकेन इत्थमिति सहचारीतिच सम्पू
र्णइति अन्येपिसन्निशर्णाः परस्परापेक्षयासततर
पेक्षयातिशयेनशर्णाइतिसम्पूर्णाः शर्णाहन्तइत्यर्थः
अतएवसम्पूर्णत्वान्निर्भीतिरभयः अशर्णस्यहिभयंभ
वति नचैतदस्यमनयम यतोऽधरस्तोतस्वपियेमहा

मदइतिनमीरितिचव्यपदिशंतिइतिकेनामास्मात्मिका
विभवंनानुमन्वते स्वयंचेदृशः सन्परार्थंव्यवस्थापि
तसत्क्रियः क्रियाणांचसत्वेदृष्टादृष्टफलाव्यभिचारि
त्वम् इत्यंचपरार्थंचट्नोयुक्तत्वादीशस्यदयापात्रम्
तन्निर्वाह्यकार्यनिर्वाहनात् इतिनोपितस्मैमनवेन
मोस्तु येनतडदितसन्मार्गाचरणाहयमपिप्रसादया

सहचारिवयस्यादिपुत्रमित्रादयोपिये तस्मा
विकृतिमापन्नास्तेभ्योभूयोनमोनमः १०

त्रेमवामइति अविकृतिमिति धर्मानुशासित्वता
लक्षणांप्रजापालनादिलक्षणांच भूयोनमोनमइ
तिस्वाङ्कपोषणेनहिमहत्तामादरातिशयोयथाह
इपतेनतथासात्वात्स्वपोषणेनेत्याशयेननमोनमो
भूयइतिवीप्सा तथाचऊसमदेवः उत्तमस्तोषमा
यातितदङ्कपोष्यतेयदि चक्षुःप्रसीदतिशयःपादस्प
र्द्धेनस्वयमिति ९

पुनरपितस्यमाहात्म्योतनार्थंतेनचतडदितेदृष्ट
मास्यास्तेनाशेषफलसिद्धिंकथयितुमाह यस्मैइति
शास्मनेशिरः शासनपद्मम् अनादिसिद्धेति यन्मनो
र्वचपशानादिसिद्धावाकश्रुतिरेवेयमित्यर्थः तयात
द्भेषजंचसंसारदीर्घरोगस्य तथाचब्रह्मान्दोगयब्राह्मणे

यस्मैचार्पितमीशेनशासनंहृष्टचेतसा अना
दिसिद्धावागेषाभेषजंतन्मनोर्वचः ११ ॥

मनुर्वैयत्किञ्चिदवदत्तद्भेषजंभेषजतायाइति श्रु
तिनिगूढार्थस्मर्तृत्वादेवचास्यसकल्पनागोचरत्वंयो
तयितुंतत्समानत्वमाहवादरायणः पुराणंमानवो
धर्मःसाङ्गोवेदश्चिकित्सितम् आज्ञासिद्धानिनहन्त
व्यानिहेतुभिरिति ॥ ॥ ॥

चत्वारि

इतिशासनपद्मार्पणेनश्मेोदितचेतसंसन्मुखीकृत
तदुक्तेजनार्थस्वस्यकृतकृत्यतामावेदयतिब्रह्मापंच
भिः भोःपुत्रेत्यादि पुनातिसच्चारित्रेणसर्वापरस्वात्म
नइतिपुत्रःसौशील्यसत्प्रकृतित्वंसहृत्वंचवद्यमा
णलक्षणं सर्वमिति इदामुत्राखिलोकद्वयम सारभू

भोःपुत्रयत्तेसौशील्यंतेनसर्वंजितंत्वया सार
भूतंजगत्यस्मिंस्तेतेनसदृशोनहि १२ यदस्य
स्वप्रकाशस्यविभोःपरमंमोमहः तदीयिले
शःस्वाच्छायत्सौशील्यंविन्दुरेककः १३ ॥

तेदछमनस्वरंन्याय्यंच यतेनसौशील्येन १२ प्रति
ज्ञातमर्थंसाधयति यदस्येति अस्यस्वप्रकाशस्यवि
भोर्व्याख्यातस्वरूपलक्षणस्ययत्परममोंमहइति पर
मंनिरपेक्षं ओमिति ओङ्कारलक्षणंस्वात्मसमालक्षणं
च ओमेवंपरमंमतेइतिकोशात स्वाच्छामित्यान्तरशो

वं सौशील्यमितिवाह्यशोचं एकएवैककइतिस्वार्थे
कन् तस्यचयत्परमंमहत्वंसर्वावभासकंचैतन्याख्यं
सारंतस्येमेंशाः येकेचिद्वाह्याभ्यन्तरप्रकाशकारित्वेन
प्रकाशकाइतिप्रसिद्धाः सूर्याचन्द्रादयोवाह्याश्चक्षुः
श्रोत्राद्याश्चशरीरैकलग्नावाह्यान्तराः मनोबुद्ध्याश्चके दय.
वलान्तराइत्यर्थः सेतिसर्वप्रतीतत्वेनमान्याशैलीशी

महत्वंयत्त्वपरमंतस्येमेंशाजगत्तले सूर्याच
न्द्रादयश्चक्षुःश्रोत्राद्यायेपिभासकाः १४ य
ल्लेशाएवकदेशश्चसाशैलीराजतेतराम यदा
श्रयेणमान्यासौत्रिलोकांकारणावली १५ ॥

लेभवाशैलीसुइप्रकृतिश्वतिविराजमानापियल्लेशा
एवकदेशःकथमस्यास्ताहशामान्यत्वमित्याह यदा
श्रयेणेति यदाश्रयेणशैल्याश्रयेण असौकारणा
वलीब्रह्मविष्णुरुद्रेशानसदाशिवलक्षणायथोचि
तसमाश्रितास्यदाहृष्टिस्थितिसंहारतिरोधिप्रकाश
कारितयामान्याजातासोयंशैलीप्रभावइत्यर्थः १५ ॥

प·सं
१८

कृतंसम्पादितं शरणमितिनिराकाङ्क्षमित्यर्थः ततश्च
कलेर्यावत्तवकीर्तिरनश्वरास्त्वित्याशीः १९ इत्याश्वासि
तेति प्रायःप्रत्ययमाधत्ते स्वगुणैश्चत्तमादरश्मिनयेन
प्रत्यायितस्वगुणः परमयाश्रद्धयातद्ब्राह्मशासनेमत्वा
न्वहंतत्तदृढार्थं बद्धकक्षोभूत् ४ बद्धकक्षत्वमेवास्य
सूचयति तदिति तदितिगर्भीकृतेतरभावकगुणंसौ

कृतंतत्त्वतयासूर्यं यदर्थमवतारितः कृतकृत्यो
स्मिहृष्टात्माकलेर्कीर्तिर्ध्रुवास्त्विति १९ इत्याश्वा
सितचेताःसत्तदेशंशासनंदृढं रहस्यंपरमादेयं
मत्वाभूत्सजितोन्वहं ४ तत्पुरस्कृत्यशंतानामा
वर्णाश्रमगतीःप्रभाः वावस्थाप्यमुनीन्भूयःशि
क्षयामासचादृतः १९

शीलंपुरस्कृत्याग्रेसृत्वाततःकृत्वासम्पूज्यचतदनुशा
सिताश्चतंवर्णचतुराश्रमगतीःप्रभारहस्यमत्रश्चभोद
कोःस्वयंव्यवस्थयादृढीकृत्यादृतःसन् शिष्यप्र
शिष्यमुखेनप्रचयगमनार्थंमुनीनप्यश्मवादीन्शिक्ष
यामास १८ ॥

ऽतंयदिवादिवाभेदेनशास्त्रसम्बन्धंव्यवस्थाप्याथयी
मतामवाप्तैरैहिकफलप्राप्तिपूर्वकंपरमपुरुषार्थदायि
त्वान्नजाधिकृतिपात्रत्वंसंज्ञपयति ततोस्येत्यादिना त
त्रेतितस्माद्धेतोरस्यपरमस्वतन्त्रस्यप्रभोर्गतिस्वरूप
स्वारस्यलक्षणंमृगयितंतच्छास्त्रिरूकलक्षणं ३८ द
शतीत्यतिशयेनन्तिपूर्वसेव्या नतिपूर्वमितिवाह्य

ततोस्यगतिमन्वेष्टुंसेव्यातच्छास्त्रिरादरात न
तिपूर्वंयथेष्टानःप्रसन्नःपरमाप्तिदः १९ तद्धा
गेवातिगाढासौभव्यातङ्गतिवादिनी तत्प्राप्ति
कारिणीचापिमान्याकैर्नास्तिथीथनैः २०

लिङ्गयारणमपितदाज्ञाप्रदरणायपरमाप्तेर्दैवतविनिस्
चितं परमाप्तिःयस्याश्मात्राभयःसाधनतंयान्निसे
यमपवर्गलक्षण १९ ननुकथमस्याप्ताद्दकेयेन्ना
स्यगतिमन्वेष्टुमितिसिद्धवत्कृत्वासेव्येत्युक्तम् तदाह
तद्धागिति येतोऽसौमुनिप्रणीतास्मतिलक्षणतस्य

प.सं
१५

मोरतिगाढावागेवस्तुतिरेव अयंभावः तत्रातिगूढा
शयत्वेनशिथिलयत्नानांशान्तहृदयानांदृढस्थित
येमुनिप्रणीतेयंविचितिरित्यर्थः ततश्चतदाशयवि
स्तारहृपत्वादस्यास्तद्वृत्तिवादित्वम् गत्वाचावश्यंत
त्वाप्तियैौहिगच्छतिसोवश्यंतत्रप्राप्नोतिइतितत्वाप्ति
कारिणीत्युक्तं धीयतेनैरित्यनेनधियपवसर्वत्रसर्वा
प्तिसाधनत्वमितिसूचितं यदाहुः मेधाहीनःपशुः

दयाविराजतेसैषाङ्हेतैवशीयदसौप्रभुः स्व
तःसिद्धंस्वशिक्षाङ्कमेनंभूमाववातरत् २१

स्मृतइति २० पुनरपिदृढप्रत्ययार्थंप्रभोर्निष्कार
णंपरमकृपालुत्वकथनपूर्वंमन्वतिशयमेवाह
दयेति अहेतुइतिनिष्कारणम् क्रियाविशेषणंचै
तत् स्वतःसिद्धमित्यनाहार्यज्ञानंस्वशिक्षाङ्कंस्वशील
शैलीशीलितं अवातरदितिएतर्थिगर्भीकारेणपदसं
स्कारपक्षाश्रयेणलङ्प्रयोगोपिसाधुरेव २१ ॥

आदिश्यादि वर्णाश्रमकर्मणामानन्त्येपिसर्वत्रसा
क्षुण्णहेतुःस्वाच्छासौशील्यमेवैतद्विनातेषांतुच्छप्राय
त्वादितिभावः २२ इत्यंचासोपेयत्वात्कर्मणामपाय
त्वात्तदादरस्सर्वमिदमेवपर्यन्तफलतयादर्तव्यमित्या
ह स्वच्छमिति अखिलमिति वर्णाश्रमकर्माचरणा
द्यपिमहतेपदायमोक्षायैवकल्पतेइतिनिष्कामकर्मण

आदिमध्यावसानेषुतत्तत्कर्माश्रयापियत् य
स्यासिःस्वाच्छासौशील्यपरमार्थैकतत्परा २२
स्वच्छंविधायहृदयंशीलमर्जयतांनृणां कल्प
तेखिलमेवाहोपदायमहतेकृतं २३

मपवर्गहेतुत्वमुक्तं भगवताचेत्थमेवरीतिर्निष्ठाशब्दे
नोक्ता लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघ
ज्ञानयोगेनसाङ्ख्यानांकर्मयोगेनयोगिनामिति अ
त्रच साङ्ख्यानांज्ञानयोगेनयोगिनांचकर्मयोगेन
यागतिरुक्तासाहिमीमांसकैश्चसामथादेङनद्योवि
तद्धेनिष्ठाशब्देनैकैवोक्ता स्वाच्छासौशील्येनक्रि

यमाणंकर्मसर्वथासिद्ध्यतीत्यर्थः २३ अतएवपरम
काष्ठात्वमस्याह अस्येति अस्यस्वाच्छसैशीलस्य
२४ उक्तस्यैवार्थस्यस्फुटीकरणायार्थान्तरंन्यस्यति स
न्नान्यइति तेजोलेश्याइति चन्द्रवह्न्यादयः सम्तूलंस
र्वतमोपहत्वेनगण्यतेइति २५ अस्यैवार्थस्यसर्वतः

अस्यकल्याणवसतेःसदर्थानांचशेवधेः अ
न्यानिसत्कृतान्याहोकलांनार्हन्तिषोडशीं २६
सन्त्यन्येपिचलोकेत्रतेजोलेशास्तमोपहाः परं
सभगवानेकोरविरेवहिगण्यते २७ तथाच
परमोत्कृष्टमस्यश्रुतिषुगीयते तस्यांपरमवे
लायामेतदादौहितोल्पते २९ ॥

सेतिमन्त्राद्दिविवाक्यकल्पस्यस्फुटीकरणार्थमर्थवाद
रूपांलक्ष्याख्यायिकामाह तयाचेत्यादिना श्रुतिष्विति
बहुवचनंतन्मूलस्मृतिग्रहणार्थं गीयतेइतिपरमाद
रविषयत्वंतत्रास्यसूचयति तस्यामिति प्रलयलक्ष
णायांमृतिलक्षणायांवा परमेतिचविशेषणमवश्य

भावित्वमस्यार्थस्यज्ञापयति एतदिति स्वाच्छसैशीलस्य
लक्षणंसहस्तश्चादावित्ति कर्मविभागात्पाक पश्चादि
ति एतत्रोलन्नानन्तरंपुण्यपापगतीतोल्यतेइत्यतोहेतोः
संशितधीर्निश्चितमतिः कोनामैनामग्र्यांगतिंमोक्षफ
लांनाश्रयेत एतदनाश्रयणेपशुत्वमेवहेतुरित्यर्थः
एतदेवनिदर्शयति तथाहीत्यादिना पुण्यकर्मणांफ

पुण्यापुण्यगतीपश्चादितिसंशितधीर्नरः को
नैनामाश्रयेदग्र्यांपरमाप्तिगतिप्रदाम् २८ त
थाहिपुण्यपुण्यैकस्यागतिरूर्ध्वापरोभयम् द्वे
तमध्यगतेःपूर्णाचतुर्दशविधागतिः २९

लेतारतम्येनोर्ध्वगतिः ब्रह्मलोकान्तापापकर्मणांच
तथैवतारतम्येनाधराधरागतिर्नरकपशुस्थावरान्ता
मिश्रितकर्मणांचफले मध्यगतिर्मनुष्यलोकाप्तिः इ
त्यंकर्मणांगतिमुपसंहरति पूर्णेत्यादिना तथाच अ
ष्टविकल्पोदैवस्तैर्यग्योनश्चपञ्चधाभवति मानुष्य
श्चैकविधः समासतोभौतिकःसर्गइति २९ ॥

इत्यमूर्धाधरमध्यलोकगतिंदेवपशुमनुष्याख्याश्चयो
कर्मफलंनिरूप्यसर्वोत्कंपरमोत्कृष्टफलनिरूपणाहे
दैतोलनेचशुक्लिंयुगपद्दर्शयतिइयंतिति तुशब्दः पूर्व
पद्यादस्याविशेषद्योतकः इयंस्वाच्छासोशीलत्वलक्ष
णाशैली परमानन्दगतिहेतुत्वव्यपदेशपालस्यात्म
वेधानन्दकारणमतोस्याःप्रथमगणनम् एतदुक्त

इयंतुपरमानन्दगतिहेतुर्गरीयसी सर्वथा
कृतिभिस्तस्मादस्यांजागर्यमेवहि २९ सु
तिश्चाहाग्रजन्मायः सुशीलःस्वच्छचेतनः
सतत्पदमवाप्नोतियत्कान्तानांमहात्मनां ३०

नांविद्यस्तपरमार्थगतीनांव्यपदेशपलत्वचतुर्दशलो
कगतिरित्यर्थः अतएवान्यगतिभ्यः पुण्यातिशयाप्या
ब्रह्मलोकगतिर्गुरुरियंचोभयोर्मध्येगुरुरितिगरीय
सी अतएवाह सर्वथेति जागर्यमप्रमत्ततयेनावहितैर्भा
व्यमित्यर्थः २९ अथेदानीमस्याएवपरमोत्कृष्टत्वंद्योत
यितुंपरार्धोपायसमानकत्वमस्याउद्धयतिसुति

श्रुतियुगलकेन शान्तानांमहात्मनामिति ऊर्ध्वरे
तसांयोगिनां मुनीनामूर्ध्वरेतसामिति संयतचित्ता
नांवेदाभ्यस्तमतीनांब्रह्मचारिणां इतिसङ्केतवतार
तम्येनक्रमसुक्तिर्द्योतिता अथोइतिक्रमकथनान
न्तरमक्रमेणपरमार्थमुक्तिद्योतनार्थं विदितवेद्या
नांतत्वविवेकिनांज्ञानिनामितिविकासतारतम्येन
सहस्रवलसुक्रम् ततश्चारुरुक्षूणामारूढानांच

अनेकजन्मसिद्धानांमुनीनामूर्ध्वरेतसां अ
थोविदितवेद्यानांयत्पदंतस्यतद्ध्रुवम् ३१

यत्पदंतत्पदमसौप्राप्नोतीति अग्रजन्मेति अनेना
स्याएवजातेःप्रधानोपकार्यतामाह अथवानहि
भातमभातंस्यादितिन्यायेनयस्येदंस्फुरितंसोग्रज
न्मेति सतत्पदमिति यत्पदंतस्यतद्ध्रुवमितिचपौन
रुक्त्येनहिबहुंसबहुंभवतीतिन्यायाद्याश्रयेणाव्यभि
चारिफलत्वमस्याःसूचयति ३१ ॥ ॥

अस्यापवागमान्तरसंवादोद्देशकथनस्वमेतत्फल
वत्वमेवप्रकटयति तथाचेति रहस्येष्विति रहस्यत
येषु प्रकाशसरणिर्ज्ञानमार्गः अन्यानपेक्षिणीति
अन्यउपायापतदपेक्षाः इयंत्वन्यानपेक्षिणीसर्वोप
निवर्तित्वादस्याइति तडक्तंरहस्यनये प्रमाणान्यपि

तथाचबहुधाप्युक्तंरहस्येषुमहात्मभिः प्र
काशसरणिःसेयंशैलीयान्यानपेक्षिणी २२
एतांविनान्यानैवास्तितत्पदप्राप्तिकारणं प
नयैवहितत्प्राप्तिर्यास्तिहरेडरात्मनाम् २३

वस्तुनांजीवितंयानितन्वते तेषामपिपरोजीवश्रि
तेःस्वाच्छाद्वियन्मतम इति २२ अन्येषांसापेक्ष
त्वमेवदर्शयति एतांविनेति डरात्मनामिति अ
शीलानाम् २३ ॥

एतदेवप्रकारान्तरेणापिदृढप्रतीतयेदर्शयति एत
दिति एतद्विश्वान्निराहित्येन्येषूपायेषुसत्स्वपिपशुतां
विनानान्यागतिर्गरीयस्यस्तिपशुत्वमेवास्तिगरीयस्त्व
धिः २४ अनयैवसर्वोत्तमत्वमपिसिद्ध्यतीत्याह यस्या
साविति प्रकृतिःस्वभावः मानवानांमानवइतियथा

एतद्विश्वान्निवैकल्येसत्स्वन्येष्वपिनोनृणां
विहायपशुतांकाचिद्गतिरस्तिगरीयसी २४
यस्यासौप्रकृतिःस्वच्छामानवानांसमानवः
अन्नःसौशील्यमेवासौनाकृतिस्तत्रकारणं २५

विवेकगुणेनपशुभ्यःप्रमानतिरिच्यते तथायमपि
शैल्यामानवेभ्योतिरिच्यते तत्सदेशेन्येपशवइवाभा
न्तीत्यर्थः सन्निचबहवोपिडष्टावद्भिःशीलमभिनय
न्ति तदर्थमाह अन्नइति आकृतिःशोभनाशरीरसं
स्थितिः तत्रेतिसौशील्ये २५ ॥ ॥

प॰सं
२०

च इति स्वरूपमुक्त्वा सद्भेदेन श्रोतॄन् बुद्धिप्रवृत्तये फलमा
ह ऐत्यादि ऐहिकमिति विभक्तिपरिणामेन शोभया
पि सम्बध्यते यापैहलौकिकी शोभाऽनेनैवेह शुभमाश्री
मत इति न केवलं शोभैवेत्याह अमलमैहिकं कुशलम
पि अनेनैहिकपुत्रदारवाह्यसम्पदोत्कर्षमपि लभ्य
ते अमत्र परलोके शुभायः अनुकूलदैवं अयस्यानुकू
लदैववाचकत्वे सत्यपि शुभग्रहणमस्यापि शोभेत्यनु
कर्षणार्थं पारलौकिकी शोभा सदैवं चेदमेवेत्यर्थः इ
ति फलेनापि समर्थ्याधिकारित्वेऽपि समर्थयति अधि
कृतिपदमिति यस्य सौशील्यस्याधिकृतिपदमधिका
रविषयः यासौ त्रिधा निखिलासृष्टिः सात्त्विकराजसता
मसभेदेन लौकिकी अथवा त्रिधा त्रिवर्गप्रधाना सा च
लौकिकेवेति धर्मार्थकामशास्त्रिकारणत्वमस्योक्तं त्रि
वर्गसाधनत्वमुक्त्वाऽपवर्गसाधनत्वमप्यस्याह नियु
तमनस इत्यादिना आप्तकलनाः सत्यवादिनः सत्यसङ्क
ल्पा वा नियतमनसोऽभ्यस्तयोगा इत्यलौकिकी सृष्टिरि

तिभावः प्रकृतिरितीति शब्दो भिन्नक्रमः सौशील्यमि
त्यनेन योज्यं १९ इत्यमवान्तरभेदेनानन्योपि सृष्टेर्लौ
किकालौकिकीत्वेन द्वैधं स्थापितं तत्रापि राज्ञां सर्वोर्ध्व
वर्तित्वेनात्र महोपयोगितामाह आधिक्येनेति अत्रावि
ति शैली अतिशयद्योतकं विशेषणं चतुष्टयं चतुर्वर्णा
श्रमचतुर्वर्गश्रेष्ठप्राप्तिबोधकं चतुर्वर्णचतुराश्रमा

आधिक्येन परं विराजतितरां तेषां सदा सौशुभा
येषामीशकृपाभरादनिगडं सद्भाग्यकोष्ठं महत्
लोकानुग्रहनिग्रहादिकलना वाञ्छाचलत्वाधि
लप्राणिप्रीणनकल्पनापि शयगा प्रौढात्मनां
भूभुजाम् २९

धिकारिणाममीषां मतेन चतुर्व
र्गप्राप्तिर्हस्तप्राप्तैवेत्यभिप्रायः सद्भाग्यान्येवान्तःसारा
रत्नादिद्रव्यकृतावरणत्वात्कोष्ठं अनिगडमुद्घाटितं निर
र्गलं महदचिन्त्यवैभवमित्यर्थः सद्भाग्यकोष्ठमेव विशे
षणत्वेन विशदयति लोकेत्यादिना लोकशब्देनेहवि

प॰सं
२१

धापिसृष्टिर्विवक्षिता सर्वाधिकारित्वाद्राज्ञाम् शासने
जीवनम् शयगाहस्तगा शैक्षात्मनामञ्चस्वभावानां
मनेनदिक्पालांशत्वमेषांसूचितम् ३९ उक्तंचेति स
र्वेषामितिलौकिकानां योगिनामिति अलौकिकानां
शतसाहस्रेति उभयाधिकारिणांमहात्मनांराज्ञाम्
परिमन्तरत्रापिसम्बध्यते तेनचक्रमासूत्रणमनुसवि

उक्तंचसत्क्रियाशोभासर्वेषांयोगिनांपरा त
तोपिशतसाहस्राधिकृतानांमहात्मनाम् ४०

तंभवति प्रथमंलौकिकानांशोभेयं ततोपिपरायोगि
नां मनागप्येतच्चलनेस्वरूपभ्रंशात् ततोपिपरारा
ज्ञांसर्वाधिकारित्वात्इति साहस्रेति सहस्रंविधेयत्वे
नास्यास्तीतिमत्वर्थीयेणिसाहस्रः सहस्राधिकारी
शतंसाहस्राइत्यसङ्ख्यांतेनाहशानांसूचयति तत्राधि
कृतानांमहाराजानामित्यर्थः ४० ॥

तत्रतादृशस्सौशीलभाजनंतेनाशंसितशक्तमहाराज
सिद्धयेपरिणाहौनिवभाति योसाविति विश्वासभूरूप
लब्धिकारणं एतंविनासन्त्यासत्यावास्याविशेषाभा
वात्तंइन्द्रमहद्दाइति समूलंशत्रुनिर्दलनात् अथतयं
तद्दंशाभवनादिन्द्रमहद्बलइतितद्धस्तवशगाकश्मी
रभूर्नाकभूरस्तीतिसंभाव्यते अथवाःकंडःस्वंतस्यभूरा

योसावंबरभूषणांवसमतीविश्वासभूर्भास्करोय
हंशणाश्रवभूवुरिन्द्रमहदास्तेवैदिलीपादयः तदं
शेपाद्यसकीर्तिधवलितमहीविंबोदरोसौमहाराजो
राजतितस्यहस्तवशगाकश्मीरभूर्नाकभूः ४१

धारोनेतिसंभाव्यते चन्द्रभागांसमारभ्ययावन्मधुमती
तटं कश्मीराइतिविख्यातंक्रीडास्थानंमहेशितुरितिपु
राणे ४१ विबुधवृन्दपद्माकरार्थमेतितद्विकासकः अ
ब्जधीःप्रसन्नमतिःवाडवानांब्राह्मणानामेकाश्रयः प
केशस्वेश्राश्रयः जयतिसत्कर्षप्राप्तिभाजनमस्तित्य
र्थः मार्दवेःमलगःशशाङ्कः मार्दवकाशाद्दिलोकेषु

प·सं
२२

प्रागङ्गणपते क्षमायां भूः महाभरक्रमणेऽपि निर्विका
रः दोषाणामपनयनविधौ हरीकरणे भास्वान्रविः
भास्वांश्च दोषापहारी दोषा रात्रिश्च धीविलासे च कोऽपि
चातुर्ये भार्गवः काव्यः शुष्माग्निः भास्वान्दीप्तिशालीभ

नयज्ञ चतुरः कृती विबुधवृन्दपद्माकरार्यमा
विपुलसत्वभूः प्रकृतिपालनात्तत्परः गभीर
विपुलाशयो भरितदिङ्महीमण्डलो यशोभि
रयमवृथी जेयत्तवाडवैकाश्रयः ५२ नी
तौ वाचस्पतिरमलगर्भादेवे भूः क्षमायां भा
स्वान्दोषापनयनविधौ भार्गवो धीविलासे शु
षाडबेन्धनकवलने योऽस्ति भास्वत्प्रतापस्त्वमा
नर्थप्रशमनकरी कीर्तिराकल्पमस्तु ५३

तापो यस्य अथवा भास्वत इव प्रतापो यस्य अनर्थप्रश
मनकरीति न्यायप्रवृत्त्या ह्यनर्थप्रशमः इति न्यायप्र
वृत्तिपूर्वं कीर्तिराभास्यते अस्त्विति ॥
५२ ॥

इदानीं तन्माहात्म्यसूचनपूर्वं स्वप्रवृत्तिप्रयोजनमावेद
यति कविः किं वाच्यमिति त्रितयमपि चेदं सङ्क्षेपेण श्ला
घनीयमित्यर्थः तत्रापि तावत्तिस्रः पिनोऽस्माकमस्य
धीरेव श्लाघ्या यद्विषया धीविषयाः यदि चेदृशी धीर्न
स्यात्कथमस्मिन्युगे मालिन्यात्तं सिके दृशी शिक्षा स्या

किं वाच्यं वा ससाङ्गुण्ये नीतौ बुद्धौ धृतावपि
तत्रापि नोऽस्य धीरेव श्लाघ्या यद्विषया वयं ५३
र्वाचित्तां स्वपथं नीता प्रकृतिर्धस्य गणपतामर
याचो चित्ते चया स्यामो राजा सर्वप्रभुर्यतः ५४

त. कृतयुगस्थितिर्हीयं यवृत्तस्य प्रत्यावर्तनमिति ५६
ततश्च स्वोचितामिति राज्ञः सर्वप्रभुत्वात्सर्वेषां तत्रोप
यापि गणश्च चितमिति वयमपि स्वयोग्यं प्लोकनिकां
नीतैतत्प्रकृतिस्वगणपतां यास्याम इति ५७ ॥

तत्रादौ स्वेष्टाचिंतां समारामन स्मरांच प्रशस्तुपर्थांसम
र्पयति केनेत्यादि इहेतीहलोके ऽमत्रेति परलोके
चकेन शोभेति प्रश्ने राइति समर्थनम रानं राइति भा
वे क्विप् राइति दाननाम तत्र चतुर्थ्यैकवचने आतो
यातोरित्यालोपे राइति सिद्धम रादानेनेत्यर्थः तथा

केनेहामुत्र शोभा निरुपम महसो वाचकं नाम
किंवा बह्वर्थे निर्विशेषं युगस्त्वय हणार्थमस्य
कोथान्तरस्ति कोवा सर्वार्थसिद्धौ जगति बहु
मतो योतिनां संकलव्याशेषं को भास्वदाख्यो वि
परिणमयते राजगोलाभसिंहः ४९ श्लेषचक्र
(वाचीदं पद्यम ॥

निरुपममहसो ब्रह्मस्तेर्वाचक
मभिधायकं किं नामेति प्रश्ने अजेत्युत्तरं तत्र नामसं
ज्ञाश्च विभक्तिनामेति यल्लिङ्गमिति कलापे प्रातिप
दिकमिति पाणिनीये वदन्ति अजेति च ब्रह्मनाम त
देवहि निरुपमं तेजः सर्वसमादायि नाकेनास्यन्तल

नासम्भवति वेति पदान्तरे किंवा नाम बह्वर्थे समयुगे
स्त्रीपुंसयोर्निर्विशेषं रूपभेदरहितमिति प्रश्ने गोइति स
मर्थनम स्वर्गादि बह्वर्थवाचकत्वात्स्त्रीपुंसयोश्च सर्व
विभक्तिषु रूपभेदरहितत्वात तथा ग्रहणार्थमस्य कोन्य
तः शब्दयोनिर्देशगणीपठितो ला इति प्रश्ने ला इति सम
र्थनं लाग्रादान इति धातः तथा योतिनां प्रकाशवतां
नक्षत्राणां मध्ये सर्वार्थसिद्धौ को बहुमत इति प्रश्ने भ
सिंह इति समाधिः भसिंहस्तिष्यः सिंहो यथा सर्वच
तुष्पदां नात थैव तिष्यो बलवान्नुहूनामिति श्रीपत्युक्तेः
तिष्यः सर्वार्थसाधक इत्युक्तेश्चेति सिद्धं राजगोलाभ
सिंह इत्युत्तरं नामायमलङ्कारः एकस्मार्थीगतः प्र
यश्लेषालङ्कारेण द्वितीयार्थं बीजमासूत्रयति को भा
स्वदाख्यो विपरिणमयते इति यथा कश्च भास्वदाख्यो
भास्वतीत्याख्यानामयस्यासौ अशेषं संकलव्यवशी
कृत्य विपरिणमयते तस्मिपर्यन्ते यथेष्टमवस्थापयते
अथवा शेषं सर्वोक्तं संकलय्य को विकोपरिणमयते

विभक्तिपरिणामेनतस्मिन्नवस्थाप्यते तत्रसमस्ते
राजगोलाभसिंहश्शत्रुतरम् तथाहि केनेहामुत्रशो
भेति इहप्रत्यदेसुत्रपरोक्षेचकेनशोभेतिप्रश्नेविभ
क्तिविपरिणामेनसमस्तमुत्तरं राजगोलाभसिंहेनेति
तथानिरुपममहसोवाचकंकिंतत्रापिसमस्तंप्रथमां
तमुत्तरं अत्रनामेतितिनिश्चये तथाबह्वर्थोबहुधनः
दृयुगेकलियुगेसर्वथानिन्द्यनिर्विशेषः स्वपरभेद
प्रतीतिरहितः कइतिप्रश्ने तत्रापि समस्तंप्रथमान्तं
तथायातः कर्मफलदातः सर्वेश्वरस्यग्रहणमर्थोग्य
स्येत्येवंभूतः कइतिसमस्तमेवसमाधिः तथाद्योति
नांतेजस्विनांराज्ञांमध्येजगतिपृथिव्यांसर्वार्थसिद्धौ
बहुयथास्यात्तथाकोमतइतिप्रश्नेपिसमस्तंसमाधिः
सचभास्वद्दाख्योभास्वतःसूर्यस्याख्यायस्यासौगोला
भइतिसूर्यस्यापिनामेतिश्लेषमूलोद्वितीयोर्थः अ
थसमासोक्तिमूलस्तृतीयोर्थः तथाहिभास्वानिहेति
पृथिव्याममुत्रेत्यन्तरिक्षेचशोभते निरुपमतेजस्त

श्चायारः तथाबहूनांसर्वेषामर्थेनिर्विशेषंयथाभवति
तथाबहति नहिमलिनामलिनगुणागुणविवेकःक
श्चित् तथायातरितिब्रह्मणोग्रहणार्थश्चभवति रवि
मार्गेणैवहियोगिभिर्ब्रह्मगतिःप्राप्यते तथाद्योतिनां
चन्द्रतारादीनांमध्येसर्वार्थसिद्धैजगतिबहुमतःतथा

यस्मिन्धिर्मारगृहीतमकरषिकगताधारभूतो
मरारिर्ब्रह्मालिंगार्थवाचीद्विवचननिरतस्तःस
मूहार्थवाची एकोगोरस्तमेतत्त्रिभुवनमितिधी
श्चैकतोपत्यमालासंख्यातत्याणिनीयंफलति
त्वलपरंश्रीमहाराजदेवे ४९ पन्नावर्तीयम्॥

शेषंसङ्कुलयारश्मिभिःसमुच्चितांविपरिणामयतेका
लांतरेणयथोचितंहिमादिहारेणविसृजतीतिभावः

५२

यस्मिन्निति धिरितिसंबुद्धिसंज्ञासारस्वतानुशासने
श्रामन्त्रणेसिधिरितिविहिता तथाचयस्मिन्सूत्रेमार
गृहीतमकरषिकगताधिरिति मारःकामःगृहीशमि

प.सं
२५

ङ्गा तमोराङ्गः अज्ञातज्ञर्षिर्महर्षिकः अज्ञातेकः एषुच
तर्षुगतासंबुद्धिराह्वानंवर्ततइतिशेषः इत्येकावर्तः
तथायस्मिंश्चमुरारिर्भगवान्विष्णुराधारभूतः सर्वाधा
रभूतोयद्वाधारभूतस्त्राधारमाधारविभक्तिंसप्तम्येकव
चनंप्राप्तः भूसत्तायांभूप्राप्तावात्मनेपदेइतिचपाठात्प्र
नित्यएवन्ताश्चुरादयइतिचसिद्धान्तितम् तथाब्रह्मा
कमलभूर्लिङ्गार्थवाचीभगवल्लिङ्गारायनपरोयश्च
लिङ्गार्थवाचीप्रातिपदिकार्थवाचीप्रथमान्तइतिया
वत् कलापानुशासनेप्रातिपदिकपदेलिङ्गसंज्ञाक्ष
ता डेंयान्तविभक्तिवर्जमर्थवल्लिङ्गमिति तत्रचप्र
थमाविभक्तिर्लिङ्गार्थवचनेइतिप्रथमासिद्धैवेतिप्र
थमैकवचनान्तोयत्रब्रह्मेत्यर्थः तथासम्मूढार्थवा
चीत्रप्रत्ययोपितङितः द्विवचननिरतः समीपवर्ति
त्वात्प्रथमाद्विवचनान्तइत्यर्थः इतिद्वितीयावर्तः २
तथायस्मिंश्चएकोगोरत्नमेतत्त्रिभुवनमितिधीश्चेति
धीर्महावाक्यज्ञानंएकोगोनगच्छतिविकारमित्य

र्थोनिर्विकारोहंपरमेश्वरोब्रह्मापरपर्यायएतत्त्रिभु
वनमरत्नमयालयमितिमहावाक्यार्थीरवएवाक्या
र्थप्रतीतिरितितृतीयावर्तः ३ तथायस्मिन्प्रकृतः
पाणिनिकृतः सूत्रार्थश्चैकोनस्थलएकमाच्छततमेवं
ध्येएकोनशतप्रत्ययप्रसङ्गेः पूर्णशतप्रत्ययप्रसङ्गेः
वासतिसंख्यामर्यादावर्तते एतादृशेविषयेएकएवा
पत्यप्रत्ययःकार्यइतिचतुर्थावर्तः ४ तत्पाणिनिरचि
तंसूत्रंश्रीमहाराजदेवेस्मिन्नस्तयोगात्तेमावहेराज्ञि
त्वल्वित्वविप्रतिपन्नौ सर्वानुमतापरंकेवलंनान्यत्र
फलतिसफलीभवतितात्पर्यंहृत्वात्तैवमुख्याभिधेयो
भवतीतिपञ्चमावर्तः ५ तथाहि एकोगोत्रेइतिपा
णिनीयंचतुरक्षरंसूत्रम् तत्त्वपञ्चभिरावर्तैः पञ्चवा
क्यार्थसम्बद्धम् यथाअस्यविष्णोरपत्याभिः कामःत
स्यसंबुद्धिःएइति ऊः इष्वीतस्याःसंबोधनंकोइति अ
गुच्छायामाजकूपत्वाद्राङ्गस्तस्यसम्बोधनमङ्गगोइति
अत्रिरितन्नामामहर्षिस्तस्यसंबोधनं अत्रेइति इतिसि

प·सं
२९

डंयस्मिन्निर्माररहीतमक्षरिकगतेतिप्रथमावर्तः
तथा अः विस्मस्तस्मादाधारविभक्तौङिप्रत्ययेकृतेप
इतिरूपंसिद्ध्यति तथाकोब्रह्मातस्मात्प्रातिपदिका
र्थेविभक्तौसुप्रत्ययेकृतेकइतिरूपंसिद्ध्यति तथाग
वांमाहेयीनांवाचांवासमूहोगोत्राइतिसमूहेत्वल
गोत्रेइतिद्विवचनंभवति तथापविष्णावाधारभूते
कोब्रह्मागोत्रेद्विविधगोसमूहोचवर्ततेवर्ततेइति
वाक्यार्थः इतिद्वितीयावर्तः २ तथापकोद्वितीयोह
मगोनिर्विकारएतत्रिभुवनमत्रेइदमपालयंत्रायते
इतित्राःसइवाचरमित्याचारक्विपिक्विबन्तोथातत्वं
नजहातीत्यात्मनेपदेइटिगोत्रेइतिरूपम इतितृती
यावर्तः ३ तथापकोगोत्रेगोत्रएकएवापत्यप्रत्ययः
स्यात उपगोर्गोत्रापत्यमौपगवइति इतिचतुर्थावर्तः
तथा पकोगोत्रे गोत्रेरघुवंशेधुनासावेकोसहायोम
त्रिवास्तीतिनद्वितीयएतत्सदृशगुणविभवइत्यर्थइ
तिफलतित्रिलपरेश्रीमहाराजदेवेइतिपञ्चमावर्तः ५

जिष्णोइति भोजिष्णोजयशीलत्वदुर्मनत्वमायुकारिंश्च
त्वंद्विदित्वधनंजयोसि धनंजयतीतिधनंजयः श्लेषान्न
रोधात्वत्वपिसंज्ञायामितिनियमेऽसंज्ञायामपित्वः
नवसर्वथासंज्ञैवेयंद्वितीयार्थेसंज्ञावगमात यदि
वसंज्ञायामित्याग्रहस्तदाधनंजयोर्जुनत्वत्वइत्यारो

जिष्णोदित्वधनंजयोसिपवनोमूर्त्याकृतान्तः
श्रुतावाङ्कःपुण्यजनंप्रचेतसमलंसम्यक्प्रजाणा
लिताः चक्रीत्वंचतुराननःशिववपुश्रेयंहरि
त्वालिंनोमूर्तिस्वाकृतकृत्यतांनयपरंश्रीदाव्य
याभूरयन ८० समासोक्तिरियम ॥

पेणवाच्यात्वेयं तथामूर्त्यादेहेनपुनातीतिपवनः त
द्दर्शनेनान्यायनिवारणात तथाश्रुतौवेदेकृतान्तः
कृतनिश्चयः अथवाश्रुतौप्रवृत्तिश्रवणेकृतनिश्चयः
वार्तायांनिश्चयेनप्रवर्तसे नतुसंदेहसंशयेनप्रवर्त
सेइत्यर्थः तथासम्यकप्रजाहरीत्यापालिताःप्रजास्त्वंपु

एणजनं पवित्रजननं तथा प्रचेतसं प्रकृष्टचित्तं चालम
तिशयेनाह्नः धर्माचौर्येपुरस्कृत्य प्रजाः पालयसीत्य
र्थः तथा त्वं चक्रीसदेशः ससेनः चक्रधारी चासि त
था चतुराननः चतुर्वाक् आननशब्देन तद्व्यापारो ल
क्ष्यते तथा शिववपुः शिवं भद्रं वपुर्यस्येति इत्थं दिक्
पालिनीं स्वां मूर्तिं कृतकृत्यतां नय कृतकृत्यतामाह
श्रीदाख्ययाश्रयन्निति श्रियं ददातीति श्रीदा सा चा
ख्या च आख्याति तया आश्रयन् लोकानाप्याययमानः कृत
कृत्यो भवेति अथ च समासोक्त्या दशदिक्पालेशत्वमा
ह जिष्णोरिति भो रिंद्रत्वं धनञ्जयो ऽग्निरसि पवनो वायुः
कृतान्तो धर्मराजः पुण्यजनो राक्षसराजा प्रचेता वरु
णः चक्री चक्रधार्यधरदिक्स्वाम्यनन्तः चतुरानन
ऊर्ध्वदिक्स्वामी ब्रह्मा शिववपुर्गौरीश्वर ईशानदिक्
स्वामी अतएव नवदिगीश्वरः सन् त्वं कृतकृत्यतां दश
मदिक्स्वामित्वं श्रीदाख्यया कुबेरनाम्ना आश्रयन्नय
कृतकृत्यो भवेत्यर्थः ४७ ॥ ॥

पूर्णत्वमिति पूर्णोयमात्मा विशुद्धोयमात्मा शुद्धोयमा
त्मा सत्यं ज्ञानमनन्तं ब्रह्म प्रकाशकोयमात्मा अद्वैता
नंतोयमात्मेत्यादि श्रुतिमूलवाक्यानि यानि ब्रह्मणः
स्वरूपतटस्थलक्षणवचनानि तानि फलतः स्फुटं त्वयि
सन्तीति श्रुतेस्तत्त्वमसीति तत्त्वंपदयोर्विरुद्धांशत्यागेनै

पूर्णत्वं सकृते न ते विमलया बुद्ध्या विशुद्धो भवा
ञ्छुद्धः कायमनोवचोभिरपरं किं सत्यता ते व
पुः आख्याशा सचते प्रकाशक इतीशाद्वैत
तानंततादानेनाद्यगुणैर्ज्ञातं त्वयि परं मन्येप
दैकं श्रुतेः ४८

कं यत्स्यापितं तत्त्वयि सत्यमिति
मन्ये तत्त्वमसाधारणं रूपं स्वरूपं स्वरूपमेव लक्षणं
स्वरूपलक्षणम् कादाचित्कत्वे सति व्यावर्तकत्वं तट
स्थत्वम् एतद्द्वयोः तत्कं च किमपरमिति प्रोक्तमेव स्व
रूपतटस्थलक्षणम् अत्रार्थद्वयोर्न्तरं तत्त्वमसीति म
हावाक्यार्थो लासाश्लेषमूला समासोक्तिः ४८ ॥

योदात्तेति उदात्तोदारा उदात्तस्वरा वा तथा गुणानां श
मदमादीनां षड्गुणानां वा वृद्धिस्तया सङ्गतिर्ययो चित्तम
मात्रमणफलर्द्धिस्तया युता सम्बद्धा तथा सद्वर्णरू
पान्विता सदभ्यर्चितं शुद्धं वर्णानां चतुर्णां रूपं स्वरूपं ते
नान्विता वर्णानां स्वस्वधर्मे व्यवस्थापिकेत्यर्थः अथवा

योदात्ता गुणवृद्धिसङ्गतियुता सद्वर्णरूपान्विता
सत्समस्वङ्गतया विभूषणवती सज्ञातकर्मोज्ज्वला
प्रद्विष्टस्वपुपसर्गसङ्कुलगतिः संयोगिनीसज्ज
नैसेव्यपाणिनिप्रक्रियेव जयतान्मूर्तिस्त्वदी
यामला ४९ श्लेषमूलोपमा तन्मूला च समासो ॥

सम्पूर्णो भवः प्रशस्तो वर्णो वर्णरूपः क्षत्रियवर्णस्तेनान्वि
ता तथा समस्तस्वाम्यमात्यसुहृत्कोशराष्ट्रदुर्गबला।
नि च राज्याङ्गानीति तेषु समस्वङ्गतया अङ्गसंस्तया विभू
षणवती तथा सतां सुजनानां धातृत्वं वा तपि सत्कर्मका
नां कर्मणां यथावा सतां स्वस्वफलर्द्धिशालिनां धातॄनांम

हाभूतानां कर्मणोज्ज्वला तथा प्रद्विष्टस्वशत्रुरूपसर्गेण
बाधेन सङ्कुलागहनागतिर्यस्याः सा तथा सज्जनैः साधु
जनैः संयोगिनी नित्यसंयोगा सेव्यं तवतनुः पाणिनिप्रक्रि
येव जयतात् साप्युदात्तेति उदात्तादिस्वरवती उदात्तेत्य
नुदात्तस्वरितयोरप्युपलक्षणं तथा गुणवृद्धीपतदाख्ये
हेसंज्ञे अदेङ्गुण इति वृद्धिरादैजिति च ताभ्यां सङ्गतिः
सम्यग्गतिस्तया युता तथा सतां सिद्धानां वर्णानां रूपैः
प्रकृतिप्रत्यययोजनात्मकैः प्रयोगविशेषैरन्विता वर्णा
नां च सत्यत्वपवसिद्धे शब्दार्थसम्बन्ध इति वचनेन मह
भाष्यकारेण स्थापितः तथा समस्तस्वादिषु सुप्प्रत्ययेन्तं
सु विभक्तिविशेषेषु सङ्गतयैतदाख्य संज्ञाभावेन विभूष
णवती अलंकृता सम्यक्षिति प्रथमतयान्येषामप्युपल
क्षणं प्रत्ययानाम तथा सतां सद्धिःस्नानां धातूनां शब्द
योनीनां कर्मभिराख्यातपदकृदन्तपदैरन्विता तथा
प्रद्विड्विस्नुपलक्षणं वहुवचननिर्देशात्सर्वत्रैवमादौ
विषये उपसर्गैरुपसर्गाः क्रियायोगे गतिश्चेत्युपसर्गैः

संकुलार्थगहनागतिर्यस्याः तत्तदर्थविशेषद्योतकत्वा
दुपसर्गाणाम् तथा सज्जनेश्वपलक्षणम् एवमादौ स
र्वत्रविषये संयोगिनी ह्रलोनन्तराः संयोग इति ४९
सर्वैर्ह्यदोलक्षितमिति संयोगे गुरुरिति सर्वत्र प्रसिद्धेः आ
ह्लादिनी विस्मयकारणं प्रथममपि गुरुस्तत्रापि संयो

धीमंश्चित्रमदो न वैत्तव गतः संयोगमप्येलघु
र्यात्येवाशु क्रियासमयस्त्व गुरुतां सर्वैर्ह्यदो लक्षि
तं आपद्भारसमाश्रितोप्यनुचितो यैर्भङ्गभाग्य
द्गुरुस्तत्संयोगमुपेत्य याति लघुतां चर्येयमाह्ला
दिनी ५० ॥ समासोक्तिरियम् ॥

गमेप्यलघुतां यातीति ५० आधार इति निखिलेति
वाच्यवाचकात्मकशब्दार्थप्रवाहवैशिष्ट्यहेतुः विशे
षत्वावत्त्वविशेषत्वावाविशेषत्वावेत्यर्थः तथा सत्क
र्मणां सत्क्रियाणामनेकभावेषु विविधाभिप्रायेष्वनुग
तायासौ मतिरतीतानुस्मृतिलक्षणा तयामतोयोः भेद

त्सम्बन्धानेदत्ताविविधसत्कर्मप्रवीणापि पर्यन्ततो
हेतुसम्बन्धानचत्त्वरेत्यर्थः तथा शम्भौ त्रिनेत्रे चन्द्रकलाज
टाकलापशोभितशिरस्के नित्याभियुक्ता सदा तदेकप्र
वणा तथा दोषराशेर्भूषिता गगनकुसुमभूरायाप्यसि
द्धलक्षणा तथा समाङ्गदृष्टा सत्तमिरङ्गैः शास्त्रकैर्द्दष्टाय

आधारः सद्गुणानां निखिलपदपदार्थौघवैशिष्ट्य
हेतुः सत्कर्मानेकभावानुगतमतिमता भेदसंधा
न दक्षा शम्भौ नित्याभियुक्ता गगनकुसुमभूर्भूषि
ता दोषराशेर्जीयात्साङ्गदृष्टा कणभुनिमतवत्
श्रीमहाराजमूर्तिः ५१ तर्कमताश्रयेणोपमा
मूलासमासोक्तिरियम् ॥

श्रिता सेयं श्रीमहाराजमूर्तिः कणभुनिमतवत्कणाश
देनोपलक्षितो यो मुनिः कणाद इत्यर्थस्तन्मतिवत्तन्म
तमिव साच आधारः सद्गुणानामिति गुणाश्रयो द्रव्य
मिति द्रव्यपदार्थः सद्रूपेण च गुणानां स्वयं स्वरूपस
म्बंधोतितं नैयायिकमते द्विगुणाः संतो न भिन्नवत् प

तयासदृशान्यायामन्तव्यागुणकल्पना तत्राप्यभिन्नयो
र्भेदः कल्प्यते गुणतद्वतोरितिकल्पनामात्रसारा तथा
निखिलपदपदार्थैश्च वैशिष्ट्यहेतुरिति विशेषाधान
हेतुर्गुण इति गुणपदार्थः तथासत्कर्मेति चलनात्मकं
कर्मेति कर्मपदार्थः अत्रापि सद्ग्रहणं कर्मपदार्थस्य क
ल्पनामात्रतानिरासार्थम् तथाच भिन्नः कल्पनामात्र
तामस्याह भेदारोपणरूपैव गुणवत्कर्मकल्पना तस्य
व्यतिरिक्ताद्विनक्रियानामकाचनेति अनेकभावानु
गतमतिमतेति नित्यमेकमनेकानुगतं सामान्यमिति
सामान्यपदार्थः अत्रापि सदित्यनुवर्तनीयं भिन्नः कश्चित्
कल्पनामात्रत्वनिरासाय तथाच भिन्नः जातिजातिम
तोर्भेदो न कश्चित्परमार्थतः भेदारोपणरूपा च जायते जा
तिकल्पनेति शंभौ नित्याभियोगेति नित्यसंबन्धः सम
वाय इति समवायपदार्थः भेदसंधानदक्षेति अन्यद्रव्य
वृत्तयो विशेषबुद्धिहेतवो विशेषा इति विशेषपदार्थः ग
गनकुसुमभूरिति अभावपदार्थोपि व्याख्यातः सप्ताङ्ग
दृष्टेति सप्तभिः पदार्थैर्दृष्टा ५१ ॥ ॥

सत्यदेति सतां साधूनां परिहतानां वा पक्षः तस्याश्रय
णयात्र दृष्टां दोषवतीं स्थितिं न गता साध्येण समा
नपक्षतया मित्रभावेन वा सङ्गता मिलिता विपक्षाः श
त्रवः बाधवन्धो निर्बाधः प्रतिपक्षसङ्गतिः द्वितीयसव्य
ह्यचारिसङ्गतिः तत्स्वपाया भूर्दशातस्यायाः सन्नाद्विती

सत्पक्षाश्रयणात्कदापि न गता याडःस्थितिं सङ्ग
ता साध्येण विपक्षनिर्दलनभूर्याबाधवन्ध्याश
या याऽसन्नाप्रतिपक्षसङ्गतिभवः सा सर्वभावा
न्विता जीयात्रेमतिरर्थसाधनपरा वागौतमर्षे
र्येया ५२ ॥

यसजातीयसङ्गत्यसहा सर्वभावः सर्वाभिप्रायः सर्वे
षांभावो वा तेनान्विता अतएवार्थसाधनपरा अर्थाः प्र
मर्यास्तेषां साधनेतत्परा इत्यमेव गौतममहर्षेर्वाक् य
या साच सत्पक्षाश्रयणादिति सन्दिग्धसाध्यवान्पक्ष
इत्येवंपक्षाश्रयणाद्दुःस्थितिं न गता पक्षस्यसत्त्वात् तथा

प॰सं
३१

सापक्ष्येण निश्चितसाध्यवान्सपक्षः तस्यभावःसापक्ष्यं
तेनसङ्गतासंबद्धा तथाविपक्षनिर्दलनभूः निश्चितसा
ध्याभाववान्विपक्षः तस्यनिर्दलनभूः विच्छेदहेतुः या
चवाधवन्याशयाःवाधितविषयत्वात् तथायाचप्रति
पक्षसङ्गतिभृत्वेःसत्ताःसत्प्रतिपक्षाचेत्यर्थः इत्थंचपक्ष
सपक्षविपक्षावाधितविषयत्वासत्प्रतिपक्षत्वाख्याःपञ्च
भावाबोध्याः तथार्थसाधनपरा अर्थानांषोडशपदार्थानां
साधनेनलक्षणकरणेनपरःप्रकृष्टार्थोयस्याः प्रमाण
दिषोडशपदार्थतत्त्वज्ञानेनहिनिःश्रेयसाधिगमइतिगौ
तममतम् ५२ संविदिति संविद्युद्धंतस्यैवव्याख्याना
त्सूक्ष्मास्तत्रभरोतिशयस्तेनोद्गुरोन्नद्धोचेति तथासत्कृति
नीपुण्यवतीवर्णाश्रमाचारपालिनी ततश्चस्वधर्मसज
त्वमेवसंविदित्यनेनस्वीकृतम् नहितत्त्रियस्यस्वध
र्मेयुद्धंविहायान्यच्छ्रेयइतिभरोद्गुरेत्युक्तम् इतिवर्णाय
मेसुक्तास्त्वन्यर्थमाह सल्लिङ्गेति सदिति सन्मात्रंस
र्वीगकल्पनारहितंनिरवयवंसर्वलयहेतुश्च निरवय

वत्वेपिचिह्नमात्रंलिङ्गंनभिदेश्वरादितश्चभावोभक्तिर्भज
नंसर्वात्मनातदेकात्मीभवनंतेनोभिताशोता तथाभि
षाहृदयंगमायाउदाहृतयउदाहरणानिसदृष्टान्तानि
स्तवनानितैःशालिनीनानास्तोत्रचर्याशालिनीत्यर्थः
अथवाभगवतोलिंगस्यस्थापनार्थंयानिमिष्टानिनिर्दे
शाएपुदकानितेषामाहृत्याशालिनीगङ्गाजलाहरणशा

संविद्व्यभरोद्गुरासत्कृतिनीसल्लिङ्गभावोभि
ताभिष्टोदाहृतिशालिनीसमनसांप्रीत्यैविदग्
धाचया संसिद्धोपनयोज्ज्वलानिगमयुग्भावो
भिताराजतेसाशुद्धावयवातनूर्जयतनेगीर्गौ
तमर्षेर्यथा ५३

लिनीत्यर्थः श्र तएवसुमनसांदेवानां
प्रीत्यैविदग्धाशाया मूलसेचनेनैववृक्षशाखालिङ्ग
पूजयासर्वादेवताअर्चिताभवन्तीत्यर्थः तथासम्यक्सि
द्धउपनयोवेदोक्तःसंस्कारोयस्यावेदोक्तसंस्कारशुद्धेत्य
र्थः अतएवोज्ज्वला अतएवचनिगमयुग्वेदोक्तार्थसङ्ग

प॰सं
३२

ता नह्यनुपनीतस्य वेदाध्ययनाधिकारोस्तीति इत्थंच
भावान्विताभावेनतात्पर्येणान्वितासारासारविवेकच
तुरा सेत्थंभूतातनूः शुद्धावयवासर्वांगानवद्यातवज
यतात् गौतमर्षेर्वाग्यया सापिसंविद्धन्यभरोद्धुराऽसंवि
द्वयः प्रतिज्ञाबंधः साध्यवत्तयापक्षवचनंप्रतिज्ञा तस्या
भरेणोद्धुरार्थसिद्धौप्रतिज्ञात्रीत्यर्थः तयासद्धेतिनीस
द्धेतिनी तयासल्लिंगभावोभिता सच्चतल्लिंगंपञ्चम्य
न्तंतृतीयान्तंवालिङ्गःप्रतिपादकंहेतुरित्यर्थः तस्यभावे
नान्वयेनोभिता तथादृष्टांतवचनमुदाहरणमुदाहृ
तिस्तयाशालिनी अतएवसुमनसांपण्डितानांप्रीतेरी
दृग्या तयासंसिद्धोपनयापक्षेसाधनोपसंहारउपन
यस्तेनसंसिद्धातएवोज्ज्वलाच तथानिगमएकपक्षेसा
ध्योपसंहारोनिगमस्तस्मात्तथेतितेनयुक्तास्तीति अत
एवभावान्वितेति भावेनान्वयव्याप्त्यान्वितासाहचर्य
नियमोव्याप्तिः अन्वयेनव्याप्तिरन्वयव्याप्तिः अतएवच
शुद्धावयवायथावदवस्थापितपंचावयवा प्रतिज्ञाहेतू

दाहरणोपनयनिगमनानिपञ्चावयवाइतितार्किकाः
इत्थंसर्वथाश्लाघ्यामूर्तिंश्रीमहाराजंसमर्थ्यतस्यरक्षा
माशास्तेकविः व्योमान्तइतियुगलकेन साभारतीएनं
महाराजमवतुरक्षतात् भारतीरक्षणमेवहिसर्वथा

व्योमान्तेनवनावलीप्रथमगारात्तांध्वजश्रीर्न
वाशैलान्तेननदीचवादिमुखगानोन्यायरत्ना
वली हर्म्याग्रस्थितिभागिनीनचसुधानाकेंद्र
मूर्धोपगानोशोभावतुकाप्यसौसुविमलाप्यन्त
र्हिताभारती ५३ सस्यादिस्थितिशालिनीनच
शारत्सुपुष्करान्तस्थितानोवापुष्करपालिकाप्रथ
मगास्वर्गेनचैंद्रीकला भूतीशाङ्कगतानचापि
गिरिजायासौचतुर्वर्णापादेवीवर्णमयीसुधां।
शुविमलापायान्महाराजकम् ५४ ॥

महतांरक्षा सत्यावागमहत्तसेवास्थाने ऽसत्याविषंस
तेतिवचनात् कासौभारतीव्योमान्तेसतीनवनावली
तथायाचरात्तांप्रथमगाग्रवर्तिनीनचपताकाशोभा।

तथायासौशैलान्तेनचनदी तथायाचवादिसुखेगात
चन्यायरत्नावली याहर्म्याग्रस्थितिभागिनीनचसुधा
मकोलः याचनार्केंदुमूर्योपगा नचशेषाउष्ममाला
सासौसुविमलाश्वेतवर्णायचहस्तकदाम्पन्तर्हिताद्वै
वस्त्रोकेकृतपिहितस्थितिरंतर्हितास्ताशयेदिनकारि
णीरक्ततात् सेयंमरालवाहनेतिसिद्धं ५२ ससादी
ति अत्रापिप्राग्वत्कल्पना अङ्कःउत्सङ्गोमध्यंच चतुर्व

माथवार्चाक्रमामारमामाभात्तमात्तमा मा
त्तमापाभ्रमावामामावामाभूत्तवाथमा ५५ क
मलवन्धोयं ॥

णीपाचातुर्व णीपालयित्री अथचच
तुर्वर्णापाचतस्रस्ततस्ररस्त्रिश्रीचतरस्तरस्वरूपा वर्णमयी
वर्णप्रचुरा सर्वांसुविमलाचंद्रधवला सेयंसरस्वतीति
सिद्धं ५८ इत्थंगूढसारोसमुचितोपयोगूढकलनयो
पयीकृत्याथेदानीसाक्षादेवस्वोचितामुपयोगाहयि
तंकमलोपयोगंतावदुपहारीकरोति माथवेति अत्रा
र्थः सोराजंस्त्वमालक्ष्मीरथमाः थमचरित्रायमपात्र

गामिनीयर्थियायापातालतलगामिनीरिपुकरवशगा
माभूत् अपितु उत्तमपात्रगामिनीसफलयायाससक
दाचभूयादित्याशीः माङिलङ् आशीरर्थेलङ् इतिचा
विवक्षितार्थनिषेधेविवक्षितार्थप्रतीतिराशीर्विभक्त्ये
वापततीतिबोध्यम् कथंभूतासौमा माथवार्चाक्रमा
भगवत्पूजासक्ता तथामारमामारेणपुत्रेणकामेन
रमतेशोभतइति तथाऽमाभाःऽकाशनिर्मला तथा
त्तमात्तमापृथिवीसहा तथाभ्रमाकाशगामिनी त
थावामालाल्पमानापिस्वभावचलत्वाद्विपरीतबुद्धिः
तथामावामीयतेलक्ष्यतेनयेतिवनिष्प्रत्ययान्तः अथ
चयसौमाकेव वामावामहेलासदृशी साचत्वद्गय
माकुलकलङ्कावहामाभूत् महेलासच्चरित्रास्थिताहि
गृहस्यस्थितिरिहामुत्रसत्फलदा साचकथंभूता य
वार्चारताभर्तृपूजातत्परा तथामारमार्याइवेनैवका
मक्रीडयारमतइति तथाऽमामाःऽमेयाभाअमेयकांतिः
तथाऽत्तमादैरिन्द्रियैर्मियतेप्रणिददातीति अथवात्त
गृहस्थवद्दारंमातीत्यत्तमा तथात्तमागृहभारसहाविम

दसहावा तथामात्तमापामांलक्ष्मीमत्तति व्याप्नोतीति
मात्ता तथामांलक्ष्मीपात्यवतीतिमापामात्ताचमापाचे
तिमात्तमापेतिकर्मधारयः तथाऽभ्रमाभ्रांतिरहिता
शब्दालङ्कारार्थालङ्कारश्लेषोपम ५५ गुणेपति भोगी
णाराधन गुणिनोवाह्यान्तरसंयमिनोयोगिनः शा
मदमादियुताः अथवाविद्यादिगुणवन्तः पण्डितास्ता
नाराधयतीतितस्यामन्त्रणम् तथावन्दारवोभिवाद

गुणाराधनवन्दारुरुग्भङ्गामलचित्त्वग्र गुरु
तांत्वांभजन्तोगुर्वीशानहिकेनराः ५९ ख
(ञ्जबन्धोयम् ॥

काः शरणागतास्तेषांरुजोभन
कीति अन्यत्रापीतियोगविभागाद्भञ्ज तस्यामन्त्रण
म् तथामलाश्चित्राश्चगावोवाचोयस्यतस्यामन्त्रणं
संज्ञापूर्वकविधेरनित्यत्वाद्गुणाभावः केगुर्वीशाम
हाशानरास्त्वांभजन्तोगुरुतांगौरवंनागुर्नेगताः न
शाम्नाअपितवङ्ङजनेनसर्वैपिमहत्त्वमाप्ताइत्यर्थः अ
यंखङ्गबन्धः प्रस्तारेणद्रष्टव्यः ५९ ॥ ० ॥

भाराम इति अयमर्थः हेऽमत्र अमोरोगोमवाधिः तस्मा
त्रायते इत्यमत्रः तथामदंदमदंयतिखण्डयतीतिमददः
तथाऽकामप्रकंडःखमस्यतीतिकामः तदेतदामन्त्रण
पदत्रयम् अनेनचसंबोधनत्रयेणत्रिविधडःखनिहं
तिसार्थनाफलिता योभक्तोनाप्नुमात्राकेशलत्तणेच
न्द्रशिरसित्वयिसमतिंनिर्मलधियंसमंयथास्यात्तथाद

भारामोमत्रमददाकामस्तेलोविमार्गेणे के
नामस्तलयोयात्नतिंशोषसस्तनत्तमा ५८
सुमतिंसममादायामलेरकेशलत्तणे यो
मार्गत्रस्तशोकासोनाभातेसविदन्नन ५८ च
(तुरङ्गाश्वबन्धोयम् ॥

य अयमर्थः समंनिश्चलत्त
स्यात्वयिशंभौसुमतिमादायनिधायतेनतिंप्रणतिमया
तप्रगात् केनागादित्याह केनमस्तकेनशिरसाकथं
भूतेनमस्तकेननत्तमा नमतेइतित्तमविभक्तः ततो
नञासमासः नत्तमाःसहेनात्मन्नतेन यःकथंभूतः
अमार्गत्रस्तशोकासुः त्रसनंत्रस्तंभावेक्तः भीतिः शो

प·सं
२५

कःप्रसिद्धःअमोरोगःएतेमार्गेयस्य तथामलःकुटिल
चित्तः तथाभारामोभानेभाः तेनारमतेभारामः तथाः
मस्तलयः मस्तपरिणामोजरादिलक्षणःलयोलय
नंनाशः तावविद्यमानौयस्येत्यमस्तलयः विभूतपा
प्माह्यसौदिव्यतनुश्चास्याजरादिदोषनाशरहितोभवती
ति तथाशोषणंशोषस्तेनशशातिस्मतंगच्छतीतिशश
स्ततगतावितिधातुः भवध्यानमग्नत्वाद्देहेन्द्रियादिशो
षणस्मन्नइवजडइव सम्माननापरांहानिंयोगर्द्धेः कु
रुतेयतः जनेनावमतोयोगीयोगसिद्धिंचविन्दति हि
रण्यगर्भवचनंविचिन्त्येत्यंमहामतिः जडोन्मत्ताकृति
रभूज्जडःस्वच्छाशयस्तदेतियोगनीत्यान्तरमलोपिवा
ह्यशोषशश्र ३इतिसंबोधने तथाःविमार्गेणःवैरवे
रविमार्गस्यमार्गेणोलःप्राकृःइतिशंभुपदे अथचदेः
मत्र हेमदद हेआकाशहेसोषस अविद्यमानामाये
षांतेमाः निर्लक्ष्मीकादीनानाथादयःतांस्त्रायतेश्च
मत्रः तथामदनंमत भावेक्तिप्रअदतीत्यदःमदोमद

दःमदग्रासकोनिरहङ्कारः अथवामत्रमददेत्येकमा
मन्त्रणपदं अमारोगास्तांस्त्रायन्तइत्यमत्राणिपापक
र्माणितेषांमदहोमदखण्डकः हेआकाशअलेपाव
काशदानवैशद्यादिनाकाशारोपः आकाशवदलेपाव
काशदविशदचतथाहेसोषस ऊषणम्मषः अनर्थे
कविधानमितिकः ऊषादाहःसद्दोषेणदाहेनोषणा
वर्तन्तेइतिसोष्माणस्तान्स्यायतिपैदेतीतिसोषमः हे
जैषैत्वयेइतिधातुः अथवाशोषणंशोषःतंस्यायतीति
प्राग्वत् समदशामकःदैन्यशमकोवा तस्यामन्त्रणायः
पूर्ववत्वारिर्विमार्गेणेविरुद्धमार्गेणेविरुद्धानुष्ठानेन
लक्षितितिस्निह्यतीतितेलःसस्नेहः अतएवभालामो
भालेमस्तके अमोरोगोङ्कःलक्षणंयस्यविरुद्धानुष्ठानि
त्वान्नयाधिदिवमः सन्कृतललाटाङ्कः अतएवामस्तलयः
आसमंतान्मस्तःपरिणतोलयोयस्य लयःस्वरूपगोप
ने अतएवचमार्गत्रस्तप्राः प्रासयन्तीतित्रस्तास्त्रसाभीवि
तणपर्यात्रसेःकुः त्रस्ताभयदायिनोमार्गेत्रस्तामार्गात्र

प सं
२९

स्ताः शाय्यते तनूक्रियते इति शः कर्मणि डः मार्गात्तस्तै
स्तनूकृतो मार्गात्तस्तशः अतस्त्वाकामो केनामोगतिर्य
स्यासावकामः इत्थंभूतोपि प्रारब्धभोगवशादमरेण
मृतः संस्त्वयि राकेशलक्षणे चन्द्रशीतले समं सलक्ष्मी
कं यथास्यात्तथा त्वयि समतिं शोभनां मतिं मननमनु
मतिं स्वामिभृत्यभावलक्षणमादाय अयमर्थः इत्थं
भूतोसावरिः ऊर्ध्वापि चालब्धस्थितिरागतपरिशिष्टां लक्ष्मी
कथंचित्समुच्चित्य सलक्ष्मीकं समतिं त्वय्यादाय स
अतिशयेन नन्नमाः समर्थैर्नन्नमितेन केन शिरस्ता न
तिमयात्स विदं त्वन्माहात्म्ये त्वानापुरुषोननाभाति
अपितु आभाते तं च शरणागतं भवान्पुनरपितत्थैवा
धिकारयतीत्यर्थः इति देवविजयित्वं तवेति फलितोर्थः
अत्र वा भाते इति विमार्गेण समतिमादायेति च तिपूर्व
त्वात्कर्मव्यतिहारे आत्मनेपदम् इति निरवद्यम् अत्र
स्फुटप्रतीतये ङ्कुररचना क्रियते येन द्वात्रिंशतोक्षरा
णामनुलोमप्रतिलोमविधिना चतुःषष्टिकोष्ठेषु प्रस्ता

रितानां तान्येव द्वात्रिंशदक्षराण्यपरश्लोकतया समा
यातानि स्फुरितानि चतुरङ्गाख्यप्रस्तारः यथा भा ५९ रा ४२
मो ५९ म ३७ न्न ५२ म ४। द ६२ हा ३५ का ५५ स ३९ ते ५९ लो
४२ वि ६। मा ३८ र्ग ५। णा ५८ के ४३ ना ५७ म ३६ स्त ५३ ल ४९
यो ४९ या ६० न्न ६३ तिं ३५ शो ५६ ष ६५ स ९० स्तु २३ न ९६
द्व ६७ मा ५० इत्यनुलोमक्रमेण अथ प्रतिलोमक्रमेण
मा ८ द्व ५५ न ३२ स्त । स २८ ष । ३ शो २२ ति ३० न्न ३ या ८ यो ।७

वर्त्यतामतिरीशानेनेकपानेकनायक कथंद्व
यत्वयासिद्धिर्विनेषान्नुग्रहेतव ५९ ॥ चतुर्भिर्योयम्

ल १६ स्त २ म २ ना २५ के २२ लो १६ र्ग २९ मा ६ वि २६ लो १० ते ३३
स ६ का २२ द्वा २८ द्व ३० म ६ न्न २० म ४ मो २६ रा ।। भा २९ रलयो
ईलयोश्चैव शासयोर्वबयोस्तथा वदन्त्येषां समानत्व
मलङ्कारविदो जनाः ५९ वर्त्यतामिति हे नेकपानेक
नायक अनेकपा हि पास्तेषामनेकं सेनाद्यटातस्याना
यकराजंस्त्वया मतिस्तत्कालग्राहिणी मनीषा ईशाने
परमेश्वरे वर्त्यतां प्रवर्त्यतां प्रयुज्यतां यतस्त्वत्तद्वर्तिने

प·सं
३०

ईशानुग्रहं विनान्यथान्यप्रकारेणद्वयीभोगापवर्गल
क्षणासिद्धिः कथंस्यात् तेनैवेह भोगान्भुक्त्वामुत्रापव
र्गं प्राप्स्यसीत्यर्थः ८९ इत्थं श्लोकनिकासमर्थ्य मदित
मनस्कं राजानं प्रतिसानुमोदं संज्ञपयति कुलेनेति
शीलं सद्वृत्तं श्रियः सम्पद्धनं सर्वथा पूर्णत्वं दानोपभो
गादिना च सहायः अन्यथा सत्या अपि तस्या असत्क
ल्पत्वात् तथा च दानोपभोगशून्येन धनेन धनिनो य

कुलेन शीलेन समृद्धया श्रिया सुभक्तियोगेन
गुणैरलङ्कृतः यदेष एकोस्त्यधुनात्र भूपतिः
फलत्यसौ धर्मलताग्रजन्मनाम् ९० ॥

दि भवामः किं न तेनैव धनेन धनिनो वयमिति सुभ
क्तियोगेन देवमुनिगुर्वादिविषयेन गुणैर्लब्धप्रश
मनादिभिः तेच पौरजनपदयोर्यथानामनुग्रहेणाप्र
रक्षणेषुप्रमादः तलामानभाण्डवृद्धिः अर्थवाव
स्थापनं समयग्रयो विन्नप्रवृत्ति रन्नुचितनिवृत्तिः स
त्करणदानं चेति गुणवन्त्यादयो वा षड्गुणाः वाद्यान्त

रक्षाद्यास्तैः समन्वदेत्यर्थः अलङ्कृतो भूषितः पर्याप्तिं नी
तश्च ईदृशः प्रशस्यतमो गुणसावधुना कलियुगेपि अत्र
भारतभूमौ एको मुख्यो भूपतिरस्ति असौ अग्रजन्मनां
ब्राह्मणानां धर्मलता फलति ब्राह्मणैः सच्छीलामृत
सेकेन समारोपिताया धर्मलतायाः फलमसौ भूपति
रित्यर्थः ९० अधुनास्य प्रवृत्तिमज्ञा वेदयति अस्येता

अस्यापरेषु तनयेषु गुणाकरेषु सत्स्वप्ययोस्ति
रणवीरतया प्रतीतः विश्वासभूः पितुरसौ
स्वशितयाम्बुस्सद्दत्तशेखरशिवांशवयेसुरमा ९

दि अस्य श्रीमहाराजस्य अपरेषु अन्येषु अथ च तनये
अपरे स्वकीया इत्यर्थः गौणपुत्राणामपि पुत्रत्वव्याप
देशात् औरसो धर्मपत्नीजस्तत्समः पुत्रिकासुतश्चेत्या
दिना द्वादशविधपुत्राणामपि पुत्रत्वात् अथवा भ्रात
पुत्राणामपि पुत्रत्वात् तथा च भृगुः भ्रातॄणामेक
जातानामेकश्चेत्पुत्रवान्भवेत् तेन पुत्रेण ते सर्वे पुत्रि

प॰सं
२८

णमनुरब्रवीत इति अपरेष्वपि पुत्रेषु सत्स्वेव तेषु
च गुणाकरेष्विति मानार्हत्वं तेषामुक्तं भूतविभक्त्या
च तेषामर्जितभोक्तृत्वं ध्वनितम् तन्मध्ये योसौ रणवी
रतया प्रतीतोस्ति प्रतीतः ख्यातो भूषितो हृष्टश्च प्रती
तो ख्यातभूषिताविति ख्याते हृष्टे प्रतीत इति च कोशा
त् अस्तीति वर्तमानविभक्त्यास्य स्वबाहुस्फूर्त्तिसम
र्जितभोक्तृत्वमपि ध्वनितम् न केवलं स्वयमेव प्रती
त इत्याह विश्वासभूरिति अमुष्याकगुणस्यापि तद्वि
श्वासभूः प्रतीतिपात्रं ख्यातिभूषितिहृष्टिकारित्वाद्दृ
स्यानिवेदनविषयत्वसंभावनया निराकुलतापादके
लोकानन्यसंपादनार्हतया च सर्वथानुमाणनम् अ
मुष्यराजकुमारस्यासम्पित्तया सहितनया चारुपूर्वक
याशित्तया सन्देशेनानुभाविलक्षणं सरस्यां सर्वथा
प्रोथितं सद्वृत्तशोभवशिखां सद्वृत्तशोभेरेणोपलक्षि
तो शिखामापीरं रचयेरचनया निवध्नामि रचयेइत
नेनापूर्वत्वमस्या निरस्तम् पुराणनिबद्धामेव सद्

वनया सत्याजोपयोगं पाकरिष्येइति रचयेइति वर्त्त
मानसामीप्येतच्चसौकर्य्यं द्योतयति ९१ रचयेइति विव
क्षितमर्थं स्फुटयति यवनेति यवना एतदभिजन
प्रसिद्धा वर्णाश्रमवाह्याः स्लम्तरखुडिशालितया लो
केषु वैयेतिनाम्ना प्रसिद्धास्तेषां लिपिः पारसीकभाषा
तत्या सत्ययेयं निबद्धा यद्यप्यस्य शासनाद्विवलिता

यवनलिपिनिबद्धा शासनान्नस्य धीरा यदपि
विवलितेयं सत्कथा सारशैली तदपि सुमति
गम्यारीतिरत्रास्तिरम्या यदत्र भवतपभासंस्कृ
तालंवनीस्यात् ९२ ॥

संस्कृतरचनया सत्यात्रपावनाय मयानूपान्तरेणप
रिणामं प्रापिता तन्मूलबद्धा संस्कृतभाषालिपिं प्रापि
तेत्यर्थः तथाप्यत्र संस्कृतलिपौ ताटशी विदग्धेकग
म्यारीतिरस्ति यस्या रम्यारीतेरत्र भवतः सात्ताकारेणे
यं यवनलिपिनिबद्धा सत्कथा शैली संस्कृतालंबनी
स्यात् इयमेव संस्कृत विवलितेति भासेत प्रतीतिश्च

स्फुटैवसंस्कृतमूलत्वात्सर्वस्येति अस्याः सौष्ठवमस्मं
भवतीति ९२ तत्रतन्नामकथनपूर्वंनामान्तरकर
णेप्रयोजनवत्तांचसूचयति स्वशीलेति यद्यप्यसौ
कथातत्रयवनलिपौस्वशीलशैलीत्यपरनामाजने
प्रसिद्धा स्वशीलाः सत्स्वभावाः सदाचारास्तेषांशैली

स्वशीलशैलीत्यपराभिधानायद्यप्यसौतत्र
जनप्रतीता तथापिनामान्तरमत्रशोभासा
ड्गुण्यभङ्गिर्नमुदेस्तुकस्य ९३ ॥

त्यन्वर्थंनामास्याः तथापि अत्रनामान्तरमन्यना
मकरणम् अथचनामेतिनिश्चयेनतरंविशेषकर
णंशोभैव यतःसाड्गुण्यभङ्गिः साड्गुण्यरचनाकस्य
मुदेनास्तुअपितुसर्वस्यापिप्रीतयेभवत्येव नामा
न्तरंचसद्वृत्तशेखरमिति ९३ ॥ ॥

इत्यमेनांसमर्थ्यैतत्करणमाशीर्द्वारेणराजकुमारेस
फलयति धीरिति त्रिकंहिसर्वथापुरुषेषुसारमत्रै
वसर्वस्यपर्यवसानात् अथवानेनैवसर्वार्थसाधना
त् धीर्वाङ्कुरीरंचेति तदेतत्त्रिकंसाड्गुण्यसम्पन्नमभू
षयति येनभूषितश्हामुत्रापिपरिषदर्होभवति तत्र
धियोभूषणंतत्त्वविचारः वाचोपिसत्यवचनत्वं मूर्ते
श्चिरस्थैर्येनसज्जनाराधनंलसते तद्धितादिचिर

धीस्तत्त्वलग्नेश्वरतोषयित्रीवाक्सत्यरामज्जन
रञ्जयित्री मूर्तिश्चिरस्याखिलसौख्यपात्रीला
त्रस्ययस्यात्रनियोगपत्री ९४ ॥

स्यापिनद्वैवेति इयंभूषितस्यास्यत्रिकस्यसदर्थपा
त्रतामाह ईश्वरतोषयित्रीत्यादि पृथग्विशेषणात्रि
केसातत्त्वविचारभूषितायाधियईश्वरः प्रसीदति स
त्यभूषितायावाण्याःसज्जनाः प्रसीदन्ति सज्जनारा
धनभूषितायाश्चमूर्तेः अखिलसौख्यानिप्रसह्योप
नमन्तीति ९४ ॥

इत्यंप्रकृतंसमर्थ्याशेषद्धितमाशीर्द्वारेणाशंसते काले
कालेइति अद्दोपरस्परप्रेमणासर्वेपिसदर्थभागिनोनि
न्याश्चभवन्तीतिवाक्यार्थः अप्राप्तप्रापणंयोगः प्राप्तप
रिपालनंक्षेमः तत्रसमाहितधियः तत्रचकर्मनिष्ठ
त्वंहेतुः इष्टवृष्ट्यावपितत्कर्मनिष्ठैवहेतुः तथाचमनुः

कालेकालेजनयतुपरांवासवोवृष्टिमिष्टां
शुद्धात्मानोधरणिपतयः काश्यपींपालयन्तु
किन्त्वाण्यत्सरलमतयोब्राह्मणाः कर्मनिष्ठा
योगक्षेमावहितमनयः सन्तुपर्द्धैर्भवन्तु ९५

अग्नौप्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते आदित्याज्जा
यतेवृष्टिर्वृष्टेरन्नंततः प्रजाइति तत्रचधरणिपतीनां
शुद्धात्मनाकाश्यपीपालनम् इत्यन्योन्यंहेतुहेतुम
द्भावेनोपकार्योपकारकताफलिता तत्रसर्वत्रचभू
पतिशुद्धचित्ततामूलम् ९५ ॥ ◌ ॥

भाविविस्तारविह्वलताशान्त्यर्थमाह तत्रादाविति न
ह्यतिगहनेप्रथममेवसङ्केतादिनाविदितप्रायेप्रविश
तांबुद्धिसङ्कोचोजायतेइतिभावः नाममात्रेणवस्तुसं
कीर्तनमुद्देशः तेनचबुद्धिस्थितेवक्ष्येक्रमेणलक्षणं
सुकरंभवतीतिपश्चाल्लक्षणग्रन्थनिर्देशः नचन्यायव
दिदमनुमानैकगम्यं येनपरीक्षाग्रन्थोपयोगःस्तुदे
शलक्षणात्मकत्वेनद्विधास्यशास्त्रस्यप्रवृत्तिः तत्राद

तत्रादौसत्कथासंक्षेपंद्वारैरुद्दिश्यतेस्फुटं य
तःप्रविशतांबुद्धिवैक्लव्यंनैवजायते ९९

विद्योद्देशः प्रथमाध्यायमुखेलक्षणंतिद्वतीयेकम
ध्यायेष्वितिभावः ९९ तदिदमियत्पर्यन्तंभाविकर्त
व्यजातंसमर्थ्याथकथाशैलीमारिप्समानः स्वात्मनि
गौरीप्रसादमाशास्ते अन्तीवेति इयंगौरीविशदवर्णि
त्वाद्गौरी गिरीशार्धंगतेत्यनेनशिवान्तररहस्यवेत्तृत्वं
द्योतयति इयमिति सर्वान्तर्यामित्वात्सर्वप्रेरयित्रीगिरं

गीर्विलासंददातमहामितिशेषः कासावितिविशेषण
मुखेनपराशक्तित्वमस्याः सूचयति यत्पादनतोतीवस
भ्रयःस्यात् तथायत्पादनतः कतीवचतुरवाचोवदन्न
नोभवेतअपितुभवेदेवेतिपरस्परविरुद्धकमलासरस्व
त्युभयपात्रत्वंगौरीप्रसादलभ्यमित्यतिडचिटकारितंप्र
सादस्यसूचितं अथचतथायत्पादनतोनिश्चितंपंचास्यः
सिंहस्तद्वद्भाषतेइतिपंचास्यभाषी अत्युद्धतप्रभाववाक्ति

अतीवयत्पादनतोरमाश्रयःकतीववाचश्चतुरा
ननोवदन् पञ्चास्यभाषीभवतीवनिश्चितंगि
रंगिरीशार्धगताददात्वियम् ६० ॥

भयः सन्नुच्चैर्गर्जतीत्यर्थः अथचरमाश्रयः सन्नतीवश्र
इवाचरतीति अतिसर्वप्रातिपदिकेभ्यआचारेक्विब्वाव
क्तव्यइतिक्विपिश्रतीतिरूपम् तथाचतुराननश्चतुर्मु
खः सन्वाचोवदन्करइवाचरतीतिकति तथापञ्चभि
रास्यैर्मुखैर्भाषतेइतिपञ्चास्यभाषीसन्भवइवाचर
तीतिभवतीति ६१ इतिकथासवम् ॥ ❁ ॥

उद्देशग्रन्थमवतारयति तपोथेत्यादिनवभिः तप
स्तपस्क्रिया १ सत्त्वभावत्वंसप्रकृतिता २ दैन्याक्र
न्दनम् ३ भगवच्छरणरीतिः ४ क्षमासहिष्णुत्वंधै
र्यमितियावत् ५ ईशेच्छाप्रसन्नतादेवावलम्बनं ६
स्वयमुपनतेसन्तोषः ७ वृद्धश्रेष्ठानुवर्तनम् ८ बा

तपोथसत्त्वभावत्वंदैन्याक्रन्दनमेवच तता
पितानुमोदश्चक्षमेशेच्छाप्रसन्नता ६८ संतो
षश्चाप्युपनतेवृद्धश्रेष्ठानुवर्तनं बाह्यान्तर
शुचित्वंचविनयोथाप्युदारता ६९ दृढनि
श्चयउद्यंतत्प्रभावोधैर्यावलंबनम् प्रजानांव्य
वहारेक्षाक्रोधादिसहनंतथा ७० ॥

ह्याभ्यंतरशौचं ९ गुरुजनादेकथंवर्तितव्यमितिवि
नयः १० औदार्यं ११ दृढकर्तव्यता १२ उद्यमः १३ धै
र्यकला १४ व्यवहारपालनं १५ क्रोधादिशांतिः १६
पापाद्युपेक्षाचित्तसंस्कारः १७ प्रेम्णापरित्राणं १८ द

प·सं
८२

याल्लता १९ दानमुपकारित्वंचमित्रादिषु २० नटादि
दानमैहिकं २१ उचितमातिथ्यंकृतास्वनम्रता २२ अ
तिदानंन्यासानपह्नवः २३ अंगीकृतकार्यनिर्वहणं
अनुकूलसत्यवादिता २५ परार्थकरणंनैपुण्येन २६
सर्वाविचारपूर्वाक्रिया २७ गूढनीतिक्रिया २८ हृदद

पापाद्युपेक्षाहृद्रागपूर्वकंदत्तवारणं दया
दानोपकारित्वंनटादिस्पर्शनंतथा १९ आति
थ्योचित्यतःस्वस्यमार्दवंप्रतिदानकं अंगीकृ
तार्थसंपत्तिःसत्यवादित्वमेवच २२ परार्थकृ
तिनैपुण्यंविमृष्यकृतितैवच मंत्रनीतिक्रिया
हृद्दीर्घदर्शित्वमेवच २३ स्मरत्वमानौचित्येच
दंडौचित्यक्रियाततः स्वप्नबोधौचितीबुद्धिकौ
शल्यंचगभीरता २८

र्शित्वंदीर्घद र्शित्वंचदेशकाल
व्यवहितार्थानांशास्त्रचक्षुषावबुद्ध्यावासात्कारणं २
शूरता ३० मानसौचितीयथोचितमानस्थितिः ३१ दौं
चित्येनदंडकरणं ३२ स्वप्नबोधौचितीकर्थकियन्तंच

कालंनिद्राकार्यापवंजागरणं ३३ बुद्धिकौशलंशास्त्र
संस्कारादिना ३४ गभीरतागूढविकारता ३५ भूतभा
विशुभाशुभंविचार्ययेनसत्यशेणवाप्ततत्क्रियाप्रवर्त्त
नम् ३६ कृतज्ञता ३७ साधुबुधजनसंगःदुर्व्यसनत्यागः ३८
[illegible] ३९ राजोपकरणेषुयोगक्षेमा

प्रतीतादीत्त्वण्पूर्वसत्यशस्त्रक्रियाकृतिः
कृतज्ञताचसत्संगोव्यसनित्यागएवच ३५
[illegible] स्वा
थ्यत्सेनाहृत्स्वयोगक्षेमावधानता ३९ च
त्वारिंशद्गुणमयीसेयंसन्नीतिभूषिता चित्रास्त्र
वसतीवाहोस्मदेकस्याप्त्नोहृद ३७ ॥

र्थमवहितत्वम् ४० उद्दिष्टंसंक्षिपति चत्वारिंशदिति
सेयंसुशीलशैलीयथोद्दिष्टचत्वारिंशत्प्रवेशोपायम
यी शोभननीतिभूषिता चित्रानानालंकारच्छन्दोवृत्ता
दिनाविस्मयकारिणी इहलोकेकस्यनोमदेयस्तत्र
पितसर्वस्यापि ग्रंथचकस्यवाक्यतेर्बुद्धेणोनोरतिशि

प॰सं॰
४२

रक्षालने नोग्रस्तकाक्वास्येव तत्रोपमा स्वबसतीवय
याम्हयादिभरिताव सतीचत्वारिंशद्धारवती तथासती
नीतिर्यस्यांसासन्नीतिर्हृदावस्थापिताभूस्तत्रोषिताव
स्थापिताविज्ञाचित्रवती यथाकस्मन्देनोस्मात्सर्वश्ला
घनीयाभवति १७ सम्पृष्टत्वादित्रेतन्नितयाहारांमती

सम्पृष्टत्वादनर्घत्वात्सत्प्रीतिजननादपि हा
रोत्तमैर्यस्ताभिर्घटितेयंकिरीटिका १८
तस्माद्विशेषतोराज्ञामुपयोगोत्रजातचित्
अन्येषांवापिदयतांवरत्वंज्ञायतेध्रुवम् १९

त्वारोपस्ताभिर्मणिभिर्घटितेयंकिरीटिकाकृपादृशा
वेदपालस्तुश्च अनुकम्पायामल्पार्थेवाकन् १८ त
स्मात्किरीटिकातात् अत्रास्यांजातचित्कौतुका
यवसरेविवादसमयेच वरत्वमग्र्यत्वेविवादनर
त्वेच १९ ॥

इदानींतस्याएवोर्ध्वोर्ध्वक्रमणेनातिशयंप्रतिपादयति
अयंसइत्यादिना लघुत्वात्कृपादृशाकृशपत्वात्किरीटिका
परंत्वयंरत्नशेखरएवयतोहाराणांशेक्तनीयारत्नतारो
पात्सम्यक्संस्कृतरत्नभूषितः अतएवानघः अतएवस्र
वदिनइति रत्नशेखरस्यचान्तरस्थापनमुचितंशिरसि

अयंसरत्नशेखरःसुरत्नभूषितोनघः सुरत्नि
तोहृदन्तरेऽथमस्तकेविराजते ८० यद्रत्नोपरि
चास्यराजतितरांछायास्वसूक्ष्मालघुर्निश्छिद्रास
रलार्थगौरववतीसुलक्षणगुणाग्राहिणी उज्ज्वास
द्घटनायुतासुललितासद्दीनिवद्धामलासुव्य
क्तासबलामनीषिपरिषत्स्वानन्ददासाशिला ८१

चविराजमानत्वं हृदयन्तरवस्थापितयानयावद्विर्भू
षितशिरस्कोविराजते ८० सद्रत्नशेखरशिखामिति
यच्छिखानमुद्दिष्टंतदपिअवस्थापयति यद्रत्नोपरि
चास्येति प्रत्येकमपिहार्षयाच्छायाभावार्थसमन्वय
त्रूपाशोभाहाराद्दावेवात्ररचनीयातिशयेनराजतिसा

प॰सं
८८

शिखेतिसंबन्धः छायाचप्रतिबिंबरूपा तस्यास्सका
र्श्येनभावम् इति शिखासादृश्यम् तत्रादौप्रकृतो
र्थः शिखालक्षणभावार्थसमन्वयरूपाच्छायाकीदृशी
ससूक्ष्मासारस्यत्वादल्पाक्षरा लघुः प्रसादगुणवती
निश्छिद्राशब्दार्थदोषरहिता सरलामृदुपदार्था अर्थ
गौरववतीओजोगुणवतीसुलक्षणामाधुर्योपेतातपवग्र
ग्राहिणी उच्चामहत्पदप्रापिका संघटनायुता मङ्ग
लानुगुणरचनायुता सुललितासद्रीतिभिर्गौडीयादि
भिःसम्बद्धाःमलानिर्दोषासव्यक्ताव्यंग्यार्थभरिता स
बलातात्पर्यादिसहिता शिखाचछायेवसूक्ष्मा स
दृश्मवंतस्याप्रनर्घत्वं अतएवलघुर्निश्छिद्रानिविड
सरलाःऊर्ध्वाग्रर्थेनमूलद्रव्येणगौरववतीसुलक्षणाःप
रुषागुणग्राहिणी तेननिबद्धाउच्चाउच्चप्रमाणा सं
घट्टनायुताःऽनुगुण्येननिबद्धा सद्रीत्यालघुर्दीर्घ
शिखापक्षेवेत्तयाबद्धेत्यप्रकृतो
र्थः ८१ ॥

स्थमवस्थापितंशिखान्तंविषयेयोजयति सेयमिति
सेयंभावार्थसमन्वयरूपाशिखेवप्रकाशकत्वादूर्ध्वव
र्तित्वाच्चशिखाहृदयवस्थापिताशिरसिधृतासतीविड
म्बांवरत्नदेवरूत्नमवलाभनिमित्तम् विवादप्रवृत्तेश्चि
तमहाराजतानिमित्तंच तथाहि याशिखामाश्रित्यज
निमतांजन्मिनांजन्यानांचभूषितानांअभूषितानां

सेयंशिखास्तिविडम्बांचवरत्नदेवराश्रित्ययां
जनिमतांवतभूषितानां मध्येविभातिसग
तीरतिसम्प्रयुक्तोप्यानन्दपूर्णहृदयोधृतस
त्कलापः ८२ ॥

मलंकृतानांचमध्येसगतिःसङ्गतिरिहोच्चपदभाग
मुत्रस्वर्गादिपदभागस्वदन्त्यादियानश्चरतिसम्प्रयु
क्तःस्वीसततफलभाक्च धृतसत्कलापःस्ववशी
कृतपण्डितसमूहः धृतशोभनभूषणाश्च अथवा
धृताःसन्तःप्रशस्तिरूपाःकलापाःस्वगीतयोयेन
वरस्यहाग्रतोगायकादिगानंक्रियते ८२ ॥

रत्नानीति हारभूतानि रत्नानि चत्वारिंशत्संख्यानि
वैरैरुत्तमैर्विवाहप्रवृत्तैश्च विमलत्वमेव विशदयति
येषामिति येषां रत्नहाराणां जगद्विषयेन कृत्यापि स
म्यगनुत्तमत्वात् तदभावे च मूल्यं कुतः स्यात् कियत्प
रिमितमेषामर्घ्यं स्यादिति को विविंच्यात् परं त्वियती
वित्तस्थिरवशिष्यते यस्यस्तु विमलादृग्दृष्टिर्ज्ञानं सप

रत्नानि तानि विमलानि सुरक्षितानि सन्त्यत्र
भूषणवरे वरमानतीये येषां जगत्सुतल
नानकृतोस्तु मूल्यं यस्यास्ति दृक्तु विमलाम
इमं प्रपश्येत् ८३ ॥

वेमं प्रपश्येदिति मलिनदृक्कपश्यन्नप्यनभिज्ञत्वा
त्पश्यतैनमनुचितं करोति मलिनदृष्टिश्च मणिं वि
हीनार्घं करोतीति प्रसिद्धम् ८३ अपि च नाभासमा
त्रेणेति आभासमात्रेण विचाररहितेन च्छायामात्रे
ण सप्रभरत्नशेखरः न प्रदर्शनीयः अपि तु सूक्ष्मद
र्शाकुशाग्रीयमनीषयावलोक्यः नत्विति हेतोय

स्मादत्र साकापि शक्तिः सूक्ष्मार्थशक्तिः आलोकशक्ति
श्च यस्याः शक्तेः प्रसादतो महिम्ना तिमिरे ऽवोथलक्षणे
कस्मिंश्चिदतिगहनेऽवैर्थे पि दृष्टानं यायात् यदति
गहनं चापि किंचिद्वस्तु तदप्यनेन सुबोधं भवति रत्न
जाते च साकापि शक्तिर्दृश्यते यत्प्रसादेनान्धकारेपि
हक्प्रकाशवती भवति ८४ प्रकृतमाह चत्वारिंशदिति

नाभासमात्रेण बुधैः सप्रभप्रदर्शनीयः खलु
सूक्ष्मदृष्ट्या अस्त्यत्र शक्तिर्ननु कापि यस्याः प्रसा
दतो दृक्तिमिरेपि यायात् ८४ चत्वारिंशत्क्रिया
एता बाह्यान्तरस्य संस्क्रियाः निषेवणीया विह
द्भिरिहामत्र शुभप्रदाः ८५ ॥

एता हारभूताश्चत्वारिंशत्संख्यकाः क्रिया उपायाः शिक्षा
विद्भिर्निषेवणीया निरन्तरमभ्यसनीयाः यत इमा
बाह्यान्तरस्य संस्क्रियाः बाह्याभ्यन्तरवृत्तिशोधनिकाः
सद्गुणान्तराधानं संस्क्रिया तत्र शोभनत्वं क्लेशं विना
सिद्धेः निषेवणे प्रवृत्त्यर्थं फलमाह इहेत्यादि इहस्वे

नसङ्गेगान्भक्तामवसयोनिभाक्तंनिःश्रेयसप्रदंतं
चेत्यर्थः ८५ तत्रेतितत्रचत्वारिंशतःक्रियाणांमध्येप्र
थमिकीहास्तपस्क्रियाख्या यासैविदांप्रवुद्धानांसे
व्याभ्यसनीया समाहितचित्तत्वमेवतदवाप्तिहेतुरि
त्यामंत्रणव्याजेनाह समाहितेत्यादि तांतपस्क्रियां
शृणुत लक्षणकथनपूर्वंउदाहरणेनसम्यग्हृद

तत्रप्राथमिकीयासैविदांसेव्यातपस्क्रिया
समाहितहृदोभूत्वाधीराःशृणुततांस्फुटं ८६
कायक्लेशादिभिस्तस्याश्चानंत्येयदपिस्थितं
तथापीशार्चनैवास्तेतदर्थमितरेयतः ८७

यास्यासकरीकुरुत स्फुटमनायासेन ८६ अन्याभि
मततत्स्वरूपानुवादपूर्वंतांस्वमतेनसिद्धांतयति का
यक्लेशादिभिरिति तस्यास्तपस्क्रियायाःयदपियद्य
पिकायक्लेशादिभिःशीतातपादिद्वंद्वसहिष्णुताहा
रैस्तपोभिरादिनान्तरमपिसर्वयोगशास्त्रोक्तसंयमा
दिपरिग्रहः आनन्त्यमगण्यत्वंस्थितंतथापिप्रसौस्त

व्वितत्तपस्क्रियेशार्चनैवेतिसिद्धान्तमतेनप्रतिज्ञा एव
कारेणास्याःप्रतिज्ञायाअचाल्यत्वंध्वनितं प्रतिज्ञातेर्थे
हेतुंतयार्थान्तरंन्यस्यति तदर्थमिति तदर्थमीशार्चना
त्मकतपस्क्रियार्थंतत्सिद्ध्येइतरेकायक्लेशादयः फ
लवंतः अयंभावः ईशार्चनासिद्ध्येकायक्लेशमनःसं
यमादयोयेवाह्यान्तरउपायाःस्वीकृतास्तेसर्वेस्वयंती
व्रतमशक्तिपातादिनासिद्धायांतस्यामकिञ्चित्कराइ

साचसंक्षेपतस्तस्यसत्तामात्रायस्तुतीरिता का
र्याकार्यविचारोयंयदधीनोयतोखिलं ८८

तिसैवमग्र्यातपस्क्रियेति तपस्क्रियाप्येशार्चाप्रथ
मंहारम् ८७ ईशार्चनातपस्क्रियेत्युक्तंकथंलक्षणाप
न्नस्मादितितांस्वरूपेणनिरूपणतदधीनासेवसर्वादा
वहतिनिरूपयति साचेति संक्षेपतःसर्वसिद्धांतसा
रोद्धयेनसेशार्चाश्रुतिस्तुतीरिता तस्येश्वरस्यसत्तेति
तथाहि ईश्वरोस्तिइतिसत्तासम्भावनयास्तिकवुद्धिः
समस्तैवस्वयमुपागताभवतीतिआस्तिकवुद्धिसाध्या

प·सं
४०

मेवाह कार्याकार्येति यदधीनइति ईश्वरसत्ताधीनः
सत्यां तस्यां दर्पणानुद्धृत इवेदं कार्यमिदं नेति सम्यग्यथार्
यति सम्यगभ्युपगते च तस्मिन्सर्वथाकृतकृत्यतेत्या
ह यतो विलमिति यत इति कार्याकार्यविचारादवि
लमितीहामत्रसुधिः ८८ उक्तमेवार्थं विशदयति स
त्वेति यत इतीश्वरसत्तायाः दृढ इत्यवधृपविधेयः अ
न्वयेन साधितमर्थं दृढप्रतीतये व्यतिरेकेणापि साध

सत्त्ववर्णाश्रमाचारप्रकाशो यं यतो दृढः । यां
विना मोहसम्पन्नावन्यत्वं स्यात्कथं न हि ८९

यति यां विनेति श्रुतिस्मृत्यादिते ईश्वरसत्तां विना ते हि श्रु
तिस्मृती अप्येश्वरस्य नेत्रे इति नेत्रनिमीलने मोहसं
पन्नौ सत्यां कथं नान्यत्वं ८९ अस्या एव प्रकारान्तरेणा
र्थसाधनत्वमाह यद्बीजमिति यद्बीजमीश्वरसत्ता
बीजम् द्वयोर्धर्मः कामार्थावेव पत्रपुष्पभरसम्पत्
आशा दिशः कामना च ईदृशी धर्मकल्पलता त्रिदिवा
तिशयेन फलति फलमस्यास्त्रिदिव इत्यर्थः इति प्रह

त्रिमार्गेण चतुर्वर्गसम्पत्तिमीश्वरसत्ताश्रयामुक्त्वा निवृ
त्तिमार्गेणापि तां निष्कामविषयामाह अप्यमृत इवैरि
त्यादि अपिर्भिन्नक्रमः ये ईश्वरसत्ताश्रया धर्मकल्प
लता भुवि सज्जनानां अमन्दत्वेनामृतद्रवैः सर्वतः प्रस
रदानन्दरसैर्निःश्रेयसमपि वितनुते निश्चितं श्रेयो निः

यद्बीजमाश्रितवती द्वयकल्पवल्ली कामार्थपत्र
सुमनोभरशोभिताशा । पं फल्पते त्रिदिवम
प्यमृतद्रवैर्या निःश्रेयसं वितनुते भुवि सज्ज
नानाम् ९० अहो विचित्रा विबुधागतिरस्या वि
राजते त्रिवर्गमूलभूतापि यापवर्गप्रसूर्भ
वम् ९१ ॥

श्रेयसम् अपिना कामादीनां सिद्धावनायासं सिद्धिं सू
चयति ९० एतत्प्रशंसार्थमुक्तमेवार्थं सविस्मयमाह
अहो इति हे विशेषज्ञाः अस्या गतिर्विचित्रा आश्चर्यस्वरू
पा विराजते अथ च विचित्रा विगतचित्रापीश्वरसत्तैका
पकरूपत्वात् विराजते विविधं राजते पुनरपि च विगत

प.सं
४८

चित्राकाररचनापि विराजते विशेषेण राजते इति विरोध
विरोधाभासमेव प्रकटयति त्रिवर्गेत्यादि यासमार्थ
र्थकामाख्यत्रिवर्गकारणमपि सती अपवर्गप्रदः वर्गा
णामभावोपवर्गस्तस्य प्रदा इति विरोधः अविरोधस्त्व
पवर्गशब्दस्य कैवल्यार्थत्वादिति विचित्रगतित्वम् ४१
ख्यातेति यत्प्रसादत इति तपस्क्रियाप्रसादतः अनेन स
या सर्वेषामर्थदायित्वमुक्तं तथाहि कामी पुत्रदारभाव

ख्यातकीर्तिः स्वस्य देहो निराधिः पुत्रदारयुक्
नैपुण्यतोषवैराग्यभागी स्याद्यत्प्रसादतः ४२

स्वस्य देहः ख्यातकीर्तिर्निराधिश्चित्तपीडारहितश्चेति
शेषणचतुष्टयेनेदमस्य सौख्यभाजनमित्युक्तं भवति
यतः ख्यातकीर्तिरतः स्वस्य देहो जीवदवस्थायां स्वर्गस
कीर्तिदेहः पारत्रभोगावसाने तमेव कीर्तिदेहं मूर्तं त
योपनतमाविशतीति स्वस्य देह इत्यत्र स्वरे परे शषविस
र्गलोप इति विसर्गलोपः द्वितीयार्थे यदितसंहितायामि
तिनत्वाद्यदस्तत्वमकारद्विलोपिनप्रथमार्थवृत्तिः त॰

सकारस्यानचिचेति द्वित्वकरणात् यदित द्वित्वं न सह्यते
तदा द्वित्वे सति करोकरि सवर्णे इति सलोपेपि न काचित
त्क्षतिरिति सिद्धं स्वस्य देह इति अकामस्तु यत्प्रसादतः नै
पुण्यतोषवैराग्यभागीति सर्वथा कर्मप्रवृत्तावपि काम
नानैरपेक्ष्यं नैपुण्यं तोषः स्वयमुपनते न हर्षविषादौ वि
कीकृत्य मनःप्रसादः वैराग्यं साधनेभ्योऽप्युद्विग्नता पर

यथोचितमप्यत्रापि स्वर्गनिःश्रेयसं च वा इदस्या
पितमत्कीर्तिर्ध्रुवमूर्तिः स्थलीभवेत् ४३ उक्तं च
ऊर्ध्वलोकैरेतद्भवप्राशस्त्यमूलतः पारलौकिकमा
हात्म्यशोभाचेयमहोदया ४४

भागीति मोक्षभाजन
मितिभावः ४२ यथोचितमिति पूर्वेणैव गतार्थं ४३ ऊ
र्ध्वलोकैरिति विदितवेदैः परार्थैकहृदैनैकतात्परैः अनेनप
स्क्रिया पतजन्मकोशल्यामूलत्वं नेनाभ्यासेनेतज्जन्म
प्राशस्त्यं प्रकेतव्यमिति इयमेव च पारलौकिकमहत्त्वेप्र
भावान प्रवरीत्यदो इत्यस्याऽऽत्मकर्मोपस्मायते ४४ ॥

प·सं
९५

इतीतिश्रुतेरिह ज्ञाहात्म्यवत्वादस्याः सत्यएवेति यावदिप
ङ्कलेशगन्धोपिनावशिष्यतेतावन्मनुष्यत्वादिभिः स्वइहैवे
तिसत्यएवभरतइत्युक्तं त्रिलोकाधारत्वादस्याः प्रान्तोवीत
लसंस्थितेरित्युक्तं सराज्ञोविवेकिनोराज्ञइदमेवकार्यंत
पस्क्रियालक्षणमुचितं ध्यायतिकनरःकालः ९४ भ्रात
स्तु पुमानिति पक्षः पुमांशेद्वोरूढिमात्रविश्रान्तः हि

इतिसत्यएवभरतः प्रान्तोवीतलसंस्थितेः स्वराज्ञ
उचितंकार्यमिदंयेनायतिः सुभा ९५ पुमान्
पुमान्स्वगुणैर्यावैयेनपुंस्त्वंप्रकृष्यते सन्त्यने
वहवोलोकेयैः पूर्णानारकीस्थितिः ९६ ॥

तोयस्यसत्कृत्यपात्रतावाचीयोगविश्रान्तइतिनान्यर्थेभे
दाद्वैतिकमलारकमलाइतिवलादानुप्रासोयमलं
कारः गुणइतिपुरुषगुणानां सत्त्वौत्सुक्यवादेगुणेते
इत्यर्थः येनेति प्रकृष्यतेसत्क्रियया प्रकर्षनीयते को
यंप्रकर्षइतिव्यतिरेकमुखेनार्थान्तरन्यासेनप्रकर्षम

चयति संत्यन्येइति पूर्णेति नत्वहिकृज्ञाचरणात् तेन
तेषुवृद्धिमात्रेणापिपुरुषत्वास्वीकारात्मनुष्यत्वमेवयोगात्
ल्व्यावशिष्यतेइत्युक्तंनारकीस्थितिरिति नारकीत्वमेनेन पशुस्थावरत्वेरपि
सूचिताभवति ९६ ईश्वरसत्वात्मिकांतपस्क्रियांतावत
स्वरसमिद्धमूहमविचारेणानायाससाध्यांसूचयति ल
लाटेत्यादिसार्थ श्लोक ज्ञेयेण वर्णावलीदैवलिखितसु

ललाटपट्टलिखिता यासौवर्णावलीशुभा न
त्वंविद्याञ्जकंसत्यसाधारंयद्विशेषकम ९७
प्रेषिताशोधयेशानेयेनत्वंप्रत्यक्षोविभुः स्वहेव
यात्रसत्रोत्रदत्वादिवर्णालिपिंपुनः ९८ ॥

भाशुभकर्मफलोल्लेखरूपाशुभेतिनविशेषणं अनुलं
ख्यत्वादिधिकरकजलिखितत्वादन्नविशेषणेनासंख्या
मानशुभरूपत्वादा अनुल्लायसौसर्वसंमतेत्याह न
त्वंविदिति तस्याः संविदोङ्गीकृतेभिन्नत्वमुप्रकाशकंव्य
द्विशेषकंविशेषबोधकेतिलकंचकुंकुमचन्दनमृदा
दिविरचितंसरितिनित्यसन्निहितंसाधारंचसाधारणं न

चसाधारमपभ्रंष्टं साधारस्मितलांछितंदिशन्तेवोवक्रम
नोवांछितमितिमहाकविप्रयोगात् इतियद्वियात्तलि
खितवर्णावलीप्रतिश्रुतिव्यञ्जकंविशेषकंसर्वसाधार
णंविधेयतयाविहितंतद्येनसम्यगनुष्ठितंसउपयाप्ते
णाह्वैकिंतंतस्मिन्सर्वेशानेतंविशेषत्तमाज्ञापालकंप्र
त्यसौविभुःसर्वज्ञःसर्वशक्तिश्च तस्मसद्भावयानडदिता

विचित्रयतियेनास्यसर्वसाम्राज्यमप्लसेत् इ
तिबुद्ध्याविचार्याशुज्ञागर्यैविबुधैःसदा उष्टां
लिपिंप्रमृज्येषशःसतींतांयोजयेत्सनः ययेहभू
त्वासत्वात्रैपरत्रानन्दभाजनम् ९९ ॥

थानुमतिरूपस्वकीयतत्वबोधकसलेखालन्दणेनस
सम्नस्तत्रलिपौसर्वोर्ध्ववर्त्तिनोपुनर्दिवांघोनन्नशीलां
णपापुण्यमयोमौर्णसलिपिंविचित्रयति तथाययाम
सर्वसाम्राज्यमप्लसेत् प्रसिद्धंचैतत्स्वामिभृत्यवचन
रैस्वामिनिवेदितमर्थमविशङ्कःयानुष्ठायप्रदर्शयतो
भृत्यस्यप्रसन्नःस्वामीतत्प्रदर्शितोपरिस्वर्णमयानि

हस्ताङ्कि·तानिसदलवाणिपारितोषकत्तयालिखतीति
इत्यतोहेतोर्बुधैर्मत्याविचार्याशुशीघ्रंतदनुमतौसदाजाग
र्यं येनसप्रसन्नोडष्टांलिपिंपुण्यापुण्यमयार्जितांसर्वथा
न्ननस्थरीप्रमृज्यात्तुस्यतांशोभनांलिपिंसतीमनस्थरीपुन
र्योजयेत् ययासलिप्येहसम्यत्वात्रैभृत्वापरत्रलोकान
न्दतापात्रंभवेदितिपुण्यस्यापिसमर्जितत्वेननस्वरतादु
ष्टामितिसाधारणतयागमपदेशः ९९ इत्थंप्रकृतंसम

र्थोधीमन्स्वमतौस्थित्वाविचारयपुनःपुनः य
थाप्रजासुतेशास्तिकारित्वंप्रभुसम्मितम् त
थेशस्यामितस्तृवित्वयितत्कार्यमेवतत् १०० ॥

ध्यविषयोपदर्शनेनसंस्थापयति र्थोधीमन्निति धी
मन्निति विचारयोग्यमतौस्थित्वापुंदंशासनीकृतमदारंभ
रमेतद्वक्ष्यमाणंविचारय यथानवतद्बुद्धदरस्कदाद
लेशमात्रेणप्रजाविषयेप्रयत्नेनसम्मितमविचारितंकि
याशास्त्रत्वंसिद्धंफलतिच तथानन्यापितसर्वेशा
नस्यभूरियथास्यानयाततशास्त्रत्वंसर्वंयानदनुमाणक

त्वाङ्गीकृतम् तस्मात्त्वयापि तदुपदिष्टं सर्वथानुष्ठेयं
येन प्रसन्नोसौ दास्यपदवीं त्वां प्रापयिष्यति प्राप्ते च दास्ये
स्वयमेव कृतकृत्यो भविष्यसीति भावः ९० तच्चास्त्र
त्वमेव प्रत्याययति तथा चेति सार्धेन तस्य सर्वेश्वरस्य
सर्वज्ञस्य सर्वकर्तुश्चायं त्वद्विषये शिक्षोपदेशः रात्रिन्दि
नविभागेन यथा तद्विचिन्तास्वात्मप्रजास्वयोगक्षेमाव
धारणम् प्रजापालनप्राप्तपरिपालनात्मकं दिने यथो

तथा च शिक्षा तस्यास्ति दिनरात्रिविभागतः दि
नेतद्विचिन्तास्वात्स्वयोगक्षेमावधारणम् ९१
रात्रौ यथोचितं तस्य परस्याप्यनुचिन्तनम् ॥

चितमुपदिष्टम् रात्रौ च तथैव तस्य परस्य सर्वोत्कृष्टस्य
परमेश्वरस्यानुचिन्तनम् स्वप्रयोजनसिद्धये दिनव
न्न्यूनाधिकप्रायश्चित्तमुद्दयेच दिनरात्रिविभागतः इति
सूत्रात्तयोः व्यस्तविधेयतामवद्यादिविभागोपलक्ष
णम् प्रतिसन्धानात्राजकार्याणाम् तद्विचिन्तास्विति
प्रयत्नपरतया कार्यं सूचयति ९२ ॥

इत्थमुपपादितमर्थं निगमयति इत्थमित्यादिना इत्थमु
क्तप्रकारदेतेनातत्त्वसमाहितचित्तस्य कार्येषु प्रमादतः
सम्यगनुष्ठिततदादेशस्यात्त्वसितानेकजन्मार्जितदैव
स्य स्वहस्तकमलचित्रितदिव्यलिप्यङ्कितोच्चमूर्धशालि
नस्तव लोकद्वयीहानिश्च लोकलक्षणाजिता भवेत् स
म्यक्सेवितत्वद्वारपालनेन सम्यग्भोगान्भुक्त्वाम

इत्थं समाहितधियस्तव लोकद्वयी जिता क
र्तव्यं नान्यदस्तीह पुंसां पुंस्त्वे नियोजितं ९३

त्कीर्तिं च स्थापयित्वा दिव्यतनुभूत्वानन्दसिद्धेः यतो
स्येहलोके न्यद्विधेयं नास्ति महाकृतसमुद्रनिमग्नस्य
कृतस्तस्योदयः तथा चानेन सत्कर्मणामाचरणाय त्वि
जं पुंस्त्वं पुंस्त्वेनियोजितम् स एवैकः पुमान्भवति अ
न्ये पशवस्तस्मात्परत्रापि नरकपातादीर
ति ९३ ॥

इत्थंविधिदेशीयंशिक्षावाक्यमपरिसंख्याप्याप्यार्थवा
देशीयंशेखरस्तवाक्यंरचयित्वमाख्यायिकामुदाहर
णतयावतारयति श्रूयतेइत्यादिनाहारान्तम इत्थमेव
चसर्वद्वारेषुशिक्षाशेखरकल्पनास्वयमूह्या अत्रासं
शिक्षायांवाक्यार्थसमन्वयरूपायामियमुपलब्धार्था
ख्यायिकाश्रूयतेइतिसमन्वयः नामाह सानुभाव
ति अलिनामासानुभावःसप्रतापःसमतिनिश्चयश्च

श्रूयतेत्रोपलब्धार्थासानुभावोलिनामकः अ
भूद्येनाहर्निशेद्वेविभक्तेसत्क्रियाभरात् १०४
तेनतयासंततमप्युक्तंसवयाज्ञातकश्चन अध्य
क्षावनतोभूत्वापप्रच्छविनयान्वितम १०५

कश्चिद्राजाभूत् नामपदेनैवतस्यसंज्ञातेति इषनःक
मनाथकरणंसंज्ञागौरवार्थं तेनचयोगरूढिवमस्या
भिप्रेतंतथाचअलतीतिअलीजीतरूढीतियोगविभा
गादित तथाचालीपर्यायःसकुणभूषितःसकलश्च
येनेहगुणेनसत्क्रियाभराद्देताहैअहर्निशेविभक्तेपूर्वंव
हर्निशेइत्युपलक्षणं ४ विनयान्वितमितिक्रियाविशेष
णम १०५

मेमतमितिअनुमितं रहस्यमाहात्रिवत्तस्यसर्वथाप्रमत्ता
गोचरत्वात् परवशेनवेतिवाशब्दश्चार्थे स्वतन्त्रेणापित्त
नापराधीनेनेवकिंचिन्त्यते १०७ स्मितेतिरहस्यार्थान
भिज्ञत्वमस्यसूचयति विनयप्रह्वत्वात्मकर्येणोवाचरह

भद्रंतेमतिमन्स्वामिन्स्वीकृतःकिंत्वयात्मनि
विवेकयन्नसर्वत्रतेहृदिनेपश्यामिकिञ्चन १०६
राज्ञोविश्रामलेशोपिनतवास्तीतिमेमतम किं
मिदंचिन्त्यतेदेवत्वयापरवशेनवा १०७ इत्यु
क्तःसमहाधीरोगम्भीरोविपुलाशयः स्मिता
प्रोवाचतंस्निग्धंसहृदंप्रेमभाजनम् १०८ स
त्यमुक्तंत्वयाकिन्त्वतत्वेनोस्थाधिपश्चतेः सर्व
थावहितत्वंहिपरमंसत्वमीर्यते १०९ ॥

स्नमयेतदवाचेत्यर्थः अर्थ्यतेइत्यर्थिः परमकाशाप्यं
तदेवाह सर्वथेति अल्पसत्वंहिविषयस्थावकाशःत्वमे
वेतिपरमपदेनध्वनितं अत्रसत्वविषयेसमाकलंलक्ष्प
लक्षणं १०६

स्वभावसङ्गेनेति स्वभावस्य सङ्गो यत्र स्वभावाभासेनेत्यर्थः स
मा इत्यन्यूनानधिकाः परस्परविरोधेनेति शासितदेशि

तयाद्दिश्यतामत्र सम्यक्त्वं महामते यत्र
हं स्वभावसंगेन दिवसान्यतिवाहये १० तदे
मामदधीनाश्च प्रजाः सर्वाः समाः स्वतः परस्प
रविरोधेन सर्वथानर्थमाप्नुयुः ११ स्वेष्टमावि
विधारागद्वेषादिसमलंकृताः परस्परविभि
न्नत्वादन्योन्यकलहप्रियाः १२ अहम्पूर्विक
याशक्ताः परस्परजिगीषया अनर्थमूलमा
लोच्यानियतिं कृतवान्स्वयम् १३ यासौ दंड
इति प्रोक्ता सदा जागर्ति सत्वरा यन्मूर्तिमाश्रि
तो राजा दण्डधारीभिधीयते १४ येनासौ श्रि
यते दण्डः स तस्याज्ञावशे स्थितः प्रियो भवति
तस्याशु धनसत्वाभिभाजनम् १५ ॥

छाभावभावात् अनर्थमिहासत्रार्थलोपम् ११

यदेतदधिष्ठात्रधिष्ठेयस्वरूपं लोकद्वन्द्वं तत्र सैव सर्वे
शितुः स्वातन्त्र्यमित्याह स्वेष्टेति नियतिं पाल्यपालकद
ण्डदण्डयितृशिष्यशासित्रादिलक्षणां स्वयमिति न्यू
नाधिकस्वतेजःस्फारविस्फारणात् केयं नियतिरिति
विषयप्रदर्शनेन तां स्फुटयति यासाविति यासौ वि

इति मे न दिने किञ्चिद्विधेयं तत्क्रियां विना
यदापि रात्रौ विश्रान्तो भविष्यामि तदा मम प
रास्त्र्याविनाशावेलाशीतिशयाभविष्यति १६
अतो विचार्य स्वपरक्रियां राजेन्द्रं मया वि
भक्तं कृतकर्मासिसिध्यै तं मम सम्मतं मतम् १७

यातीह स्वेदण्ड इति सा नियतिर्या भीषास्माद्वातः पव
ते भीषोदेति सूर्यः भीषास्मादग्निश्चेन्द्रश्च मृत्युर्धावति
पञ्चम इति न येन सदा निरन्तरं धावति सैवेह मन्त्रभे
देन द्विधा सती सूक्ष्मस्थूलरूपेण लोके प्रवर्तते इत्याह
यन्मूर्तिमिति सूक्ष्मस्वरूपमूर्तिर्येयमादण्डधारी इह

प॰सं
५८

तस्मूलमूर्तीराजादण्डधारी तत्रैवदूषितः परत्रैव
एडानुचितः अशोधितस्तुसचतश्चोयकश्चेतिदृयमपि
दण्डार्हमितिसत्स्वरूपंतंतस्येति येनासौसम्यग्दण्डे
म्रियते तदाज्ञापालनान्नम्रियतयाउनस्तस्याभिरन्यस्त
स्वाभासेनश्रान्तचित्तत्वान्नदण्डाभोयथोचितगतिरिया
ह इतीति सावेलेति आत्मगुहूर्तेलक्षणममममतंमम
मीष्टंमतमिति १८ अत्रैवदार्ढ्यार्थमस्याआख्यायिका

श्रूयतेचात्रहीरानन्नृपःसज्यन्नृपंप्रति प्रोवाच
सङ्क्ततःसंध्यावेलायांपरयामुदा १९ ॥

उदाहरणत्वेनाख्यायिकान्तरमाह श्रूयतेइति दीर्घैर्व
ृद्धैरागमैर्गृहीतइतिहीरानृपोदेशविशेषस्तदधिपति
त्वात्तद्राजाहीरानन्नृपःससज्यन्नृपंप्रतिलदीकृत्यगतः
संध्यावेलायांमरणावस्थायांपरमयामुदासङ्क्ततः व
क्ष्यमाणंप्रोवाचपरमयामुदेति उभयोरपिप्रवृत्तत्वाम्
विशेषप्रतीत्यर्थंचप्रश्नः शोभनाससंउपासनादिनाजयश्
ियैवीयस्यससज्यः अथवाशोभनाज्यामौर्वीयस्यसःयत्र

चार्जितकीर्तिविग्रहः ११८ राजन्निति कृतकर्तव्यत्वादि
दितदेवयत्नात्सन्मार्गेप्रस्थितोसीतिमहीयंत्वामहीनंविना
शोचेत्तिमांशाध्युपदिशकिमत्रसंसारेहंकरोमियेनाह
मपिसन्मार्गेणैवगमिष्यामीति ११९ किङ्करइति अहंत
वकिङ्करोदासोस्मि तदुपदिशयेनमेस्वात्मस्तवेनरतिर्मे

राजन्कृतस्त्वकृत्योसिज्ञातज्ञातव्यशुद्धधीः स
न्मार्गेप्रस्थितोसीतिशाधिमांकिङ्करोस्म्यहं १२०
किङ्करोस्मिसखेयेनरतिर्मेकिङ्करेणमे किङ्क
रेणहिडजीवंजीवलोकेभयाकुले १२१ इतिप्र
श्नितयावाचात्तुष्टःप्रोवाचतंमह यथस्याद्भव
सिन्धोस्त्वमुत्कोत्तमपदंपुनः १२२ ॥

वेत मेममकरेणपज्ञाभ्योवस्यादनेनसर्वसाधारणादि
लक्ष्येनपरमानर्थदायिना यतःअस्मिन्भयाकुलेजीवलो
केकिङ्करेनेमलिलेपनासेनडजीवंतन्नापिराजास्वारो
पितपरमोरेणोक्तितदुपदिशयेनास्मात्त्रुटितजालवंधोमु

क्षोभविष्यामीत्याशयः इतिविनीतयावाचासचान्तराश
यज्ञप्राशयानुसारेणतंप्रोवाच हेतिप्रसिद्धौ नैसर्गिका
मिति साहिवेलासर्वेषामयत्नोपनतायेनप्रासंसद्धी
मितितदभिधीयते ततश्चदिनेप्रजावेत्तयातंप्रबोधयशा
द्वैचसात्वादेवदीनाक्रन्दनेनविसृष्टयाचक्रियया:ज
पोच्चारणादिनास्वात्मसुहृद्वेचेतस्कंकुर्विति ११ प्रत्य

वांछमेतद्दिनेराजन्प्रजावेत्तणतत्परः तस्यां
वसुप्तवेलायांनैसर्गिकोपप्रभुपुन: दीनोक्त्याक्रि
ययाचापिसृष्टयातंप्रबोधय १२ यथेयंतन्दृशा
स्वस्यातथाज्ञावशतोस्यकिं स्वस्यांतवीक्षणेनो
स्या:सहिसर्वार्थजागरः १३

लेकथ नयानेनकथ
सारमाह यथेयमिति इष्टप्रत्ययसिद्धमिदंयथेयंजनत
त्वहृशावदाज्ञापालनरतास्वस्यानिरूपद्रवानयातम
प्यस्यनियंतुराज्ञावशवर्तीवाह्याभ्यन्तरत:स्वस्यानिरूप
द्रव:किंनस्यामपितस्यापद नचकदाचनतस्मिन्सक्रिये
पयीहतानस्पतीत्याह सहीति सर्वज्ञत्वादितिभाव: १३ ॥

तयाचेति प्रभाणकः सततमस्याज्ञावशवर्तीवाक्यसन्द
र्भ: तदेवपठतियेनेति सक्तमितिभावेक्त: प्रयमर्थ:
ईशाराधनसक्तस्यराज्ञ:प्रजा:स्वधर्मपालनसक्तास्तमे
शभागिनंकुर्वतीत्यनुषङ्गि:कंद्वियाफलम् इहावाक
लतापरत्रचतदंशभागित्वंस्वयंचतदाराधनफलंसाक्षा

तयाचात्रप्रवीणनामस्याभाणकउत्तमः ये
नेशाराधनेसक्तस्तस्यताल्लभ्यरइति १४ नु
ष्योनुषङ्गरूपेणफलंतस्यद्विधास्थितम् वि
चिन्त्यमतिमान्कोनतमाराधयतीश्वरम् १५
प्रहेविचित्राविडंबागति:स्वपरसौख्यदा यथा
नेमत्फलेस्वस्यवापरस्यापितन्वते १६ ॥

देवमुख्यमितिसर्वथाश्रांतोनरइति वाक्यसमाप्तिवाच
कोपीतिशब्दस्तन्त्रेणप्रकाशमप्याह तमेवार्थंप्रकट
यति मुख्येति गतार्थमेतत् प्रत्यैवस्याद्यते प्रहेशनि ग
तिर्बवहार: स्वपरवेति वाशब्दश्चार्थे १६ ॥

इति ५

प.सं.
५९

अतएवराज्ञाधीनंस्वपरसौख्यंसत्कर्मणाराजन्येवपर
मार्थतःपर्यवस्यतिहेतोः १२ नचकृतकर्त्तव्येनराज्ञा
संतुष्टचित्तेनभाव्यंयावज्जीवंस्वयमनपेक्षणोपिपरार्थ
त्वार्थसत्क्रियाकरणस्योचिततरत्वादित्याह स्वयंचेति

अतएवस्मभागायापुराणेचापिगीयते राज्ञिध
र्मिणिधर्मिष्ठाःपापेपापाःसमेसमाः राजान
मनुवर्त्तन्तेयथाराजातथाप्रजाः १२ स्वयंच
कृतकृत्योपिपरार्थंरीतिमाश्रयेत परोपकार
कारित्वंधर्मस्यपरमोवधिः १८ अतोभगव
ताप्राप्तप्राप्तव्येनार्जुनंप्रति कर्मकार्यतयाप्रो
क्तमुदाहरणपूर्वकम १५

रमोवधिःपरमाकाष्ठान्यकर्त्तव्यतानिरासः १८ अत्रभ
गवंतंशरणीकरोति अतइत्यादि अर्जुनंसंमुखीकृत्या
त्मसर्वकामेनावाप्तिसर्वेष्टकामेनाप्रिविवेकलक्षि
मार्गप्रदर्शनार्थमुदाहरणपूर्वकंकर्मकार्यतयाप्रोक्तं

तद्वचनमेवानुवदति तदभिप्रायकथनाय यद्यदिति
यद्यत्किञ्चिच्छ्रेष्ठआचरतितत्तदेवेतरोनवाप्तकामोनभि
ज्ञश्चकरोति सचश्रेष्ठोयत्प्रमाणंकुरुतेफलसिद्धिसाध
नतयास्वीकुरुते तदेवलोकोप्यनुवर्त्तते तदाचरणात
दनुवर्त्तनाच्चस्वयंसद्रूपाभवन्तीतितात्पर्यकथनायभग

यद्यदाचरतीत्युक्तैस्तैस्तथावर्त्तनात्स्वयम तत्स
द्रूपाभवन्तीतितात्पर्यकथनायेदं १३० ॥

वताकर्मकार्यतयाप्रोक्तम् २० कार्यार्थंपरमफलप्राप्ति
कथनार्थमुपसंहरति इतीति मतिमनेनिवदमासांस
क्षेपेणश्रेयंविवेचय यथा वाक्कायमनसांकृतिंकि
यांयेमहीतलेविमृश्यविमृश्याचरंति तेविद्वद्भिर्वैरपी
डांतद्वद्धारीतिं सम्यक्प्राप्यततोज्ञानेनचनदृश्यक

प·सं
५०

मेवीजप्ररोहशक्तयः सन्नस्तत्किमपि सद्रूपं विशन्ति स
ह्यैश्वाश्चर्ये ।३। इत्येवमिति हे विबुधाः विडम्बामेवाशी
कार इति तत्सम्मुखीकरणेन ध्वन्यते परार्थात्तु नमा ।

इतिमतिमतां ये ये सम्यक्हरीरवबोधियां पर
हृतिमाम्नुष्यामुष्यां चरन्ति महीतले तरह्वि
बुधैरीद्यालोकस्थितिं स समाप्यतां विरतजन्तुष
त्तत्सद्रूपं विशन्ति किमप्यहो ।३। इत्येवमुक्ता
विबुधाः परार्थात पक्रियायापरमाशिदेतः
यां संश्रिता येन कषायशुद्धा मानं भजन्ते स्वविर
स्वगोष्ठ्याम् ।३२ इति श्रीवीररत्नशेखरशिवा
यां प्रथमं रत्नम् १ ॥

रमाश्रिरैकान्तिकात्यन्तिकत्वेनाशेषानर्थप्रशमात्
यायाश्चान्तरदोषाः अतएव शुद्धाः स्वविरोपरमूर्तिर्ब्र
ह्मा तस्य गोष्ठ्यां सभायाम् ।३२ इति शिवम् १ ।

ॐ नमः सरस्वत्यै श्रीगणेशाय नमः अथोद्देशप्रकरणे
यत्स्वभावाद्बहिर्द्वितीयं द्वाररत्नमुद्दिष्टं तल्लक्षणं वदिष्यन्
श्रोतृप्रवृत्तये तावदुक्तानुस्मृतिपूर्वं फलं निबध्नाति अ
थेत्यादिना उद्दिष्टमिति नाममात्रेण वस्तुसङ्कीर्तनम्
द्देशः शृणुतेति लक्षणेद्वाहृतिभ्यां श्रवणाद्वारेणाहृद
यङ्गमीभावं नयत अतएव तत्साधकमाहता इति संम

अथ द्वितीयं यद्द्वारमुद्दिष्टं शृणुतादृताः यत्प्र
वेशात्स्वविनयैरात्मा संस्क्रियते तराम् १ ॥

खीकरणार्थमामन्त्रणम् फलमाह यत्प्रवेशादिति आ
त्मसंस्कारोऽस्य फलमित्यर्थः द्वारेच प्रवेशेन भाव्यमिति
यत्प्रवेशादिति रत्नमाश्यमाह संस्क्रियते तरामिति
आत्मा चित्तं स्वविनयैरिति विनयोऽस्य वास्त्यमङ्गमिति स्व
चित्तं अतिशयेन वास्य संस्कारोऽघनारूढत्वमिति तरामिति
योतितम् १

स्वस्वभावत्वमित्युद्दिष्टं यत्तस्यैव पर्यायान्तरकथनेन
लक्षणमपि सूचितं भवतीत्याशयेन पर्यायान्तरैरपि त
दुद्दिशति तच्चेत्यादिना तच्चेति स्वस्वभावत्वं धीरैर्नि
तिव्यवस्थापकैर्मन्वादिभिः ज्ञाततत्त्वैर्विदितवेद्यैर्भग
वद्व्यासादिभिश्च तथाच भगवान्व्यासः लोकेस्मिन्
द्विविधा निष्ठा पुरा प्रोक्ता मयानघ ज्ञानयोगेन सांख्

तच्च स्वप्रकृतिर्धीरैः सौशील्यमिति चोच्यते ज्ञा
नज्ञैर्यैश्च निष्कामं कर्मयच्चापि कथ्यते २

ख्यानां कर्मयोगेन योगिनामिति सांख्यानां ज्ञान
योगेन योगिनां च कर्मयोगेन या निष्ठा प्रोक्ता सा म
या भगवता निष्ठाशब्देन सौशील्यलक्षणेन स्वरूप
स्थितिलक्षणेनेति सम्बन्धः परिमितकामनाया
गेन हि सर्वथा क्रियमाणं कर्मापरिमितत्वावस्था
येवेति भावः २ ॥

तत्त्वमेव स्पष्टयति सर्वथेति सर्वथेति सततो यततया
किन्त्वनेति ऐहिकामुत्रिकं न स्वरं वस्तु अतस्त्वाद चर्येयमि
ति अर्थैरिति कार्यवस्तुनामानन्त्याद्बहुवचनम् ३ आ
ह्लादमयत्वेन विरोधाभासपूर्वमस्या विराजमानत्वमेव स्प
ष्टयति कामेति यतो रागद्वेषादयोऽखिलाः आन्तरा विद्या
आध्यात्मिका बाह्याश्चाधिदैविकाधिभौतिकाः कामव

सर्वथाकामकारित्वमत्युदिष्टापि किन्त्वन च
र्येयमाह्लादमयी शून्यापर्थैर्विराजते ३ काम
वद्यायतः सर्वैरागद्वेषादयोऽखिलाः विद्यावाह्या
श्च सर्वेतो नर्थ शून्यं च तद्विदः ४ ॥

द्याः कामनियता अतएवानर्थैर्बाह्यान्तरैः शून्यं तद्विदुः
अतएव चार्यानर्थशून्यत्वादियं चर्याह्लादस्वभावा अर्थ
शून्यत्वेनर्थपूर्णत्वमनर्थशून्यत्वे ऽर्थपूर्णत्वमिति प्रसिद्ध
त्वस्योभयोर्नीलतादिरोधाभासः स्फुट एव ४ ॥
॥

प·सं
५९

कथमस्याः सर्वथार्थशून्यत्वं प्रवृत्तेरर्थ्यमानत्वादिति नवा
च्यम् नमे पार्थास्ति कर्तव्यं त्रिषु लोकेषु किञ्चन नान
वाप्तमवाप्तव्यं वर्त एव च कर्मणीति भगवता स्वयमव
रणात् अवाप्तकामानां विदितवेद्यानामपि प्रवृत्तिदर्श
नादित्याह सर्वथेति आत्मार्थेन लेशमात्रेणापि संसर्ग
इति संशब्देन द्योतितं परार्थं च सम्यक् क्रियमाणमपि

सर्वथात्मार्थसन्त्यक्तं चेत्परार्थानुषङ्गि तत् त
थापि भूषणं तत्त्वे तस्याम्बरमणेरिव ५ ॥

नानर्थावहमित्यनुषङ्गीत्यनेन सूचितं तादृशमिति अर्थ
र्शितं भूषणमलंक्रिया यतो वसिष्ठोप्याह ज्ञानिना
पि चित्ते चेत् केवलात्मसुखाय यतम् सन्ताः संसारदुःखा
कं यान्ति शरणं तदेति अम्बरमणी रविः तस्यापि यथा
रार्थे निरन्तरभ्रमणं भूषणं तथेत्यर्थः ५ ॥ ५

अधुना शुद्धाशुद्धचित्तभेदेनास्यैव पुनरपि विशेषं कथयति
द्येति अस्मिन्नीश्वरे यासत्यवासनास्तिक्यं तत्तत्प्रतदर्थकं य
त्कर्मेति शुद्धचित्तविषयम् अथवा तस्याप्रसादना
चित्तशुद्ध्यर्थं कर्माचरणमिति शुद्धचित्तविषयम् तस्मादि
दं सर्वथार्थिकार्यपेक्षयापि न नाम्नातमपि त्वस्तु तमेव ६

यासत्यावासनेशानेकर्मयच्च तदर्थकम् प्रसा
दनाय वा तस्य ननेदं सर्वथाम्नातम् ६ यत्त्वास्या
अर्थराहित्यमनर्थैः शून्यतापि या विरुद्धं हराम
प्येतन्नो विभाति तरां सदे ७ ॥

अर्थ्यं सङ्कलितमर्थमुद्योतयन्नेवाह यत्त्वास्या इति अस्याः
निश्चर्यायाः नो विभातीति काका न कुत्राप्येवास्माकं
विभात्येवेति अथवा नोऽस्माकं हृदे विभाति विदितवेद्ये
आर्थत्वाद्विरुद्धमिदमित्यर्थः नदिति विदितजालभ्रम
संइन्द्रजालं भ्रमायेति भावः ७ ॥ ७ ॥

विरोधाभासत्वमेव सहृदयाह्लादायान्यथापि चित्रयति
यएषइति स्वयंपरमामृतंप्रभवनशीलःपरेषांचमृत्यु
प्रदर्शकःसर्वनियतकारणावलिचर्यायायी सर्वान्तर्या
मीसर्वनियंतासदैवस्वीकृतपालकोनिरन्तरंक्रियोद्यतो
राजते तदर्थंसर्वाक्रियासम्यगनुष्ठितापिवार्थरहिता
कन्यायेनेतिमहच्चित्रम् सर्वथार्थसंभावनास्पदत्वेपि

यएषपरमामृतंप्रभुरशेषमत्युद्धतेमिहानिश
लकारणावलिधरोस्तिसर्वान्तरः नियन्तृपद
मच्युतःसततमुद्यतोराजतेतदर्थमखिलाक्रिया
र्थरहितेतिचित्रंमहत् ८ ॥

तदनास्पदताचित्रमितिविरोधःशब्दार्थतस्मात् तात्पर्य
ख्यातीयस्यार्थत्वादस्याप्रविरोधएवेति ८ उक्तमेवार्थं
द्रढयतीत्येवविपरीतलक्षणयापुनरप्युद्धरति यएष
ति उक्तविशेषणसद्भावेनार्थसिद्धानोचितेपिक्रिया
र्थरहितेतिकथंनातिचित्रमपितुचित्रमेवेतिशब्दार्थ
वृत्त्यापार्यन्तिकत्वस्यातनर्थरहितत्वंवास्थानान्तराय

हितत्वमुक्तमेव तत्रपरंडगमः अनेकजन्मसंसिद्धस्ततो
यांतिपरांगतिमित्युक्तेः परममायिकः अघटनघटनाप
टीयसीमायेतितदधिष्ठाता परमतत्त्वंचवेदकस्यापिवेद्य
तयाभासनात् ब्रह्मादीनपिमोहयन्नितिगोपृथद्व
णाद्याख्यानेषु दितिजाश्चालयन् वाचिन्नविरागइत्य
तोवेनानुवर्तनान्नमितांडस्त्रः भस्मासुरादीन्मोहनीऽ

यएषपरंडगमःपरममायिकोमोहयन्विधात्
प्रभुखान्सुरान्दितितनूजवांश्चालयन् पटुः
कपटवामनोवटुकचान्वितःसहृदङस्तनर्थरहि
ताक्रियेतिचकथंनचित्रंमहत् ९ ॥

पादिना कपटवामनोबलिध्वंसनेप्रवटेलुकादिका
यंकचैवंचितइतिबालस्वरूपनोक्त बटुशब्दस्यार्थस्य
मी अत्रविधात्प्रमुखानित्यत्रधकारेभंगेद्रेफेदेतिपिं
गलसूत्रेणपकारेफसंयोगेप्राग्वर्णस्यलघुताभिधाने
तथाचकालिदासोपिप्रभृतीनप्रवरूपमनीयवत्केति
सरस्वतीकण्ठाभरणेपि यदानीअप्रवनेनसंयोगादेवो

स्वम् नञ्चन्द्रोभङ्गःमप्याहस्तदादोषायस्तस्यश्रति ॥
अथेदानीविधिशोचनपूर्वमनुग्राह्यानुग्रमधिकृतेनहृदंगे
चति यश्चैकश्रति अमितदयश्रतिच्छेदः पभिर्विशेषणैः
सर्वथाप्रयत्नसाफल्येपियजनानामालस्यंतत्रकृतांत
विलसितमेवानर्थश्रतितच्छोचनायहाहेतिवीप्सा नत

यश्चैकोनिखिलात्मकोमितदयःसर्वज्ञताभूषणं
सर्वेज्ञाचतुरश्चसर्वश्रवणघ्राणश्चसर्वप्रियः
पूर्णोकारणईश्वरोमलगतिर्दीनात्तशरणन्नकृत
स्यान्वेषणमस्यरावतजनाहाहाविजृम्भाविधेः ९

असाहससहस्रायोग्युक्तमतिभिःसमूलघातंविधिविली
तमेवज्ञात्वमितिभावः वतेति अनुग्राह्यशोककथन
पूर्वंतदन्वेषणेःप्रयाससाध्येपिप्रयासाभिमननेनवि
स्मययोतकम् हाहेतिविधिविलसितस्यासाधारण्यैभ
वद्योतनार्थम् ९ ॥

अधुनायामैसभक्तिलक्षणसत्क्रियाप्रकृतातस्यामहत्व
सूचनपूर्वकमनुग्राह्यासञ्जनंतत्रार्थादाशास्ते योप्येकश्रति
गभीरत्वंडखगाहत्वंमहत्वंव्यापकत्वं गूढत्वंसाधनार्थश्र
ह्यासंस्थितश्रतिगुह्यामाया परःश्रपिएकोद्वितीयोव्यापी
श्रद्धागुरुशास्त्रचोदितवस्तुसंभावना भक्तिरन्यापेक्षाद्
वैनिरंतरतयातदर्थानुष्ठानं प्रश्रितःसंस्कृतश्रतियाव स्तुतः ४

योप्येकःश्रवणाङ्घ्रिपाणिनयनघ्राणादिशून्यः
परःसर्वान्तर्गोदक्षगभीरमहिमागूढोगुहासंस्थि
तः श्रद्धाभक्तिपरस्कृतेनमनसायश्चेतितंसानवे
थ्यात्वाहृत्कजमंदिरेनियमितेयस्यांक्रियासापरा १०

त मनसोह्ययमेवपुरस्कारोयत्सन्मार्जनबंधनादिनासं
स्कृततं पश्यंतिसाक्षात्कुर्वंति कंजंकमलंमंदिरंदेवाग
रंनियमःसर्वतोनिरुद्धप्रसरहृदितिं यस्यामितिक्रियायां
यस्यांसोशील्यसप्रकृतिस्तस्यभावतत्पर्यायाभक्त्यतिर्दि
ष्टांपरासत्क्रियायांनिष्कामकर्मलक्षणायांभगवन्नाच
निष्ठासंज्ञामापितायांसर्वांपश्रद्धाभक्तिसंस्कृतेनमनसा

हृत्कमलमध्येसन्तरमेवोक्तविशेषणं परमेशं संसाधात
ऊर्वेतिसापराक्रियेतिसंबन्धः ११ द्विवडंस्वडंभवतीति
न्यायाश्रयणेनकथितमप्यर्थंपुनरनुवदति यईशान
इति स्थितइति नकर्मफलादिवत्साध्यस्वरूपः १२ अ
थोदाहरणपूर्वंतत्फलप्राप्तयेप्रतिजानीते तयइति पर
मेशानेईदृशाकर्मणेतिच्छेदः ईदृशाकर्मणानिष्कामक

यईशानःसर्वमहान्सर्वप्रभुरशेषभृत् स्थितः
सर्वनियंताचतत्क्रियाकिंनराजते १२ तयः को
प्यत्रपरमेशानयोर्दृशाकर्मणा निदधातिपदं
(सोधिकारीस्यात्समयोचितः १२

र्मलक्षणेन पदंनि
दधातिस्थानप्रतिष्ठांकुरुते ससमयोचितोधिकारीस्या
त्कालानुसारमधिकृतिपदवींभजतेइतिकालोचित
त्क्रियाभासवैचित्र्याभाससारोनिमित्तमितिसूचितम्
ततश्चफलवैचित्र्येपिनानुग्रहविशेषेणतत्साप्तत्पाति
तदोषप्रसङ्गः नहिकलिस्थितिःकदाचित्कृतेसंभवति त
त्संस्थितिर्वाकलौ नहिसोपितदाभासादन्यः १३ ॥

तथाहीमुदाहरणस्थापना तत्पदेति विदितब्रह्मवर्च
सम् हिमात्वात् चर्यांशिथिलीकृत्यतत्पदाराधनापरः
विस्मारितेति पितामहोब्रह्मा विस्मरणंचसकलवेद
मातुःसावित्र्याअक्षरीभूतत्वात् सर्ववर्णाश्रमस्थितिहेतु
भूतगायत्रीजपारंभेतस्यशिरसिस्थापनात् अथवा त्रि
शङ्क्वाख्यानेऽपूर्वविचित्रनवीनसृष्टिविरचनाद्धियात्

तथाहिविश्वामित्रोपितत्पदाराधनापरः प्रति
विस्मितकर्माभूद्विस्मारितपितामहः १४ तद
र्चनपरःसोपिबृहस्पतिरुदारधीः अर्पितस्वर्ग
राज्यश्रीरिंद्रायानन्दभुक्स्वयम् १५ ॥

विस्मारणं प्रतिविस्मितकर्माब्रह्मवर्चःसङ्कःमतात् १८
तदर्चनेति सोपिइति देवगुरुरवेनसर्वेख्यातःउदारधी
र्धीनांभोनिधिरूपः स्वयमिन्द्रार्पितस्वर्गराज्यस्तत्प्रक
र्षेनानन्दभुग्महानन्तरसम्पन्नसम्पूर्णोइतियत्तदर्चनफ
लमितिभावः १५ ॥

चरित्रमिति कविः शुक्रो दैत्यगुरुः उच्छ्वासेन फूत्कार
मात्रेण इति शुश्रुमेति आगमगम्यमेतत्सर्वमिति तदे
कशरणत्वमप्यस्यार्थस्य सूचयति परोक्षेह्यर्थे आगम
स्यैव प्रामाण्यात् अनुमानादिकं तु परोक्षार्थसाधनमपि
प्रत्यक्षपूर्वकमेव तत्पूर्वकं त्रिविधमनुमानमिति हि सू
त्रकारः सामान्यतो दृष्टाख्यं चानुमानं नामनिरूप्यैवत
ज्जातीयमित्यलमवान्तरप्रसङ्गेन शुश्रुमेति पूर्वेणान्वयं सं

चरित्रं तस्य किं गण्यं येनापि कविनेच्छया मृ
ताः सञ्जीविता दैत्या उच्छ्वासेनेति शुश्रुम १६
वसिष्ठस्यापि परमानन्दमग्नस्य तस्य हि किं
वाच्यं यत्कृपापात्रं रघुवंशोऽधुनाप्यलम् १७

बंधः तत्त्वं च मग्नपादात् वसिष्ठस्येति परमानन्दमग्न
त्वं च सिद्धान्तवादित्वात् यस्य वसिष्ठस्य गुरोर्दयापात्रीभूत
रघुवंशो रघुवंशपरम्पराऽधुनाप्यस्मिन्नपि सर्वमलावदेकलाव
पि अलमिति अलमर्थयोग्याः अलंभूषणपर्याप्तिशक्ति
वारणवाचकमित्यमरः तत्र भूषणभूषिताः सर्वे तस्य
ाः शक्तिमन्तः शत्रुनिवारकाश्चेति फलितम् १७ ॥

मानना माननाभ्यासः मुनीनां पूजनीयः सन्महर्षिमण्ड
लेनितरां राजते तत्सन्धेमावप्यकां पदवीं भजते इत्यर्थः
१८ अतिज्ञातमर्थं निगमयति अत इति उद्दिश्य नाममा
त्रेणोद्दिश्य ईदृशाः महदणुकर्मलक्षणः तत्र महत्त्वम
णुत्वं च कर्मणः फलतो बोध्यम् १९ इत्यं चेदं फलितमि

भरद्वाजोऽपि स मुनिः सदा यन्माननापरः मान
नीयो मुनीनां समण्डले राजते तराम् १८ अतो
महदेव पि वा कर्म किञ्चित्करोति यः तेनेश
मादावुद्दिश्य कार्यं आरभ्यं ईदृशः १९ न का
मानामवसरो बहिर्देयः कथञ्चन यथा नारा
न्नराणां हृषीकाणां समुद्भवः २० ॥

त्याह नकामानामिति कामानामैहिकामुष्मिकाणां
ईश्वरार्पणपूर्वं सर्वव्यवहारवर्तनी वर्तयितव्येति भावः
कामावसरदानेनर्थमाह यथेति समुद्भवतीति हृषीका
तद्रूपीभवेन नानर्थप्रसङ्गसम्भवात् २० ॥

प.सं
६८

64

कार्यकारणसूक्ष्मत्वादन्येन साधितमर्थं द्रढयति त
थेति समाधेयं समाहितैर्भाव्यम् तानवं शैथिल्यमाय
त्वम् जैत्रंतत्पदार्थ्यम् इतिसमाधानफलंकामतानवं
तत्फलंपरपदप्राप्यंतानवेनचपदार्थ्यमितिशास्त्रार्थस्

तथाबुधैःसमाधेयंकामानांतानवंयथा । य
थाचतानवंतेषांतथोच्चत्वंहितत्पदे २१ वि
चारणीयंविबुधैर्विमृश्यापिपुनःपुनः । काम
नानांसमूलंचविनाशःस्याद्यथाध्रुवम् २२

लोविरोधः पार्यन्तिकस्त्वविरोधःस्फुटएव २१ अभी
प्सितमर्थंपुनःपुनरहर्दिसमाविशतीतिचूर्णमानःपु
नरप्याह विचारणीयमिति किंविचारणीयमित्या
ह कामनानामिति २२ ॥

समूलंविनाशःइतिप्रतिज्ञासिद्धयेमूलंनिरूपयतिआन्तरी
ति अनुभूतार्थविषयानुवेधोवासना साचकामनानांमू
लंयावद्धिसर्वादिसाधनवस्त्वनुवेधोनस्यात्तावत्कथंतत्त
द्विषयानुधावनंस्यादितिवासनैवमूलंकामानां तत्र
तन्मूलकर्तनात्वासनारूपमूलच्छेदात् नरोमनुष्याः
कामःसन्नपिरपदेपरमार्थसत्येपदवस्तुनिष्कामःतत्प्राप्त्यर्होभ
वेत् अकामःसन्सकामइतिचविरुद्धद्योतकम् २३ त

आन्तरीवासनामूलंतेषांतन्मूलकर्तनात् । अ
कामःसन्नरस्त्विहसकामःस्यात्परेपदे २३ तन्मू
लकर्तनोपायोचिन्त्यतेतेषांनिगद्यते स्वाधीनास्ता
त्विहोपायंनिर्निमित्तंहताजनाः २४ ॥

न्मूलकर्तनोपायकथनपूर्वंजनानांमन्दभाग्यत्वंशोचमा
नआह तन्मूलेति एतेषांकामानांतत्रचतन्मूलंतन्मूलंवा
सनारूपंमूलं निगद्यतइतिव्याख्यातंदिशिः यथाक्रमम् नकिं
चिदपिचिन्तयेदिति साइतिअचिन्ता निर्निमित्तमितिस्वा
धीनत्वादुपायस्यतावतानिर्निमित्तंनेच्छाप्रयासाभावात् ह
ताःनष्टाः २४

इत्यंतिथिवाक्यकल्पं शिवास्थानीयं वाक्यसन्दर्भमप
भ्याप्यार्थवादवाक्यकल्पं शेषस्थानीयं वाक्यसन्दर्भ
मुदाहरणीकरोति अत्रापीति तत्रप्रसिद्धसाधर्म्यात
साधर्म्यवैधर्म्याभ्यां दृष्टान्तवचनमुदाहरणमित्युदा
रणलक्षणम् साधर्म्यवैधर्म्याभ्यां व्याप्तिग्रहणस्थानं
दृष्टान्तः साहचर्यनियमश्च व्याप्तिः तत्र साधर्म्याद् दृष्टा

अत्राप्युदाहरन्तीममितिहासं पुरातनम् । ख
लहर्मध्यदेशीयो राजा यत्र हि वर्ण्यते २५ ॥

न्तवचनेनोदाहरणसिद्धौ वैधर्म्यदृष्टान्तस्तु वैपरीत्येन
स्वयमूहनीयमित्यभिप्रायैः प्रायेण साधर्म्योदाहरणं
स्वीक्रियते इति न तत्कथने साध्यादाशङ्काम्
इति साधर्म्येण व्याप्तिस्थाने संस्थापयति खलह इत्या
ना मध्यदेशीय इत्यनेन समग्राङ्गीतिवर्तनीचाणत्वमस
सूचयति २५ ॥

इति कथापीठबन्धं विधाय कथां प्रस्तावयति मध्यदे
शे इति मध्यदेश इत्यनेनार्यावर्तो लक्ष्यते खलह इति
नामधेयेनाप्यस्यानीतिवर्तनीचतुरत्वं बोध्यम् तथाहि
खलान्हनाति सम्यग्गृह्णातीति खलहः उद्धतमनोऽय
तमतिः तत्त्वमेव साधयति यपक इति एकोऽसहायो
पि व्यवहारवर्तन्यां दिवेस्वरादौ लोके सद्वितीयकीर्तिश्च

मध्यदेशे नृपालोऽभूत् खलहो नामधेयकः । यप
कोऽपि स्थितो भूमौ कीर्तिमूर्तिर्दिवेवसत् २६

रीरोऽवसत् स्वर्गादावपि गीतकीर्तिरित्यर्थः दिवशब्दो
दन्तोऽप्यस्ति यथा दिवौकस इत्यत्र २६ स इति तातक
स्मिंश्चिद्दिने कंचिद्दुर्नयं दुर्दान्तं मदोद्धतं प्रतिकान्तवा
व्यवहारवर्तनि मन्यावधे कारागृहापराधमद्दिश्य भद्रावे
ऽग्रजनादिहस्तदण्डाधिकारिपरुषानेनोडर्नयो वेलायां
मत्सम्मुखं दण्डस्थानं नीतस्तान्राजनैर्दण्डमितिनज्ञापया

पसं
९९

मास दण्डमर्हतिदण्डः आगस्कारी तेषां स्थानं दण्डशा
ला इदं च साङ्केतिकं नाम तेन दण्डमशास्मानां तत्रैवो
चनादिपूर्वं पारितोषिकादिकमपि तत्र क्रियत एवेति
किंचिदवयम् भाजनं तो त्रम् यदि त भाजनशब्दो गौ
उनद्रव्यपवरु इति कथ्यते तदा कशाभिरिति पाठः

स जातु दुर्नयं कंचिदुद्दिष्य पाल्लमवान्भटान्
दाण्डस्थानमसौ नीत्वा भाजनैर्दण्डतामिति ॥२७
स च संमुखमानीतो राज्ञा याचुक्रुशे भृशम् भृ
त्यांश्चाश्लीलदानादि भृत्या भृशमथार्चिचत् ॥२८

स चेति दुर्नयः राज्ञे आचुक्रुशे इति च्छेदः क्रुधद्रुहेर्ष्या
यार्थानां यं प्रति कोप इति चतुर्थी कर्मणि भृशमिति
द्वितीयैतत्र बाह्लीकिः भृत्यान्दण्डहस्तान् अश्लील
दानादिकमेव भृतिर्दण्डे चेतनं तया अभ्यजयत् तेषाम
चिताश्लीलादिकं बहुदेवविदय इत्यर्थः ॥२८ ॥

ततश्च शीर्णेत्यादि उन्मोच्यतां रज्ज्वादिबन्धनेभ्यः त
तश्च स्वेच्छया सौ विहरतां अत्र च असौ शान्तचित्तः नि
ष्कामकर्मा परार्थकर्मव्यवहारवर्तिनी वर्तयितं प्रशस्तः
दण्ड्यानां च दण्डधारणात्परलोकशुद्धिः अदण्ड्यानां च
पराभियोगोन्मोचनादिहलोकशुद्धिः स्वयं च निरपे
तः शूणपाण्डपोण भय सरणि यतिकान्तो मध्यसरणा

शीर्णपाण्डैर्गतच्छायैरैति भृत्यैर्नृपस्त्वसौ
उन्मोच्यतां विहरतां स्वेच्छयेत्यवदन्नृपः ॥२९
इत्थं गते च सर्वे ते राजानो वशवर्तिनः तथा
चक्रुः स चोन्मत्तो विजहार निजेच्छया ॥३०

रोहोन्मत्तः अनेन च क्रूपाखेणाको यो न निनिमित्तं सा
पितो यदि दण्ड्येत तत्स्वार्थमस्य दण्डधारणमिति म
ध्यमसरणिभ्रंशः स्यात् तथा च सकामविनिनादनर्थमा
जनं भवेदिति तेनास्तु उन्मोचित इति भावः ॥२९
इत्थं गते जाते सति स च दण्डः उन्मत्तः पापमुक्तबुद्धिः ॥३०

प·सं
९०
67

अथेति अधिकृतकृत्येन्यायव्यवहारे स्थीभूते लब्धा
वसरत्वात्किंचिद्वक्तुकामाये रहस्यविदस्त्ववसरवेदी
द्वापरः संशयः विश्वासो मम तावद्बुद्धिर्हितं शास्यं मे
तिबुद्धिः देहिशामिति भृत्यानां प्रभुषु वाग्व्यवहारो वि
त्यकथनं जानुभ्यां धरणिंगतेति शरीरचेष्टोचितत्व
थनं २२ सचेति सचराजाकृतरहस्यज्ञोंतराशयाभि

अथाधिकृतकृत्ये च स्थीभूते रहस्यवित् जा
नुभ्यां धरणिंगत्वाथ्यस्तः कोपि जगाद तम् २१
कुशलं ते महाराज हापरेणा कुलोस्म्यहम् वि
श्वासो मयि चेत्तस्मात्किंचित्पृच्छामि देहि शं २२
स चाकृतरहस्यज्ञः स्मितो वाचाथ तं प्रभुः अभ
यं कथ्यतां सम्यग्येन दोलायितं मनः २३ ॥

प्रायत्तः किमस्य पोष्फुरीतिश्रुति विशेषज्ञोत्ता तत तदभि
प्रायः ज्ञाताभिप्रायत्वादेवेषद्दुस्मितो वाच अभयं ते द
त्तमिति शेषः अत एव येन संशयेन ते मनो दोलायितं दो
लेव व्यवस्थितं तत्सम्यग्भिर्भयं कथ्यतां विधिरिकलि
तं वाचास्फुटं निगद्यताम् २३ ॥ ❀ ॥

पृच्छामीति एकादशेति श्लोकाद्यनुभावकथनं प्राचीनइ
ति येन दण्डस्थानं शापितः लयोनाशः २४ दण्डेति प्रा
चीनएकः द्वितीयः श्लोकाकोशनलक्षणः इतिदण्डद्वैगु
ण्यमापन्नो प्यसौ यत्पूर्वापरायतोपि प्रकृतत्र को हेतुः अ
थवा हेत्वभावेरथ्यंकानीतिः हेतुर्न लभ्यते राजनीते स्वरा
जानएवाभिज्ञाः यदाहभारविः निसर्गदुर्बोधमबोधवि

पृच्छामि ते महाराज दुर्भेद्यस्यास्य कृष्यतः २
काद्यस्यापराधेसौ प्राचीनोपि लयंगतः २४
दण्डद्वैगुण्यमापन्नो प्युत पूर्वापरायतः अत्रो
सौ कोत्र हेतुर्वा नीतिः का वा कथं स्थितिः २५

क्कचाः कभूपतीनां चरितं कुजन्नवदिति अथवा हेतुः क
श्चिदस्तु नीतिर्वा पिकाचनास्तु परंत्वीदृग्व्यवहारो नदृष्टो
वेत्याह कथं स्थितिः सामान्ये नोकैरप्यभावः दण्डानां
दं कर्ण कथं राज्यस्थितिः प्रजास्थितिरप्यस्यात मर्या
दावा न प्रजाराजेकर्तव्यमुक्तदभावेचतासामपि विशी
र्णप्रायत्वं राज्ञोपिच २५ ॥

प.सं.
९८

इत्थंसराजानिर्वर्णपिनिशम्यप्रकर्षेणान्यायोपेतमुवाच त
र्कऊहापोहलक्षणःनिशम्यश्रुत्वाकृतीभवकृतकृत्योनि
स्सयवान्भव ३६ तदेवाह परम्परागतेति यामेपित्र्यप
म्परागताराज्यस्थितिर्ममपाल्याज्येष्ठानुमतत्वादवश्यप
लनीयानतुस्वेच्छया विक्षेप्तुयत्नात्मनिष्कामचेतानै

निर्वर्णराजाप्रोवाचसत्यमुक्तंपरंतुमे तर्को
ऽयःस्थापितश्छिन्नेतंनिशम्यकृतीभव ३६ प
रम्परागतायामैपाल्याराज्यस्थितिर्मम निष्का
मचेतास्तदिमांपालयामिमतंमम ३७ इत्थंग
तेनकिञ्चिन्मयेहिकामुष्मिकंभयम यतो
स्मिकृतकृत्योस्मीशाङ्गिपद्मरजोर्चनात् ३८

कर्मसिद्धिमवाप्तकामःपालयामीतिममसतम् ३
इत्थंगतेइति निष्कामचेतस्कत्वात् मेममपैहिकामु
ष्मिकंभयं पेहिकंपारलौकिकंचभयंनकिञ्चित्कामे
तुकत्वाडभयस्य ईश्वरप्रसन्नयेसर्वकामानांतदर्पणा
द्रयोस्मिकृतकृत्यश्चास्मि ३८ ॥

तथापिपरार्थंप्रवृत्तस्यतवदण्डधारित्वमुचितमेवेत्य
त्राह यत्रापीति सत्यंदण्डधारित्वंममोचितमेवपरार्थत्वा
त् तथापितत्राज्ञानेनेरेतीवानर्थहेतुत्वमित्याह आगतेने
ति अनेनागतेनदंडेननरोपितंनिकृष्टमस्मरणंकृतम् त
त्रहेतुःसम्पागिति ३९ अपराधेतिव्यापितंश्चवश्यका

यत्रापिदण्डधारित्वंममैतत्त्वागतेनहि अने
नरोपितंसम्यङ्गिणिष्पष्टावच्मिते ३९ अ
पराधानुसारेणयददादण्डयतोस्म्यहम् आ
क्रोशतातदानेनचिन्तंव्यारोपितंमम ४०. दं
डहैगुण्यमासोपिमयायोन्योचितस्तथा सा
र्थमेस्यादिदंवक्त्रादमितोन्योचितोस्तथ्यं ४१

र्थंदंडपराङ्मुखंकृतं ४०. प्रथमंपरोक्तमपराधीसंप्रति
संमुखमप्यनुचितकरणाद्दंडद्वैगुण्याभिः सन्यापरापि
त्वादधुनादंडधारणंस्वार्थमेनपरार्थमितितत्त्वाविविचा
यमुन्योचितः उन्योचितइतिपौनरुक्त्यंभगवत्कृपा
सञ्जातवुद्धिविवशत्वेनसम्भ्रमंसूचयति ४१ ॥

पं·स·
९९

तथाहीत्याह आपातइति आपातआरंभोऽविवेकावस्था उग्रमप्रचण्डदण्डोभूत्वा धियाविचिंत्ययच्चेष्टितमयमुन मोचितइतियत्तद्विहितमेवविधिसम्बद्धमेव तदेवचेष्टि तंविचारपूर्वकमनुवदति ह्यइति असौमयास्वीकृता निष्कामतानैष्कर्म्यसिद्धिर्हरेस्तु त्वकैवहेति नकेव

आपातेमुंदण्डयितमुग्रमप्यथधियास्वयम्
ह्यसौनिष्कामताहरेस्त्वन्नासक्तत्वमेवमे भवे
दितिविचिन्त्याशुविहितंममचेष्टितम् ८२
तथाहीश्वरतोषार्थयत्नोभून्मेप्यहर्निशं आ
कृत्यातनयाहरेसत्वनर्थश्चाधिकः ८३

त्वंयावदत्यन्तासक्तत्वंभवेदिति ८२ उक्तमेवार्थंवि शदयति तथाहीति ईश्वरतोषार्थंस्वयमकामतया ः पुनरनयाकृत्यास्वार्थदण्डधारणेनममनैष्कर्म्य त्वः हरेतदाशापिनास्तीत्यर्थः परंतुअधिकोनर्थइ तिवैषम्यम ८३ ॥

इदानींकामिहृदयानन्तवर्णनेननैष्कर्म्यसिद्धिमधिकयति यःकश्चनेत्यादि यत्तोयःकश्चनलोकेविहिताविहितका रीसकामःकामवासनाग्रस्ताशयःसोतःप्रपमार्गादी श्वरप्रकल्पितलक्षणाद्विहिताविहिततदुभयप्रमिविलक्ष णान्मर्थ्यमार्गाद्दूरितःदूरीभूतःअतएवपरागास्यः वहिर्मुखोस्माच्चविभोःपराङ्मुखः अथचपरागोरजः

यःकश्चनसकामोतःप्रपमार्गात्सदूरितः
परागास्योविभोरस्माद्राजनदुःखसन्ततेः ८४
सचैतस्माद्धरेःषोत्यवाकस्सुकेन्यनदीयितः
प्रचण्डःक्रोधचण्डालनिन्ताग्निर्मोहदह्यत्वकिं ८५

कर्दममितियावत् पङ्काद्धिःतमस्वःडःखसन्ततेःपा त्रंस्यात् कर्मानुगुणेप्यनदेवोवामनुष्योवापरलोकेस्था वरान्तोवासर्वथाडःखभाजनम् तथातिशयदुःख त्वादेवभूयस्यापिडःखतात् ८८ सचेतिप्रपन्नस्यादृश्यस्य गाढरोषोत्यायासोवाढिःशुद्धवाणीसेवस्सुकेन्यनंते

नदीपितः प्रज्वालितः मदीयः कठोरक्रोधचण्डालनि-
याग्निः किंमांनदहेदपितभस्मीकुर्यादेव ७५ किंचन
केवलमीश्वरपराङ्मुखत्वमेवापितप्रतिज्ञातार्थानिर्वा-
हान्नरकपातोपीत्याह स्वीकृतमिति तद्भ्रष्टतः स्वीकृता-
र्थपरित्यागात् अस्यमे इति बुद्धिर्बोधयि[illegible]कारिणः

स्वीकृतंयन्मयाकर्मैश्वार्थ्यंतद्भ्रंशतोस्यमे न
कथंनिरयेपातइतिबुद्ध्याविनोस्म्यहं ७९ ॥

निरयेनरके इतिबुद्ध्यामात्येनाहंपातोन्मुखः सन्नविनो
रक्षितः पालितोस्मि इतिबुद्धेरिदंमाहात्म्यमितिबुद्धिमेव
श्लाघते इतिबुद्ध्याविनोस्मीति अथवाविनः प्रीणितोऽस्मि
बुद्ध्यामम सर्वतोयतोनिवृत्तेरित्यर्थः ५९ ॥८॥

एतदेवद्रढयति तथाचेति कामएवाभिलाषमात्रेण
पिमालिन्यात्पादकत्वाज्जारउपपतिस्तेनईषदिति उष्ट्र
त्वात्सभयं विवेकालयाशङ्कया तदासौप्रकृतिः सौप्री
त्यलक्षणानैष्कर्म्यसिद्धिर्ईरमेति यतोसौप्रीतलासमदि
तकारिणीकामप्रसक्तोचरागद्वेषसन्नाक्रान्तः प्रीतलत्व

तथाचकामजारेणयदेसद्दर्शितंमुखम् तदा
सौप्रकृतिर्ईरमेतिसाध्वीवप्रीतला ७१ इयं
चिन्नैवधार्यंतैः स्मृतकलङ्कवचोमम ईदृकक्रि-
याया: करणत्यागपदोचितोपरा ७८ ॥

म् अत्रदृष्टान्तः साध्वीवेति साचप्रीतलाजारमुखदर्शि-
नेनैवहृरमेति ७१ उक्तमर्थसङ्कलयति इयमिति
ईदृकक्रियापरैः कर्तव्यात्तथाकथितापिपरंतद्विवेके
क्रियमाणेजैविनेयगायत्राजैवेति ७८ ॥

नन्वतीवेदं साङ्कःदामापतितं यत्कर्मणामपिफलादात
त्वं हैगुण्यद्गुणाम्नावपिसर्वथामोहोऽस्यसन्नातइतिवि
त्रंविवेकचरित्रंचित्रतरमहद्विवेकीत्याशंकासमर्थय
ति अनेनेतिति ततःशङ्कितसमर्थनपदे ईदृक्याकःक
र्मफलं कल्पान्तरैरपिचानुभावःसाक्षात्याप्यःअत्रैर
भूतमर्थान्तरन्यासमाह नकदाचिदिति विलीयेतेफल
मदत्वामथेभ्रष्णतः एतन्निबन्धनमात्रिलोकीरचनाया

अनेनतीदृक्याकोनुभावःकल्पान्तैरपि नक
कदाचिद्विलीयेतेउभेसकृतडष्कृते ४९ तस्मा
स्मात्सदावधेयंतत्विडम्बाभूतिमिच्छता अवधा
नधनामर्त्यास्तद्धीनाःपशवःस्मृताः ५० ॥

एतद्विलयनेसैवनस्यात्कदाचिदिति सर्वथाप्यवि
यनमकृतम् यतोस्तानामिदीप्तशिवयापिनास्यविलय
येनेदंतद्धि भोगतरत्यमियुक्तोक्तेः ४९ फलितमाह त
स्मादिति विडम्बाविवेकिनास्वरूपविभूतिमिच्छता त
स्माद्धेतोःसदावहितेनभाव्यम् अत्रार्थान्तरंन्यस्यति
अवधानेति तद्धीना अवधानहीनाः ५० ॥

अनवहितात्मोचमानोवधानोत्कर्षसूचयति पशुभ्य
इति अथमत्वमेवस्थापयति सइति सपशुर्यतस्तेनपशु
जन्मनाकर्मदक्षपणोभाविमन्यथाभावात् तदैवतस्य
पशुत्वंनान्यदा येतत्ववधानहीनास्तेतदर्जनसंसक्ताःप
शुत्वप्राप्तिहेतुकर्मार्जनसंसक्ताभाविपशुभावाइतिम
हदन्तरमनयोरित्यर्थः अतस्तेकथंविमानिनःपश
वःपश्वाधिक्यात् अथचकथंतेविमानिनःशृङ्गिणः

पशुभ्योप्यधमास्तेवासकर्मक्षपणोयतः ते
तदर्जनसंसक्ताःकथंतेसुर्विमानिनः ५१

पश्वभिज्ञानसहिताःयेनतद्दर्शनेनकदाचिन्महानुभवा
नुग्रहभाजनतासम्पत्स्यात्तन्मादोभवेत्तदभिज्ञानमपिते
षांनास्तीत्यर्थः शृङ्गपुच्छरहितास्तेपशवइत्यर्थः ५२
अवान्तरवाक्यसारसमुच्चयमाह तस्मादिति अयम
र्थःदण्डस्थानेपाशोदण्डोनामयंनिर्दोषंनिग्र
तीतिनजानीतेराजानंक्रूरदृष्ट्याविलोकयेत् यतोमासो
दंडचर्याराज्ञाविधेयमानासैकर्मणांअवश्यभोगतानां

प०सं
७२

72

निष्कृतिः प्रायश्चित्तं ततश्चेद्दलचिता लघीकृता चेदत्र
अपरलोके कौशलं लोकानन्दं निरर्गलत्वं च सलोका
नाम् प्रायश्चित्ते च क्रियमाणे ऽप्येवपि कल्मषं बहु भव
तीति येन तस्य न कदाचनापि नाशः तीर्थादिसेवा हि पा
पक्षालनाय तत्रैव पापमाचरतां ऊर्ध्वयोन्यानन्त्यमिति

तस्माद्दरुणो नराजानं जावद्दृष्ट्या विलोकयेत्
कर्मणां निष्कृतिः सा हि लचिता मत्र कौशलं ५२
इति राजसुखोक्तीतां पीत्वासौ वाक्सुधां ततः वि
शुद्धसत्त्वो नितरां बभूव विपुलाशयः ५३ ॥

दारुवेलायां पापनिष्कृतिरूपायां तत्र क्रूरदृष्ट्यावलोक
नमतीव दुःखदमिति भावः ५२ असौ विपुलाशयः
विशुद्धचित्तो निवृत्तसंशयो नितरां निःशो
कं बभूव ५३ ॥

दृढमविचाल्यं अन्ते शारखसमाप्तौ तत्स्थानं त्रुणाड्डेणा
भयोत्तीर्णो ५८ इति श्रीवीररत्नशेखरशिलाप्रभायां पद
सङ्केताख्यायां द्वितीया प्रभा २ ॐ श्रीगणेशाय नमः ॥
अथाधुना दैन्याक्रन्दनमेव चेति यदुद्दिष्टं तृतीयं रत्नद्वारं
तल्लक्षणोदाहरणाभ्यां स्फुटीकर्तुमवतारयति द्वारं तृ
तीयमिति इदं च द्वारमीश्वरादाशीराशंसनात्मकं तच्च

इत्थं विचिन्त्य मतिमान्दृढमत्र मास्ते दैन्तं स्पशी
लितजनः परया प्रकृत्या संस्थाप्य कीर्तिमतुला
मविनश्वरेन्ते तत्स्थानमाप्य न पुनः समवेदनर्थी
५८ इति श्रीवीररत्नशेखरशिलायां सौजन्या
ख्यं द्वितीयं रत्नम् २ द्वारं तृतीयमथ यदीश्वराशीः
प्रार्थनायतः दैन्यविनमितः कामसिद्धिसम्या
द्भूतं भवेत् १ ॥

यावद्दीनाक्रन्दनेन सततमस्मद्री
क्रियते तावत्कथं समभवेदिति दैन्यविनमितिरेव तन्मूल
मिति दीनाक्रन्दनलक्षणमेवेदं तृतीयं द्वारम् अथ निम
लं प्रयोजनमाह कामसिद्धिरिति कामानामभीप्सिता
नां सिद्धिः सम्पत्तिस्तस्मादीश्वराच्छीघ्रं भवेत् १ ॥

प.सं.
२३

अथास्याग्रागमप्रामाण्येन सत्फलदातृत्वोक्त्यनन्तरं क
र्तुः कृतकृत्यतां चाह मच्छ्रद्धेति यः कश्चिदेवं श्रुत्वा श्रु
तितोवधार्य दृढनिश्चयः तत्कालं सम्यक्तावसम्यगेवा
विशाल्यमनाः वित्तस्मि दैन्याक्रन्दनोक्तिरेव सती सर्वकृत्ये
न्मोचयित्री ऊज्झिका यन्मोचनी तां स्वशायगां स्वह
स्तगतां विधाय तया चोद्घाटितमन्मोचितं यद्भाग्यं म
त्सौभाग्यैव कोहं तत्र स्वलभां सत्समयदमाप्य प्राप्य स्व
यं निश्चिन्तः सन् कर्तव्यान्तरयोरभावात् कृतार्थः स

मच्छ्रद्धा भजतां फलत्यविकलं कामानवश्यं पद
ध्यामस्तु तैवं दृढनिश्चयः स्वशायगां वित्तस्मि सत्कं
चिकां कृत्वोद्घाटितभाग्यकोहं स्वलभामाप्याथ
सत्संपदं निश्चिन्तः स्वतरां परोपकृतये जागर्ति यः
देशात्परंभिन्नंतथेदंपरमेशितुः ७ ॥

रकरणंनदोषाय ततश्चयदयंस्वस्यप्रकाशनेपरंनापेक्ष
तइति तदनपेक्षणंस्वातन्त्र्यपरवैलक्षण्यापादकमेतदुच्य
ते अथचपरमेशतापादकंयदस्यपरप्रकाशनेपिपरानपे
क्षणत्वलक्षणंसारभूतंस्वातन्त्र्यंतत्रापिस्वरूपस्यैवकल्पित
त्वात्तद्व्यपदेशोपिनकाचित्तवएवेनेत्याह युगपद्वह्नेरिति
अयंभावः स्वमेवरूपंफलभेदाद्धारोपेणशक्तिरिति क
ल्प्यते नत्वसौवस्तुतःपदार्थान्तरंकिञ्चिदिति वपुरितिव्य
पदेशात्परंभिन्नमितिचोक्तम् ७

प॰सं॰
३॰२

इदानीमस्यवस्तुनः शास्त्रान्तरेणनामनानात्वमेवनतत्परमा
र्थतोत्रकस्यचिदपह्नवइतिसूचयन्निष्कृष्यस्वरूपंदर्शयति य
त्सारमिति जडचेतनभेदभिन्नानांग्राह्यग्राहकाणांयत्प्रका
शात्मकंरूपंतस्याप्यप्रकाशवैलक्षण्यात्तेपिकेवमेवेति त
थाहि सारमिति अतएवहिसारं तच्चेयमेवविमर्शशक्तिः त
थाचाचार्याभिनवगुप्तपादाः अन्तर्विभातिसकलंजगदा
त्मनीहयद्वद्विचित्ररचनामकुरान्तराले बोधःपुनर्निजवि

यत्सारंस्वात्मसत्ताभाशक्तिःस्पन्दःपराकला मा
हात्म्यंपरमानन्दइतिपर्यायनामभिः ८ शा
स्त्राणांभेदतोभिन्नंतस्यैतस्याभिधंपरम स्वात
न्त्र्यमाख्यमेतस्यवैभवंचापिकथ्यते ९ ॥

मर्शनसारयुक्त्याविश्वंपरामृशतिनोमकुरस्तथातुइति ८
तथास्वात्मसत्तेति सत्ताभावःसत्ताभवनकर्तृतासर्वक्रिया
स्वस्वातन्त्र्यंसाचसर्वभावानांयत्पारमार्थिकंरूप
तद्रूपा तथाचसासैषास्वःसर्वेषांभावानांयश्चात्मावेद्यताख्यः
सएवासौप्रकाशः तंविनाप्रागिवार्थोऽप्रकाशःस्यादिति
नीत्यासर्वानुप्रवेशकत्वात् अतएवशिवदृष्टौआत्मैवसर्वभावे
षुस्फुरन्निर्वृतचिद्वपुः अनिरुद्धेच्छाप्रसरःप्रसरद्दृक्क्रियः

शिवइतिशक्तिशक्तिमदभेदाध्यवसायेनविमर्शप्रधानं
शिवतत्त्वमुक्तम् इत्थंच प्रदेशेणापिब्रह्मणःसार्वरूप्यमन
तिक्रान्तोविकल्पश्चेतिश्रुतिवचनमनुभवसिद्धम् तथा
चसति नवाहंनामकिञ्चनपरमार्थतोविद्यतेअथात्मनः
प्रकाशात्मकत्वात्प्रकाशात्मनोर्थात्मत्वात् अतएवाभिप्राये
णभगवान्व्यासोपिगीतास्तुतवान् योमांपश्यतिसर्वत्रस
र्वंचमयिपश्यतिइति तथा सर्वभूतस्थमात्मानंसर्वभूता
निचात्मनीतिचेतिविमर्शएवोद्यन्तृताख्यःस्वात्मसत्तेतिसि
द्धं आभेतिआभानमाभा तच्चान्तःस्थितस्यबहिरात्मना न
ह्यन्तःस्थितिंविनाकदापिबाह्याभासोयुज्यतेइत्यन्तः स्थि
तत्वंसर्वदास्तीतिबोध्यम् तच्चतत्रसकृद्विभातोयमात्मेति
नीत्यासकृदाभानलक्षणंपरामर्शनमेव तथाच प्रमात्रै
कात्म्यमान्तर्यमित्युक्तंभट्टपादैः शक्तिरितिव्याख्यातप्राय
म् स्पन्दइतिकिंचिच्चलनरूपा तथाहि प्रकाशस्वरूपंहि
मनागपिनातिरिच्यते अतिरिच्यतइत्यचलमेवाभासभेद
युक्तमिवचभातीति तथाचभट्टकल्लटपादाः गुणादिस्पन्द
निष्यन्दाःसामान्यस्पन्दसंश्रयात् लब्धात्मलाभाःसततंस्यु
र्ज्ञस्यापरिपन्थिनइति सततस्फुरत्स्वरूपमेतत्तत्त्वमित्युक्तं
भवति अयमेवचस्फुरत्तेतिकथ्यते पराकलाइति कलना

प॰से
३·४

त्मकत्वात्कलेतिकलनाचविमर्शनात्माविमर्शनेचपरवा
क्छक्तिमयं तथाचहरिः नसोस्तिप्रत्ययोलोकेयःशब्दा
नुगमादृते अनुविद्धमिवज्ञानंसर्वंशब्देनगम्यते वाग्रू
पताचेदुत्क्रामेदवबोधस्यशाश्वती नप्रकाशःप्रकाशेत
साहिप्रत्यवमर्शिनीति तस्याश्चपरात्वंसर्वप्रतिष्ठाहेतु
त्वात् माहात्म्यमिति पूर्णतासाचबहुभवनलक्षणा त
च्चकर्तृत्वात्कर्तृत्वंचात्मपरामर्शलक्षणं तथाच पराम
र्शाद्धेतोर्विश्वनिर्भरोयंनीलादित्वेनचकास्तिइति ततोयं
महात्मेतिकथ्यते यथोक्तं परिच्छिन्नस्वभावत्वंजडस्याकि
ललक्षणम् जडाद्विलक्षणोबोधोयतोनपरिमीयतेइति
तथाचेश्वरप्रत्यभिज्ञायाम् आत्मानमतएवायंज्ञेयीकु
र्यात्पृथक्स्थिति तेयंनत्विति परमानन्दइति अन्यान
पेक्षित्वैवपरमार्थतआनन्दः पूर्णश्चानन्दइति साचेयमे
वसारभूतापराशक्तिः तथाचमुनिः सर्वंपरवशंदुःखंस
र्वमात्मवशंसुखमिति इत्थमनेकनामकथनेशास्त्रेष
स्यव्यापकत्वेनप्रसिद्धतेत्याशयइत्याह इतीत्यादि यदि
त्यनूक्तं स्वपक्षेविधेयतयास्वरूपकथनार्थमवतारयति
तदिति यदेतद्व्यासस्वभेदेनविशेषकलनार्थंवासारादि
नामकंवस्तुतदेतस्यमहेश्वरस्यचैतन्याभिधेयपरंरूपंस्वा

तन्त्र्यंमननव्यापेक्षित्वलक्षणमीशितृत्वमैश्वर्यमितिकथ्यते
अनेनैवचास्यविविधभवनाद्वैभवमितिचेदंकथ्यते तथाहि
चेतयतीतिचेतनइति याचासौचितिक्रियासास्वात्मप्रत्यव
मर्शस्वभावत्वाज्जडाजडक्रोडीकारेणभासमानाचैतन्यमि
त्यन्यधर्माथःकरणात्मकेनभावप्रत्ययेनाभिधीयते तथा
हि घटंजानातिदेवदत्तइत्यत्रघटविषयज्ञानजननेदेवद
त्तःकर्तेतिशब्दबोधेघटेनघटात्मनिनकिञ्चिदपिचमत्
क्रियतेतदात्मनानपरामृश्यतेनचेतनात्मनाप्रकाश्यते त
तश्चनापरिच्छिन्नतयाभास्यते ततोसौजडइत्युच्यते देवदत्ते
नतुस्वात्मन्यहमितिस्वारसिकोयोगस्फुरणाविभूतियोगा
च्चमत्क्रियते स्वात्मापरामृश्यतेस्वात्मन्येवप्रकाश्यतेइद
मितियःपरिच्छेदपतावद्रूपतयातद्विलक्षणीभावेननी
तपीतस्तावदुःखेनतद्रूपतायवभासयोगेनावभास्यतेततो
सौचेतनइत्युच्यते इत्थंचचितिक्रियैवस्वपरावभासनस्वभा
वत्वादेतत्स्वरूपोन्यापिकेतन्यधर्मार्थःकरणात्मकेनभावप्र
त्ययेनाभिधीयते नचान्यधर्मार्थःकरणमस्यन्यूनतायाय
कंतयात्वेनाप्यस्यस्वात्मप्रत्ययाथानात् तथाचानेनास्या
न्यापेक्षत्वेसाधितेविभुत्वनित्यत्वादयोयेन्यधर्मास्तेप्य
नुगृहीताभवन्ति तथाहिदेशकालाकाराभेदाभेदविक

प.सं
३.५
305

ल्यापहृतत्वादस्य परामर्शात्मनः परानपेक्षस्य प्रकाशतत्त्व
स्यावच्छेदमायातमशक्यत्वादिति विभुर्नित्यः सर्वात्मकश्चासौ
इति इत्थं च स्वाधीनसिद्धिकत्वादस्य न परदर्शनेऽत्र प्रमा
णापेक्षा विद्यते प्रत्युत तदधीना तेषामपि सत्तेति सूचनार्थं
मुख्यमिति चैतन्यविशेषणम् नास्यान्यन्मुख्यमिति प्रत्यभि
ज्ञानकारणमपि तु स्वयमेव तदपीति भावः एष चार्थः चैत
न्यमात्मेति शिवसूत्रमालम्ब्य सिद्धपादैर्निर्णीतम् आत्मा
त एव चैतन्यं चित्क्रिया चितिकर्तृता तात्पर्येणोदितस्तेन य

तस्याङ्कुरोन्मुख्यतायां याद्विपञ्चक्तिसोदिता
ज्ञानं क्रियेति यद्योगान्तातकर्मेति कथ्यते १०

ज्ञातृत्वादिविलक्षण इति श्रीतन्त्रालोके अनपेक्षस्य वशिनो
देशकालाकृतिक्रमाः नियता नेति स विभुर्नित्यो विश्वाकृ
तिः परः विभुत्वात्सर्वगो नित्यभावादाद्यन्तवर्जितः विश्वा
कृतित्वाच्चिदचिद्वैचित्र्यावभासक इत्यादि ४ ननु कथमे
षउद्यन्तृत्वेऽभिभावप्रत्ययादिमउद्योग एव परमभिधीयते
यावता सर्वत्रैव ज्ञानक्रियाशक्तियोगान्तात्त्वकर्तृत्वे एव
स्य स्वातन्त्र्यमिति कथ्यते स एष सर्वज्ञः सर्वकर्ता चेति एवं
परसमर्थनायाह तस्येति सत्यं तस्य परमेश्वरस्य ज्ञानक्रिये

एव स्वातन्त्र्यमिति परं तु उन्मिषितविषये ते उन्मेषश्चेच्छाल
क्षणाङ्कुरः स्वात्मभूतसामान्याकारेदन्ताभासस्य विशेषकलना
रूपो यत्र जानाति करोतीति पाश्चात्यो विशेषः पदमध्यारोपय
ते तथा च श्रुतिः स ऐक्षत बहु स्यां प्रजायेयेति बहुभवनेईक्ष
णमिच्छारूपं निमित्तं वदतीति स एषोऽङ्कुर इच्छा तस्याश्चोच्छू
नतावस्था या प्रथमं भाव्यमिति या सा तु उच्छूनावस्था सततोदिता
पि परमार्थतः कलनया उन्मुख्यमित्यभिधीयते स उद्यन्तृताऽ
परभाग इच्छाप्रथमभागलक्षण आमोद इति कथ्यते तथा च
शिवरहस्ये यदा तत्तस्य चिद्धर्मविभवामोदजृम्भया विचित्र
रचनानानाकार्यसृष्टिप्रवर्तने भवत्युन्मुखिता चित्ता सेच्छा
याः प्रथमा तुटिरिति अङ्कुरोऽङ्कमेद्वि प्रथमं द्विपञ्चाभाव्यम्
तामाह येति अयं भावः तस्मिन्निष्टे विश्वलक्षणे कार्ये य
ज्ज्ञानं तत्प्रकाशनशक्तिरूपता चिदात्मनः सर्वं प्रति पत्तृण
मवेयमन्तः करण इव प्रकाशमानं तत्कार्यं यतः सा ज्ञानश
क्तिः ततोऽपि सर्वप्रमातृवेद्यस्थूलकार्याकारसम्पत्तिफलः
समुद्यमः क्रियाशक्तिरिति १० अवगतमिदं यदसौ बुद्ध्या
ज्ञाऽसहजबलोद्रेकादित्यं नानातया अवभासते इति परं त्विय
दूरत्वं अस्यो परमानन्दरूपी प्रेर्णोनन्यापेक्षकः कथमित्थं
गर्होत्र प्रवर्तते नहि परमप्रबुद्धस्यैषोचिती यत्सर्वथाऽनव

प.सं
३.९

यानर्घ्यवस्तुत्यागेनावयवत्वस्वीकारस्तथाशङ्क्यांदलयितुमा
हयुग्मम् सएषइति अयंभावः सत्यमिदमेतादृक्स्वरूपस्य
स्वयमेतादृशोपदृष्टिरनुचितेति परंतुपकाकोनरमामहाम्
तिसिद्धान्तनयेनस्वरूपास्फालनस्यैवैतन्निमित्तत्वात्काप्यग
र्हाकावावयवानवयदोषाशङ्केत्याह उच्छलदिति तथाचसो

सएषपरमेश्वरःपरमवोधरूपोमहात्मैतैकव
पुरुच्छलत्स्ववलशक्तियोगाद्दहिः विचित्रर
चनापटुःप्रभुपदस्समुल्लासयन्करोतिकल
नांपुनर्जडपदार्थसम्भूतये ॥ तदेतत्स्वा
च्छन्त्यंपरमविमलस्फारभरितंपरापेत्तात्मकं
परमकलनामोदमधुरम् समन्ताडहूर्ण
त्पुरपदकदम्बोज्ज्वलवपुर्विचित्रैरूहकूज्वलत
प्रसरउदितस्थ्यामाद्यमइति ॥ युग्मम्

मानन्दः ऊत्सितेऊत्सितस्यस्यात्कथमुन्मावत्तेतिचेत् इ
यप्रसारस्सतोगर्हितत्वमयुक्तिमत इति अन्यत्रापिउच्छल
त्यकुतिःशिवइत्युक्तम् तथापिपरमानन्दरूपमेवकथं
नावभासयतीत्यत्राह विचित्रेति तथातेचकानामविचि
त्ररचनेतिभावः नचतथात्वेपिपरमार्थतःकाचित्तस्यस्वरू

पाङ्कनेत्याह महात्मेतेति अयमाशयः मायाशक्तिवशाद
भेदापरामर्शःकेवलमङ्कनाहेतुः नचततथास्वरूपप्रसर
णरूपत्वादस्योल्लासस्य भ्रान्तिरूपाहितगर्हाभेदापरामर्शनं
तत्त्वनकिञ्चिदख्यातिरूपमात्रत्वात् अतएवोक्तं परमबो
धरूपइति इत्थंसमर्थनायांरचनाक्रममाह प्रभुपदइ
ति अयंभावः असौपरमबोधस्वभावआत्मातावत्प्रकाश
एव तत्रापिचास्यवैभवात्मकंस्वातन्त्र्यमपिप्रकाशात्तएव
तत्रस्वातन्त्र्यंजडाभासपर्यन्ताभासेविश्राम्यतीत्युक्तंजडप
दार्थसम्भूतयेइति जडपदार्थानांसम्भूतिः सम्यग्भूतिःवै
चित्र्याभासःसर्वथानिराकाङ्क्षत्वमितिभावः प्रकाशात्मना
भासेततावद्दहिर्यातिरित्याह प्रभुपदइति तत्राहन्तापरा
मर्शात्मनाभासकत्वंप्रभुत्वम् इदन्तापरामर्शात्मनापुनरा
भासकत्वंपशुत्वंजीवत्वमितियावत् अतिगहनश्चायम
र्थइत्यनन्तरप्रक्रियापरिशीलनेनहृदयङ्गमीभावंयथाया
ति तथायतनीयम् तदेतदिति स्फारोविश्वात्मनास्फूर्तिः
तत्रपरमत्वमाह परापेत्तेति विमलत्वमाह परमकलने
ति उपलक्षणमाश्रित्यविश्वस्फारमाह समन्तादिति त
थाच पुरपदेति वाच्यवाचकात्मकषडध्वोपलक्षणम् त
त्रभुवनतत्त्वकलाभेदेनवाच्योध्वात्रिधा पदमन्त्रवर्णाभेदे

नवाचकोपित्रिया प्रथामपिपरस्परमवान्तरभेदेनानन्त
मितिकदम्बेत्युक्तम् विधित्रैरिति विधिरत्रस्फुरणपरामर्श
स्तंजानन्तीतिविधिज्ञाःप्रभवस्तेस्तदेतत्स्वाच्छन्द्यं उद्यम
इत्युद्यन्तृताउदितः अविस्मृत्यैपुनरप्युद्यमस्वरूपमाह उ
ज्ज्वलप्रसरइति असावेवोद्यमःसमन्तादित्यादिविशेषण
युक्तः तथाचशिवसूत्रं उद्यमोभैरवइति अथचविधि
ज्ञैः परमसमावेशलक्षणविधिज्ञात्पर्येज्ञैरसावुद्यमः
समावेशसमापन्नयेउदितः यतोसावुज्ज्वलप्रसरः उ
ज्ज्वलाविर्भवत्प्रसरःस्वरूपविकासोयस्मादिति अयमेव
ताहक्स्वरूपसमापन्नयेमुख्यउपायइत्याशयः तथाच
उद्यन्तृताबलेनतद्विकासदृत्यास्वरूपगस्तिच्छेदितिसि
द्धपादाः इयमेवचखेचरीमुद्रेत्यभिधीयते अन्तर्लक्ष्य
बहिर्दृष्टिर्निमेषोन्मेषवर्जिता यथासौखेचरीमुद्रास्वभ
ैरूपलभ्यतेइति लोकेपिदैन्यमपास्यालंग्रासयुक्तिस
माश्रयणंसर्वसिद्धिहेतुरुद्यमइत्युच्यते १२ सिद्धमर्थ
मुपसंहरति उद्यन्त्रेति उद्यन्तृतेतिगतार्थम् सत्त्वम
पिकृतलक्षणंतस्यादारत्वंसर्वेषांस्नपहारः लोकेचवा
उग्रेनोदेहाःकातर्यमौदार्यमितिगीयते चितिकर्तृतेति
चितेःकर्तृतास्वातन्त्र्यंसंयोजनवियोजनानुसन्धानादि

रूपम् येननात्ममात्रतायामेवजडवद्विश्रान्तिःस्यात् अ
परिच्छिन्नप्रकाशसारत्वादस्य परिच्छिन्नताच्चान्यस्य जडतः
संयोजनवियोजनादिस्वातन्त्र्यशालित्वम् लोकेचसर्ववशी
करणमेवकातरविलक्षणतायाउद्यमइतिकथ्यते चैत
न्यमितिसारमितिचव्याख्यातम् दिङ्मात्रेणान्यथापिकार्य
मविनास्यस्वरूपमाह यदाश्रयादिति अतिशयेनान्यने

उद्यन्तृतासेयमुदारसत्त्वंतदेतदङ्केचितिकर्तृ
तेति चैतन्यमेतत्तबलसारमस्ययदाश्रयात्पा
स्फुरदण्डमेतत् १३ सहजविमर्शबलादतोय
मीशोजगतिमहेश्वरइत्युदैरितज्ञैः नहिपर
बलहीनपशुशाखाङ्कुरमपिकुञ्चयितुंक्षमः
किमन्यत् १४

रपेक्ष्यणस्फुरतिइतिपास्फुरत् अण्डंब्रह्मोपलक्षितमाण्ड
जातं १३ अनेनैवसत्यपिप्रभुत्वेप्रभुत्वसाम्येपिमहेश्वरइ
तिव्यपदेशइत्याह सहजेति सहजोनाहार्यः आहार्यैस्म
र्यांस्त्वेइतिपरस्परापेक्षयेश्वरव्यपदेशोपिस्वप्रेपितेषांस
हत्वमसम्भवीतितन्त्रेरुदैरितत्वंकं सर्वथातः साधनेन
युज्यतेइति यत्ताश्रयणाउदैरीतिप्रयोगः ननुमायापरमा

एवादिसमाश्रयेणाप्यस्याधिष्ठातृत्वेनेश्वरतावगमनात्कृ
तः सहजेत्युक्तमनयाह नहीति परबलाभावेजाड्यापत्तेः
कृतः शाखाङ्कुरकल्पनेऽप्यस्य शक्तिरितिभावः किमन्यदिति
महाजनानुभवसिद्धत्वादस्यार्थस्य विमर्दक्षमत्वेऽपि विम
र्दोत्थापनमनुचितमितिसूचितम् १४ नन्वस्तु तावत्पू
र्णिकलनायत्र परब्रह्मेति परमशिवेति वा व्यपदेशो नास्ति
प्रामाणिकानां विवादः या पुनरधिष्ठात्री सृष्टिस्थितिलय

माहेश्वर्यबलाङ्कितोयममलो बोधोऽखिलप्रा
णिनो विश्वम्भाति परात्मतैकभरितः स्वेनाप्यथा
न्यात्मना तल्लीलाचरितं यदेतदथुना भेदेऽपि भे
दात्मना विश्वं भाति न कापि साह्यिकसनायाबोध
वाह्या भवेत् १५

तिरोधानानुग्रहाख्यकृत्यपञ्चकमखिलप्रतीतिपथमव
तीर्णकारणपञ्चतयी तत्र स्वस्वक्रियाधिष्ठातृत्वात्सर्वे
ष्वां कोविशेषो येन महेश्वरस्य ह्योष्यते रत्न तत्र समर्थयति
माहेश्वर्येति अस्त्यधिष्ठातृत्वे विशेष इति वाढमुह्योष्यते
यदयमखिलप्राणिनोऽमलो बोधः परमात्मैकरसिः स्वेना
पि भाति अथ चान्यात्मनापि भातीति तत्र स्वेन भानं यत्कुट

स्वात्मप्रथात्मकनिरर्गलस्वात्मप्रकाशनंनाम तच्च सर्वथा
कृतानङ्कितत्वात्त्वभानमितिकथ्यते अन्यात्मनाभानं च यत्र
नियतिवशकार्यकारणभावप्रथान्तरमपि मध्ये विभाति त
त्रापि चास्य पारमार्थिकस्य शुद्धस्वात्मप्रथात्मकप्रकाशस्या
नुप्राणकत्वादन्यात्मनाभानमितिकथ्यते इमे एवानुग्रहति
रोधानशक्ती तदधिष्ठातारौ च सदाशिवेश्वरावागमिकैः क
थिते अतश्च याऽस्माभिस्त्वः सृष्टिस्थितिलयाख्याः क्रियास्त
दधिष्ठातारश्च ब्रह्मविष्णुरुद्राख्यास्त्रयस्तत्रासौ लयकारणं
रुद्रो माहेश्वर्यबलाङ्कितो माहेश्वर्यबलं च तत्तृतीयनेत्रोन्मी।
लनम् तथाच तत्रैतन्मात्रतामात्रस्थितौ रुद्रोऽधिदैवतम्
भिन्नप्रमेयप्रसरे ब्रह्मविष्णू व्यवस्थिताविति अतएव चानयो
र्नेत्रतृतीयनेत्रोन्मीलनम् तदेतच्छ्रुतावुक्तं यतो वा इमानि
भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविश
न्ति तद्विजिज्ञासस्वेति तत्र जायन्ते इति सृष्टिः जीवन्तीति स्थि
तिः प्रयन्तीति संहारः अभिसंविशन्तीति तिरोधानानुग्रहश
क्तीयुगपदुक्ते इति सारम् बोधैकपरमार्थतां समर्थ्य क्रमम
प्याह तल्लीलेति अभेदे इति परमार्थतः भेदात्मनेति वैचित्र्या
वभासेनेत्युभयमपि लीलाचरितं लीलया चरणम् हर्षा
नुसारी स्पन्दो लीला ननु प्रसिद्धं बीजाङ्कुरादौ परिदृश्यमान

पं.सं.
वृ.९

स्यैव कारणत्वमित्यलमभेदवादेनेत्यत आह नकापीति अ
यंभावः उन्नानवुद्धीनामयमाभासः यद्वीजादङ्कुरइति पर
मार्थतस्तत्तदनुप्राणनं तत्समर्थितमेव वीजं तत्र कारणं भा
तीति १५ इत्थमनुत्तरमतेनोपन्यस्तं तां समर्थ्य सिद्धान्तमते
नापि समर्थयितं फलतोनयोरैक्यं प्रतिपादयति सोसाविति
सोसाविति परमवोधस्वरूपः परमेश्वरः निजसत्त्वेति शोकच
रपरविमर्शसारकलनामादाय सर्वात्मनेति स्वपरात्मना
स्वयमिति करणभूतेन स्वात्मनात्मनीत्याधारभूते स्वस्मि

सोसौ तां निजसत्त्ववोधकलनामादाय सर्वात्म
नाधिष्ठाता स्वयमेव चात्मनि जगत्सर्गस्थितिभा
सयन् अश्रान्तो लयकारणं सततमप्यात्मैक्य
वुद्ध्या स्फुरन्वेदान्तेष्विति कथ्यते समतिभिर्द्वैथा
पिसत्कारणम् १९ ॥

न्नुपादानलक्षणे चाधिष्ठातेति निमित्तं च अाभाससारमे
वेदं सर्वमिति भासयन्नित्युक्तम् स्फुटमपि स्वस्यैवोपादा
नत्वमित्याह लयकारणमिति अश्रान्त इति लीलाचरणं स
मर्थितं भेदाभासेपि परमार्थवुद्धिमाह सततमिति समति
भिः शोभनमननैः सूत्रकारादिभिर्द्वैधापि सत्कारणं निमित्तो
पादानरूपतया कथ्यते प्रकृतिश्च प्रतिज्ञा दृष्टान्तानुपरोधादिति
सूत्रं १९

एतत्समावेशफलमाह यपत्तामिति सिद्धा इति नतेषां कि
ञ्चिदपि साध्यमवशिष्यत इति भावः उद्योगशालिनश्च सि
द्धव्यपदेशार्हा इति च प्रकृतोर्थः अन्तरात्मा मनः अनर्था व
हा किं कर्तव्यतारूपभयप्रदा अस्याखिलस्य त्रयेपि कल्पा
न्ताउम्बरेपि अयं च अस्य सर्वस्य सञ्चितस्वार्जितादिलक्ष
णस्य धनस्य त्रयेपि जाते तेषामुद्यमैकशरणानां अनर्थाव

यपत्तां परां भूमिमाश्रित्य सिद्धाः परानन्दपीयूष
तृप्ताशयानाम् नतेषां कदाचिदुद्वेत्यन्तरात्मन्य
नर्थावहा भीः त्रयेप्यखिलस्य १८ पोप्लूयन्तां स
मन्तादर्णामुदयपयश्चण्डवाताश्च शैलान्दोधूय
न्तां परिवीचलिततगिरिनरीन्त्यतां कन्दुकीव द
न्दह्यन्तां च वन्हिदिकटतरशिखाभस्मिताशान्तरा
लादावानास्त्यस्य काचित्तिरमलमतेर्लब्धवोधो
दयस्य १८ ॥

हाकातर्यलक्ष
णाभीर्न कदाचिदपि मन
स्युदेतीति प्रकृतम् १८ त्रयेप्याखिलस्येति तत्परचनां घट
यति पोप्लूयन्तामिति चलितगिरीति नर्तनक्रियाविशेष
णम् कन्दुकीवेति अल्पत्वद्योतको ङीपप्रयोगः शिखाज्वा
लाः दावाः अरण्यानलाः इति द्वौ निःलब्धवोधोदयस्या यन्तर
मतेः १८

बीजसूत्रमाह तदिति नैसर्गिकमिति नैतत्कान्तरमतिरि-
क्तयत्किञ्चिदपि ज्ञापनीयमिति सूचितम् पैतामहीं ब्राह्मीम्
ब्रह्मपदव्यापि चोद्यमेकसाध्या किं पुनरन्यदित्याशयः १९
परमार्थमुपसंतित्यन्यकृतस्यैव भेदकथनार्थमारभते त
देतदिति आविर्भूतं सत द्विधा कथ्यते मुख्योयमः गौणो

तन्नैसर्गिकमुद्यन्तु भावमाश्रित्य ये बुधाः प्रव
र्तन्तेव देयुस्ते धुरं पैतामहीमपि १९ तदेतत्प
रमोदारं नैसर्गिकमिदं महः आविर्भूतं द्विधामु
ख्यगौणभेदेन कथ्यते २१ मुख्यमन्यानपेक्षं
यद्गौणमन्यापरोधियत् वीरमात्राश्रयं पूर्वम
नयाश्रयमन्तरम् २२ ॥

यमत्रेति २१ तत्र मुख्यगौणत्वमस्य साधयति मुख्यमि
त्यादि केवलत्वं मुख्यत्वम् अन्यसहायत्वं गौणत्वमिति
योगमात्राश्रयेण मुख्यत्वं गौणत्वं चात्र बोध्यम् फलत
स्तु गौणस्यैवात्र गरीयस्त्वप्रतिपादनात् तदाह वीरेति
मात्रशब्दो नयमपाकरोति सनयाश्रयमिति नीत्युपजीव
वीर्याश्रयं २२

अत्रेमोदाहरणं निरूपयति स्वबाह्विति अलमिति गरीय
स्त्वसिद्धिः परं तसौ मोलङ्घनमत्र व्यवहारस्थितौ दोषः अ
त्रोदाहरणं भीमवत् इति भीमसेनः पाण्डवश्च स्वबाहुबले
नोद्यमफलभाक् इति प्रसिद्धमेव परं तु पूर्वापरानुसन्धानं ए
ष्टेक्षता व्यवहारीति ज्ञानिपदमेतत् २३ द्वितीयमपि प्रस्ता
ययति सम्यगिति पूर्वापरानुसन्धानविचारपूर्वं साधनान्या

स्वबाहुबलमाश्रित्य ये यतन्ते दृढव्रताः तेर्थ
सिद्धिमवाप्नुवंत्राजन्नत्र विभीमवत् २३ स
म्यग्विचार्योदयायायो साधनान्यकुतोभयाः प्र
शंसामेत्य राजन्ते परं विकिरीटिवत् २४ अ
त्रैव सर्वाकलनाज्ञानविज्ञानलक्षणा निरूढा
भातिविद्धर्मो सेषा देयाच सर्वथा २५ ॥

दायाकुतोभयाउद्यमैकशरणा अपि प्रशंसामेत्याह्नो साध
नेनारब्धसीमा च पालिता स्वार्थोपि साधित इति स्वपरप्रस
न्नीकरणात्मकां श्लाघ्यतामेत्यराजन्ते परे गौणमाश्रयिणः
अत्रोदाहरणं किरीटिवत् मध्यमपाण्डवश्च सम्यक्पूर्वा
परानुसन्धानमग्रतः कृत्वा स्वबाहुबलेनाद्यवजन्द्भुश्चात्रै
वावान्तरभेदांश्च सन्धिसिद्धये योगिनो निदर्शयति अत्रैवे

ति अत्रेतिद्विविधउद्यमेज्ञानमात्मसिद्ध्येकप्रयोजनम् वि
ज्ञानंबाह्यार्थसिद्धिप्रयोजनम् आभ्यांचसर्वेविधेयंस्वीकृ
तमित्याह सर्वाकलनेति निरूढेतिबद्धमूलाततश्चसैषा
धन्तृतासर्वप्रकारैरादेया २५ तत्रात्मसिद्ध्येकप्रयोजना
ज्ञानलक्षणाधन्तृतायोक्तातामाश्रित्यविचारयति विका
सवृत्तिमिति विकासवृत्तिर्निमेषोन्मेषरहिताव्युत्थानस
माधिभेदतिरस्कारेणात्मतत्ववृत्तिः तत्रहेतुः परमार्थेति

विकासवृत्तिमाश्रित्यपरमार्थरसोज्ज्वलाः ये
सिद्धाःसिद्धिमायान्तितेषुमुख्येविराजते २६
संकोचवृत्तिमाश्रित्यशनैरारोढुमुद्यताः ये
नेकजन्मसंसिद्धास्तेषुगौणंविराजते २७

परमार्थस्यबाह्यान्तरभेदरहितत्वात् यदाह महेश्वरान
न्दः अविकारोभयपार्श्वेचाषपिण्डसदृशोर्थे अन्तर्भावा
योगीवहिर्भावइतिकलनाऊनइति सिद्धाइतिसिद्धमार्ग
चारिणः २६ द्वितीयप्रकारेणाप्येनैवविचारयति संकोचे
ति निमेषोन्मेषभूषिताव्युत्थानसमाधिभेदस्वीकारेणा
त्मतत्ववृत्तिःसंकोचवृत्तिः तत्रहेतुःशनैरितिअन्यत्सुगमं

अत्रैवद्विविधत्वेप्रामाणिकसम्मतिमाह पतीति तत्रप्रथ
मंपतिज्ञानंद्वितीयंपाशवं रहस्येषित्वेनेनातिगोप्यत्वमस्य
सूचितम् तथाच संकोचतारतम्येनपाशवंज्ञानमीरितं वि
कासतारतम्येनपतिज्ञानंतत्ववाचकमिति २८ पतिपाशव
स्वरूपंव्याचष्टे नयत्रेति यन्त्रणेति विधिनिषेधात्मकभेद
लक्षणा अतश्चाबाह्याभ्यन्तरेति व्युत्थानसमाधिभेदरहिता

पतिपाशवभेदेनतदेतद्विविधंबुधैः रहस्येषू
दितंज्ञानंसर्वथासिद्धयेविदाम् २८ नयत्रयन्त्र
णाकाचित्परामृतरसोज्ज्वला अबाह्याभ्यन्तरा
रीतिःपतिज्ञानमितीर्यते २९ सर्वतोयन्त्रणाब
द्धमहाङ्कुशवशोदये संयमत्राद्विनीरीतिःपा
शवंज्ञानमीरितम् ३० ॥

अयंभावः भेदोहिसंसारः सचसर्वेषामेवक्लेशदइतिकेयंयन्त्र
णानाम तदभावाच्चभेदाभावेकेयंसमाधिव्युत्थानभेदक
ल्पनेति २९ सर्वतइति उदयइतितत्सिद्ध्यर्थम् बाह्याभ्यन्त
रतामस्याःसाधयति संयमेति त्रयमेकत्रसंयमइतिध्या
नधारणासमाधीनांयुगपत्संयमइतिनाम ३० ॥

अत्र यत्पूर्वमवतारितमवान्तरभेदसिद्धये इति तत्स्फुटीक
र्तुमुपक्रमते सत्त्वमिति तत्रापीति भेदकल्पने सत्त्वात्मन
मोदयते अस्तितितान्विकोयमर्थ इत्यर्थः यद्येवं तत्सर्वेषामु
त्वमसत्त्वमेवेति परमाह तैरत्र नभावमिति साधनावकाश
दानार्थमाह तथापीति सर्वत्रेति साधनानर्हसाधनार्हेष्व
प्ययं भावः सत्त्वमसत्त्वं सर्वेषामसत्त्वमेव परं तत्तदनर्हाणाम

सत्त्वं तत्रापि सत्त्वं चेदस्तु नास्त्यत्र कल्पना त
थापि योगिनां सर्वत्र सिद्धये श्रेय उच्यते ३१ मति
मास्थाय विमलां नीतिसत्त्वानुवर्तिनीम् उपच्छ
ति च यो धीमान्सोवश्यं सिद्धिभाजनम् ३२

हेत्वभ्रान्त्या तयोर्यमेमहानर्थपात इति तत्समुद्धार्थमापा
तायातपूर्वोक्तदोषाशङ्कापनोदार्थं चात्र तदर्हैरपि परमादरो
विधेय इति ३१ स्फुटं योगिनां दरं विशदयति मतिमिति
उपमवतां नतात्पर्येण कातरवत्तत्र परमादर इति सूचनार्थं
नीति सत्त्वेति अवश्यमिति वक्ष्यमाणसंशय
निरासार्थं ३२ ॥

अत्रैवमरयति कासाविति केति गूढा गूढा वा रसयाभूमेया
ज्ज्वला रसेनान्तरप्रेमलक्षणेन शृङ्गारेण च ३३ तेइति नय
स्यास्वकल्पनातदधीनाभिमतस्थानशास्त्रियोतिका परं तथा
वनं स्वाधीनो यमलक्षणं तत्साधकमिति महाधिय इति सूचि
तम् ३४ न जात इति तमः कार्यसाङ्कर्याम् उपनि उपच्छति

कासौ सिद्धिर्नयानीति सम्भूषितधियां नृणाम्
उपच्छतां नयात्यग्रे कामिनी वरसोज्ज्वला ३३
तेस्म्राख्यास्त परं सिद्धिभाजनं ते सुखोदयाः सन्न
यास्वमुपारुह्य ये यावन्ति महाधियः ३४ न जा
तु स्खलनं यान्ति तमस्यन्धे पि ते बुधाः बहुकल्प
य उपन्ति सदोद्बुद्धनयेक्षणाः ३५ केवलं यत्न
माश्रित्य ये यतन्ते रुढव्रताः तेषां संशयिता सि
द्धिः संशयो नर्थकारणम् ३६ ॥

अत्र हेतुः सदेति स्वस्यावस्थायां समुद्बुद्धनयेक्षणा विदितनि
मत्ता रोहावरोहगतयस्तमस्यपि सञ्चरन्तो न स्खलन्तीति
सिद्धमेव ३५ तथापि योगिनां सर्वत्र सिद्धये श्रेय उच्यते इत्युक्त्यामु
त्वस्य यदसर्वत्रगतितं सूचितं तत्प्रतिपादयति केवलमिति ग
तार्थं ३६

एतदेवदृष्टान्तेनस्फुटयति नजात्विति साहसेनेति सर्वथा
केनान्वयः अत्रनयमपोहलयति युक्तेति लङ्घनमर्थीक्र
मणेनमथनम् ४८ संशयितासिद्धिः संशयोनर्थकारणमि
त्युक्तं तत्रकार्यसाङ्कट्येसमापतितेसाधनान्वेषणमकिञ्चि
त्करत्वाद्व्यर्थमितितत्रसंशयेपीदमेवज्यायइतिव्यवस्थाप्र
तिपादयतितस्मादिति तस्मात्यदस्यशास्त्रेषुमहाप्रभावत्व
मुक्तंतस्माद्धेतोरयमर्थोत्रसिद्धः यत्कालवशाद्गरीयसांसाध
नानामकिञ्चित्करतापातेसतिअवार्येकेनाप्युपायेनवार

नजातज्वलितंवह्निंकश्चिद्दृष्टमपित्तमः सा
हसेनाप्ययुक्त्यासौलङ्घ्यतेचापिधीयनैः ४८
तस्मादवार्येसाङ्कट्येसाधनानांगरीयसाम् अ
किञ्चित्करतापातेसिद्धेःप्रथममन्तमम ४९

यितमशक्येसाङ्कट्येसमापतितेप्रथममथमलक्षणंसाद्
संसिद्धयेश्रेयः तथाचगरीयसांसाधनानामात्मसंयमस्थि
तिहेतूनांमहारोगाक्रान्त्याजरादिदोषेणवाकिञ्चित्कार्य
करतापातेसाङ्कट्येचशरीरपातादिलक्षणेवार्येसमीपश
त्रेभृगुवादिपतनसाहसयुक्तिरेवसिद्ध्यैरुपागमशसिद्धिः अ
त्रचाप्रकृतार्थोन्मीलनंसर्वत्रसर्वत्रोपलक्षणंविस्तरभयान्न
पदेपदेनप्रसारितम् स्वयंतथीमद्भिर्विस्तृतिपदवीनेयमि
त्येतदर्थंच ४९

सूत्रकल्पमनुश्लोकंमत्वास्वयमेवव्याकरोति यावदिति का
लस्यक्षणःकालक्षेपःकार्यासाङ्कट्यमितियावत् यावच्चशक्ति
र्वास्यान्तरशक्तिर्गरीयसी विधेयंकार्यमन्ततोनिश्चयेनप्रकृ
ताप्रकृतोभयसाधारणमिदम् ५० कालविपर्ययःकालात्य
यःकार्यसमापत्तिलक्षणःप्रारब्धपरिसमाप्तिश्चशक्तीनांबा
ह्यान्तरसाधनानांइन्द्रियशक्तीनांच तत्रेतिनीत्योर्नभेदस्त

यावत्क्षणोस्तिकालस्ययावच्छक्तिर्गरीयसी ता
वन्नीत्यैवसद्दीत्याविधेयंसाध्यमन्ततः ५० वि
पर्ययेयकालस्यशक्तिक्षेपउपस्थिते इतिनीत्यो
र्नभेदोस्तिसर्वथानर्थमेवसा ५१ तत्रोद्यन्तमा
श्रित्यकार्यंसंसाधयेद्बुधः नतत्रचिन्ताकर्तव्या
समुद्रोल्लङ्घनादिषु ५२ ॥

त्रनीतिसमाश्रयणमीतिरुपद्रवःकार्यविघातहेतुरिति
यावत् तत्रनीतिंहरतोपसार्योद्यममेवाश्रयितव्यस्तत्र्यथा
यातमपिहिवदसवदन्यायमाश्रित्यावश्यकर्तव्यतामाह
तत्रेति कियत्पर्यन्तंचोद्योगासिद्धिरित्याह समुद्रोल्लङ्घना
दिषु तत्रसमुद्रोल्लङ्घनमपिचप्टिष्यतेइतिभावः ५२

द्गीणेष्विति साहसमेवबलमत्युत्कटंवीर्यंतेनोद्धतः सर्वसम
द्धिमान् अस्त्तद्धलेयदेनंजयश्रीस्तदधिष्ठातृदेवतावीरकाङ्क्षि
णीस्वयंवृणोतीत्यर्थः ४४ पक्षेयोंवितन्यमानोनपर्याप्तिंगच्छ
तीतिसूचयन्नुपदेश्यान्नुपदेशस्यंग्राहयितुमाह अलमिति
अलमितिकृतमित्यर्थेव्ययंतेनभावसाधनत्वाद्बहूक्तेपतिकर्त्त
रितृतीया विद्धामित्यन्यत्रसिद्धान्तो असाविति प्रथमोपक्षा

द्गीणेषुसाधनेष्वत्रयः साहसवलोद्धतः जितंते
नजयश्रीर्यत्सर्वदावीरकाङ्क्षिणी ४४ अलंवहू
क्त्यागहनमेतद्विविद्धामपि सर्वथासौहिया
कार्यसाधनोद्यमभेदतः ४५ पक्षेकार्यसिद्धैसा
ध्यात्वपरस्तत्साधनेषुयो यथात्मसिद्धेकृत्य
नैतदङ्गेषुचसंस्तवः ४६ ॥ द्वियेतिकार्योद्य

न्तोद्यन्तरता

मसाधनोद्यमभेदेनेत्यर्थः ४५ पक इति कार्योद्यमः परउ
तिसाधनोद्यमः अत्रपूर्वप्रक्रान्तमेवसाधनंमध्येविस्मृ
तकल्पमिवमत्वाद्दृष्टान्तयति यथेति तत्रात्मसिद्धयेषु
त्पन्नेसंस्तवोभ्यासः कार्योद्यमः तदङ्गेषुश्रवणसाधनेषु
संयमादिषुसाधनोद्यमइति अत्रश्रुत्पन्नोत्पनेनश्रवणमा
त्रंलक्ष्यते तथाचवक्ष्यमाणाद्घटनाद्युक्तेतिवोध्यम ४६

अंत्रेवव्यतिरेकयति सर्वथेति अनर्थदैरिहामुत्रभयदैः का
र्पण्यहेतुभिरितिपरस्परसापेक्षत्वाद्दोषाणामेतद्वैपरीत्यलक्षणोस्त
थावाऽऽलस्यदौर्जन्यदुष्टसर्गपापाचरणपक्षवाख्यैः असावि
तिअलसादि विधोरङ्कःयवलीकुरुतेविधुकलङ्कमालिन्याद
धिकमस्यमालिन्यंजायतेइत्यर्थः प्रासङ्गिकंसमाप्यप्रकृत

सर्वथानर्थदैरेभिःकृतंकार्पण्यहेतुभिः यदा
श्रयादसावङ्कःयवलीकुरुतेविधोः ५३ सएव
पुरुषोलोकेयोयतेतदिवानिशम् अन्यार्जितर
तस्पृहस्त्रीत्वक्लीवत्वमेववा ५४ भुञ्जतेसर्वएवे
हनाभक्षैर्जीव्यतेत्तणम् स्वबाहुर्जितभोक्तृ
त्वभोक्तृत्वंगण्यतेवुधैः ५५

मेववर्णयति सएवेति पुरुषइति सर्वथाश्लाघ्यकीर्तिः
स्वपरतोषकश्च दिवानिशमितिप्रत्यहमपरोक्षम् अन्वयमे
वोपमाह अन्येति स्त्रियोह्यन्यार्जनरताःस्वतोषेपिपरतोषाना
धायिकत्वादश्लाघ्यकीर्तयःक्लीवाःपुनरनुभयाइति ५४ न
भोगमात्रेणपुरुषत्वमित्याह भुञ्जतेइति स्पष्टम् ५५

ग्रथुनोद्यमोनामायेनक्लेशायासकर्तृत्वमपितत्काचिदेषा
युक्तिरगण्यतिप्रतिपादयितुंतावदृष्टान्तमाह काचिदेषेति
काचिदितिदृश्यग्विविद्यमानापिनदृश्यत्वव्यपदेशाद्धाकले
तिचिदाकाराद्वृत्तिः शुद्धेतिप्रत्यगात्मनि ययाकलयाऽसौचि
त्स्वरूपीप्रत्यगात्मास्वयमपरिणामित्वादक्रियोपिसन्नन्य
कर्तृकभोगानांपरिणामिदेहेन्द्रियादिकर्तृकभोगानांसा
क्षितयाभोक्तेतिव्यपदिश्यते ५९ दार्ष्टान्तिकेयोजयति ए

काचिदेषाकलास्तीह ययासौस्वयमक्रियः अ
न्यकर्तृकभोगानांभोक्तेतिव्यपदिश्यते ५९ ए
वंप्रोद्धतशीलानामपीहपरमाकला ययातेऽ
त्यन्तमनसोपीशातेन्यार्जितंफलम् ५० ॥

वमिति एवंसाद्धात्मदृष्टान्तेन प्रोद्धतशीलाउद्यमशान्ति
नः तेषामपीहलोकेपरमाकलायन्नरतान्ख्यास्तीतिशेषः य
यापरमकलयातेऽत्यन्तारोत्यन्तमनसः स्वयमान्तरक्षोभ
रहितास्त्रपिस्वोजःस्फुरणामात्रेणवशीकृतसर्वान्तराःस
न्तोन्यार्जितंग्रन्थैः प्राणान्तपरिसमाप्तिपर्यन्तसाधितंफ
लमीशतेस्ववशंकुर्वन्तीति ५० ॥

श्रायातशक्तिपातानामिति तत्रहि द्विविधेपिविषयमुपदर्श्याय
ति श्रायातेति शक्तिपातस्तीव्रानुग्रहः यमेवैषवृणुतेतेनल
भ्यस्तस्यैषआत्माविवृणुतेतनुंस्वामितिश्रुतेः साधनमितिक्ले
शावहंश्रुतिमात्रेणश्रवणमात्रेण ४० इतरेषामिति शक्ति
पातानाविद्धानांयदिचर्येमेवेतिश्रुत्यवधारणेनशक्तिपाता
धीनमेवेदंतथापितस्यतीव्रमन्दादिभेदकल्पनयामन्दशक्ति

श्रायातशक्तिपातानामनपेक्ष्यैवसाधनम् केव
लंश्रुतिमात्रेणज्ञानमुत्पद्यतेनृणाम् ४० इतरे
षांमहाक्लेशसाधनज्ञानपूर्वकम् जायतेविम
लंज्ञानंतथास्यपरमात्मनः ४८ द्विधाप्यसौपरं
भातिस्वभावस्तस्यभूपतेः यश्छेत्रनगरीरम्याव
श्रीकर्तृमहामनाः ४९

पाताविद्धत्वंज्ञेयम् महाक्लेशत्वंसाधनानामिहामुत्रफ
लभोगादिपरित्यागात् ज्ञानस्यविमलत्वंसाक्षात्कारः ४८
इत्थंदृष्टान्तमुखेनद्वैविध्यंव्यवस्थाप्याद्यप्रकृतेयोजयितुंसा
धारण्यस्यकर्मणः पूर्ववद्विशेषंब्रूते द्विधाप्यसाविति
परमतिशयेनभातिप्रेक्षणीयत्वे रम्याइतिसदाचारपालनेन
समृद्धिवतीः ४९ ॥

भूपतेरेवात्र भरउतिप्रतिज्ञातं समर्थयति अस्त्वन्यस्यापीति
अस्त्विति द्विवियोयमाङ्गीकारे अन्यस्य सामान्यजनस्य अस्य
सामान्यस्य गण्यतामेति इति विशेषकलनामपदेशमिति या
वत् सामान्यतयैव स्वतः सिद्धत्वात् अत्रैवार्थान्तरयति विसाथ
नाश्चेति विसाथना अल्पसाधना इत्यर्थः ५० अत्रैव पुनरपि व्य
तिरेकयति प्रायेणेति प्रायेणेति सर्वथा विशेषकत्वात् अय
मित्ययमः तस्येत्यपेक्षायामाह यइति उद्भटउद्यमभरितस्य

अस्त्वन्यस्यापि नैवास्य गण्यतामेति भूतले विसाथ
नाश्च जीवन्ति जीवन्तो जीवनं ध्रुवं ५० प्रायेण गण्य
ते तस्य स्वभावोयं य उद्भटः औदार्योज्ज्वलसत्कीर्ति
स्फुपितात्रेयमण्डलः ५१ सर्वथा भरितास्तेन दिश
औदार्यशालिना यत्नप्रश्रयसत्सर्गतपःस्मुक्तादि
भिर्धनैः ५२

न्तः उद्भटत्वमे वकार्यमुखेनाह औदार्येति
आत्रेयमण्डलमप्रमण्डलः ५१ औदार्यजीवनपषउद्यमश्चौ
दार्यशालिनेति विशेषपदं स्थापितं परस्परं चैषां रत्नानां मि
लितांशेनाभाकारित्वमिति समकत्वतया निर्दिशति यत्नेत्या
दि तत्र यत्नस्य प्रक्रान्तता सर्वसमुद्देशः प्रश्रयो विनयरत्नं
सत्सर्गः दृढनिश्चयरत्नं तपः पतन्नाम कं रत्नं स्मुक्तं सुक्ती
करणाख्यरत्नं आदिना सच्छीलादिरत्नपरः ५२ ॥

एवं दृष्टान्तदार्ष्टान्तिकौ ष्टयर्गिवविद्याय युगपदनयोरत्यन्तसा
म्यप्रतिपत्तये ऽत्वब्धतामाह एकत्रेति एकत्रेति हृत्कमले ऽसिं
हासनायेकदेशेवा अस्यात्मनः प्रतापवतो राज्ञो वा दृश्यति स्त्र
हेलितिकया विचार्या यदर्थीनेति यदेतियोगक्षेमावाह्यान्तः
करणावलीवाह्यान्तरिन्द्रियपङ्क्तिः वाह्यप्रकृतयश्च आन्तरप्रकृ
तयश्च ५८ प्रकृतमेवाह सैषइति सैषइति वर्णितप्रभावउ
द्यमः न निन्द्यामिति उद्यमो निष्फलो नास्तीति नीत्या तमपद

एकत्रावस्थितस्यास्य दृश्यासौ परमाकला यदर्थी
नाखिलासेयं वाह्यान्तःकरणावली ५८ सैषा सर्वा
त्मना श्लाघ्यो यदाश्रयणतोवुधाः न निन्द्यां पदवीया
न्ति लोकेनर्थसमाकुले ५९ यशोनुषङ्गाभिमतं
प्राप्नोत्युद्यमतत्परः चेद्विलम्बपदाच्छन्नो निन्दा
नैवास्य जायते ६०

वीं भजन्ति नि यति वशात्कदाचि
न्निष्फलत्वेपि नास्य निन्दा कृतं साधनेन यदैवमिति लोक
वादेनासौ स्पृष्टः ५९ अत्रैवाभीप्सिताधिकामपीत्याह यश
इति उद्यमतत्परः अभिमतमुद्यमफलं यशोनुषङ्गि यशसा
नुगतं प्राप्नोति यशोस्यानुषङ्गागतमधिकमित्यर्थः वि
घ्नापातेपि नास्य हानिरित्याह चेदिति उद्यमी विलम्बपदे
नाच्छन्नः कृतविलम्बश्चेत्तदापि नास्य निन्दा ६० ॥

पतदेवसमर्थयति परमौदार्यमिति साधुशोभनमेतदित्य
र्थः कृतान्तः प्राग्भवीयपापंयत्रजायतिसतिगुणाः शीलंचस
च्चरित्राणांव्यत्यासकारणंजायन्ते तथाहि गुणिनोगुण
त्राद्रियन्ते शीलवन्तश्चशीलम् अगुणानामशीलानांचवृ
द्धिविलोकात्तदाचरणेनोन्मुखेननष्टप्रायंजगत्सर्वंभवेदिति
महतीचिन्ताव्यत्यासकारणमितिद्योतयति तथाचभारती
कुन्तीवचनम् भाग्यवानेवजायेतमास्मशूरोमाचपण्डितः

परमौदार्यमाश्रित्यसाधुयत्नःकृतोमुना यत्कृ
तान्तेगुणाःशीलंयत्रव्यत्यासकारणं ९१ यतिष्य
त्थाविशेषसततमहमश्रान्तहृदयस्तदामेसाध्यंची
श्रयतिममभाग्यंस्वयशसां अनाप्तोवैवंमेविहि
तममुनासाधितिविधिंयिगेतंविज्ञान्वेत्यमलम
तिश्छात्रास्तिनियता ९२ ॥

अथाश्रुकृत विद्याश्रवणेशब्धं
तिमत्स्नतारति ९१ इत्यंचिन्ताविवेकवोपायप्रोन्मील्य
कर्तव्यमुपदिशति यतिष्येइति सर्वचिन्ताविसर्जितंविद्या
येवंनिश्चितमतिःस्यादितिभावः पदार्थस्तुसाध्यंवासाधि
तंचांस्वयशसामिति ईर्ष्योरहितानांइत्याप्तिफलम् अना
प्तिफलमपिश्लाघ्यमित्याह अनाप्तोवेति एवंमेइति एवंव
द्यमाणंफलंयथाश्रमुनासाधुविहितमितिममामलमति

श्छात्रानियतावश्यभाविनी एतमनर्थकारणंविधिंयिक अ
थवातत्किङ्कुर्वान्विज्ञान्धिगिति तेषाममलमतिश्छात्रानियता
निगमयति इतीति नकयन्त्वनाप्युद्यमवैफल्यमितिनिश्चय
शालिनां सर्वतःफललाभेऽलाभेवा इत्थंस्वयुक्तिगुणनिब
द्धांशिखांसन्नाहैनांशेखरोपरिस्थापनेनसहिलासदायिनी

इतिनिश्चितबुद्धीनांविद्याभ्युद्यमशालिनाम् स
र्वतःप्रसरत्कीर्तिकलासत्त्वविराजते ९३ युग्म
म इतिशिखाबन्धः तथावोद्यतसच्छीलसाफ
ल्यस्मयकारणात् सद्भिःसुभाषितावल्यांनिब
द्धेयंप्रणाकया ९४

मत्वाशेखरबन्धंरचयितुमुपक्रमते तथाचेति उद्यमहूप
सच्छीलस्याद्योकीदृशंसत्फलदायित्वमिति यःस्मयस्तच्च
मत्कारस्तस्यहेतुभूतत्वात् प्रायेणसन्तोनिर्व्यापाराइतस्ततः
कथाप्रकलानिसमुच्चित्यरचनयायत्रव्यवस्थापयन्ति सा
सुभाषितावली ९४ ॥

कथामुपक्रमते काचिदिति पिपीलिकात्तोलमथ्यासत्त तत्र क्रुस्माकीटजातिः हेतिप्रसिद्धा कणानितिम्नक्तणान् ध्नाताशरीरत्तामात्तीणाशक्यात्पका उभययापित्तीणायाश्र स्याः कथंजीवनमित्याह प्रतिज्ञातेति आशाहिप्रायेणाशिथि

काचित्पिपीलिकायत्नकदंबाद्धृतादरा दिना
निगमयान्वक्रेमत्कुटोदुरणायह ९५ तांनिः
श्रेषयितुंक्रुटंत्तिपन्तो पार्श्वतः कणान् पद्मीदैवा
गतः कश्चिद्दर्शवासनातरो ९६ ज्ञातांत्तीणांप्र
तिज्ञातनिर्वाहाशावलम्बिनी स्वक्रियानिरतांदृष्ट्वा
स्मयमानोव्यचिन्तयत् ९७ अहोयत्नोयमेतस्याम
त्तिपेयदिदंपरम् वातर्येहस्तपादानांवेगंजयति
मानसं ९८ विचिन्त्यायाहतांभद्रेकिमेतत्स्वीकृ
तंत्वया कोयंसर्गोत्रकृतकं कथंजातेचकिंफ
लम् ९९ ॥

लमपिवल्लत त्वेद्धयतीतिस्वक्रियाम् त्वकणस्वपः तत्रनिरतांन्यस्तेणरता बहुतात्पर्या ९७ स्मय माह अहोइति परमतिशयेनयदिदंहस्तपादानांवातर्येला जवंमानसंवेगंजयति विचिन्त्येति स्वीकृतंकर्तव्यतयागृ हीतं सर्गोनिश्चयः कृतकंबलिनोच्छाकथमितिकस्माद्धेतोः ९९

उपहासः लोकनिन्दाभासः उचितेतितृतीयान्तम् भविनां जन्मिनाम् श्रुत्वेति हेतुफलादिनिरूपणाउपदेशोक्तिः नि शम्यतांश्रूयताम् पणमशक्यक्रियानिर्वहणरूपम् परी क्षकः प्रेमदार्ढ्यजिज्ञासुः १०० अनेनेति पतन्मत्कुटोत्तेप

उपहासःपरंभद्रेजायतेतेत्रकर्मणि किमारब्धं
क्रियोचित्याशोभायैभविनांध्रुवम् १०० श्रुत्वोप
देशवाणींतांसोन्मुद्रागिरमादरात् श्रुत्वोनिश
म्यतांयत्नोयदर्थमितिचाहृतम् १०१ विद्धंप्रे
ममेचित्तेसजातीयेनकेनचित् प्रेमबद्धांविदि
त्वासौपणंदधेपरीक्षकः १०२ अमुंचेन्मत्रिका
कूटम्बहृत्यानेनवर्त्मना आगन्तासितदागन्ता
हमेष्यतेनतेगृहम् १०३ तन्निर्वाहाययत्नोयंशा
ययस्वपणादिति यावच्छक्तिक्रियासत्यफलिनी
तिविडम्बनाः १०४ ॥

णनिर्गतेन आगन्तासीतिमध्यमैकवचनम् आगन्तेत्युत्त मैकवचनं पतेनेति वर्त्मना १०२ शेषयेप्रतिज्ञामीणंकृते अशंसभावनांनिरस्यतिपिपीलिकायावच्छक्तीति १०३

प·सं
१९४

तस्याश्चभिप्रायस्तदभिप्रायः यत्नेषेति असावेव यत्नेषालस्त पातनेयत्नं करोति यस्य प्रगुण एव वैलोचिती प्रगुणः ऊर्परोप रितभागः भवन्मतमिति सर्वनामत्वात्त्वत्रावः संभावना प्रतीतिः साहसमिति ताद्दितानपेत्तंकर्म तथाच मामलंयत्नो पार्थ्ययतसेतच्छरीरमेवानेनकर्मणा नश्यतीति सम्भाव्यते मा

निशम्य तदभिप्रायं स्मित्वा वाचायतामसौ यत्नेषा
लद्यपातो येया प्रगुण एव वैलोचिती ७४ भवन्मत
मिदंकर्म कथं सम्भावनास्पदम् माकार्षीः साह
संभद्रे मामूलमपि नश्यत ७५ स्वस्थे स्वस्मिन्कि
यास्सर्वा श्रुभाय विदुषां मता यत्र नाशो भवेत्तस्य
तत्र का श्रुभभावना ७६ सर्वथा विदुषा सर्वमा
त्मा रद्यो ऽत्र रत्तिते आयतिर्नितरां प्राप्या कालोह्य
नवधिः श्रुभे ७७ ॥

इत्याशङ्कायाम् ७५ भवत्व
नेन कर्मणा निर्वाहितपणा श्लाघ्या भवेयमिति न मन्तव्यमि
त्याह स्वस्थे इति स्व आत्मा आत्मीयश्चेदं ऌियादिः श्रुभभावना
श्रुभं भविष्यतीति श्रुभाशास्या ७६ एतत्समर्थयति सर्वथेति
आत्मत्वात्मीयस्याप्युपलक्षणं अत्रेत्यात्मनि आयतिरुत्तरो
त्तरश्रुभं नयद्भविष्यन्त्यायो विवेकिनां प्रकरणाह कालोह्येति
७७

स्त्यर्थीरिति कर्तव्यार्थफलसम्भावनायुक्ता ७८ आस्या ऽः
दरः पुरत इति यथा कार्यवशाद्भावतां मध्यपाते यदि पुरतः
पादः पतति तदा हृष्टः पुनरपि यावत्स्येवेति लोके दृष्टम् ८०

दृढनिश्चयिनी वाचं पुनरुन्मुद्गाहृष्टधीः उ
वाचक्षणभद्रं ते वचः सारं सुनिश्चितम् ७८
नूनमस्मिन्ट्दृढास्यास्मि कौतूहलवशीकृता
यत्नपादं पुरस्कृत्य यथावामि विगतज्वरा ७९
यद्ययं पुरतो यत्नपादश्चेपस्तदा ध्रुवम् मत्कृ
टमुत्कृत्य मया प्राप्यतेभीप्सितं फलम् ८० यदि
वेयं ममाशान्तजीर्णेवापि भविष्यति तथापि सा
धुकारो मे लोकनिन्दा च साविधेः ८१ अहो प्रया
सः स्वमहान्वराक्या विहितोनया दैवं हि बलव
त्सिद्धासिद्धिकारणमुच्यते ८२

तदा दैपात्यश्चात्यादगमनेपि मम लाभ एवेत्याह यदि वे
ति अपि भिन्नक्रमः यदि वत्यनेन योज्यः मम साधुकारो वि
धेर्निन्देति साधुरत्रो योगः ८१ तदेव साधयति अहो इति
वाक्यद्वयमपीदं लोकमुखेन ८२

नचात्रार्थेममसर्वथाऽसम्भावनेत्याह साहमिति यथास्था
नमिति नाऽयथास्थानम् तत्रयथास्थानमितिहेत्वर्थान्तरे
णसमर्थयति भावाभावाविति अयंभावः ईशंचेच्छायां
सत्यांकिंनममेदंसिद्ध्यति नात्रसाधनानामर्हतानर्हताग
णनाकापीत्यर्थः ८२ तत्रैवभरयति ईच्छायामिति तस्येश

साहंयत्नपदंसम्यग्यथास्थानंप्रयोजये भावा
भावौकार्यसिद्धेरीशेच्छानियतौध्रुवम् ८२
ईच्छायांतस्यकिंनामदुर्घटंजायतेभुवि अ
निच्छायांशयप्राप्तमपिनश्यतितत्क्षणात् ८३
अयाभिमतवस्तुनोमदस्यान्तरमेष्यति येना
कचिन्नाद्भुतंसर्वाःत्वयमेष्यन्तिनिश्चितम् ८४

स्यादुर्घटंदुस्सम्पादंशयोहस्तः ८३ अयेति सस्मिन्नी
शेच्छानुमोदनेअभिमतमेवसर्वगोप्यागोप्याद्भाव्याद
कृताद्वस्तुतस्यान्तोऽन्तवतंममहस्तमध्यमेष्यति अयंच
दृष्टान्तः ईशेच्छायामकस्मादभिमताप्तौ येनाकचिन्नाद्भु
ति कृतकृत्याभवामीत्यर्थः ८४ ॥

नैवेदिति अनिच्छायांशयप्राप्तमपिनश्यति तत्क्षणादितिप
दान्तरेखुर्थेनुमतेवस्तुनिलोकः किंनामकरिष्यतीतिभावः ८

अयमेनिष्फलोनास्तीति प्रमाणयितुंपिपीलिकापिष्टकनिश्चे
येनोद्यमफलेलब्धवतीतिकैमुतिकन्यायमाश्रित्यायमेतेज
नायाह इत्यमिति तयोरिति पिपीलिकापक्षिणोः आनतविनि
अकागृहीतविदारणअकस्मादिति दृष्टहेतुंविना ईशप्रेर

णेचेत्तदपियत्नेमेसाधुकारार्चितंबुधैः नलोक
निन्दामलिनीकर्तुंशक्नोतिकर्हिचित् ८५ उ
पसंवदतोरेवतयोराननविनिअका अकस्माज्ज
नताऽऽदातुंमत्कूटंतत्रचाययौ ८६ तत्क्षणाद
थोद्भुतंकूटंदृष्ट्वासोमनसागिरा सर्वान्तर्यामि
णंदेवंजगामशरणंविभुम् ८७ अहोतवेदंपरम
प्रभोद्भुतंचरित्रमदोमविहतराजते क्वचेयम
ल्पाल्पचिदल्पविग्रहाक्वचायमस्याःफलितोमनोर

थैव जनताजनसम्मर्दः आदातुंग्रहीतुम् अप्रसावितिकृता
क्षेपःपक्षी मनसागिरेति मनसातद्देभवंविचिन्त्यगिरान्त
र्यामाद्रुक्तगोरेत्यर्थः ८७ गिरोद्गारमेवाभिनयति अहोइति उ
हामेति पात्रापात्रविचारणाद्विदामनिष्क्रान्तम् विहेत्वि
ति दृष्टकारणरहितम् अल्पेतिनीचजातिः अल्पचित्

आन्तरबलहीना अल्पविग्रहेति बाह्यसाधनहीना क्वचेति
असम्भावनास्पदंमहतामप्याश्चर्यदायीत्यर्थः ८८ संभावया
मीति भोभगवन्नहमधुनातांश्रुतिंसंभावयामि विश्वासास्प
दतयाप्रतिजानामि दृष्टप्रत्ययत्वादितिहेतुः यासौश्रुतिर्भ
वद्विभवमैश्वर्यमत्युत्तरंगृणातिस्तौति कर्तमकर्तमन्यथा
कर्तुंचशक्त ईश्वर इति तदेवसाधयति ब्रह्मादीति असमदे
श्वरस्य ब्रह्मादिकीटगतिः स्वेच्छैश्वर्यविलसितमिति स्वे

सम्भावयामिभगवन्नधुनाश्रुतिंतांयासौभवद्वि
भवमुत्तरंगृणाति ब्रह्मादिकीटगतिरस्यम
हेश्वरस्यस्वेच्छेतिसर्वमपिकारयतीहहीशः ८९

च्छया ऽसौब्रह्माणमपिकीटीकरोति कीटमपि ब्रह्मीक
रोतीति उपासनावैचित्र्यस्यापितदेकयोगक्षेमत्वादिच्छाव
मेवेत्याशयः एषएवहितंसाधुकर्मकारयति यमुन्निनी
षतीत्यादिश्रुतिमाश्रित्यार्थान्तरंन्यस्यति सर्वमपीति त
थाच अज्ञोजन्तुरनीशोऽयमात्मनःसुखदुःखयोः ईश्वरप्रे
रितोगच्छेत्स्वर्गंवानरकंचवेति ८९

तदयमिति यस्माद्दृढनिश्चयपूर्वमुद्यमेस्वाचितेपिकृते
ईश्वरोवेत्तकपैश्वर्यकलयातंतीरयतितस्माद्धेतोरयमुद्य
मः प्रवृद्धैर्दृढनिश्चयशालिभिरस्मत्सर्वनियन्तरीश्वरेहार्दं
प्रेमसङ्कलहृढंबद्धापरमार्थपदाप्तयेपिसततमविच्छेदेन
योज्यः तत्स्वरूपमात्मस्मयमोयंविधेयः प्रधानेह्नियत्नः फ
लवान्भवतीतिन्यायात अमूभिरान्तरीभिर्बाह्याभिःपरमार्थ

तदयंसुभकाङ्क्षिभिःप्रवृद्धैःसततंहार्दममुत्रसं
कलय्य परमार्थपदाप्तयेपियोज्यःकिममूभिः
कलनाभिरान्तरीभिः ९० यएकोत्रजागर्तिगाढा
न्धकारेप्रभुःसत्यशीलःपरोविश्वरूपः सएषो
खिलायार्थ्येप्यार्थसिद्धौयदिच्छावशोसर्वमेतद्धि
चित्रम् ९१ ॥

स्वरूपविस्मृति कारिणीभिःकिंफलंतस्या
त्मस्याप्यकिञ्चित्करत्वादित्याशयः ९० यएकइति गाढा
न्धकारेइति तत्समकक्षेपःस्त्वानोलासेजागर्तितदुल्लसित
स्वरूपत्वादस्य ईषस्याप्तमेष्टव्यः ९१ फलितमाह तस्मादि
ति ध्येयंविमृश्यविमृश्यमनसिधार्यं सदेति प्रमादादीनेमा
हहेत्वनपास्य नानाभङ्गिभिर्विविधैर्गूढपरमार्थेचात्रजग
तिसर्वप्रकारेणास्वस्थइतिस्मस्वायेनिश्चेतनेपराधीनेचपरंके

वत्वंसपवैकोजागर्ति प्रबुद्ध्यति सैक इति पादद्वयोरन्वयः
अप्रार्थ्यैभिप्रायमाविष्करोति आविशेषति अस्यसर्वजगतोन्त
रंमध्यमाविश्यप्रेरकोभूत्वायंमहान्तंनीचंवायादृशेकर्म
णिस्वेच्छितेपरेच्छितेवाप्रेरयेत्समन्दोस्तकोविदोवातत्कर्मा
विकलंसंपूर्णंसमाप्यशक्तीकृतार्थोभवतिमन्दोपिमहान्म
हान्नपिमन्दोभवतीत्यर्थः ९२ इत्थंपिपीलिकादृष्टान्तेना

तस्माद्ध्येयमिदंसदास्वमतिभिःस्वेनेत्रसर्वात्मनाना
नाभङ्गिःविचित्ररूपचरितेजागर्तिसैकःपरं आवि
श्यान्तरमस्यसर्वजगतोयंयादृशेप्रेरयेत्तत्कर्मावि
कलंसमाप्यसकृतीमन्दोपिवाकोविदः ९२ तया
न्याख्यायिकालोकेरम्याश्रुतचरीयया सम्यगारू
ढयाचित्तेविश्वस्तैःकिंनसाध्यते ९३

संभावना स्पदमपि
कर्मोद्यमेननसिद्ध्यतीतिप्रत्यायनपयेदानीमत्रैवशास्त्रेवन्यदा
ख्यायिकाप्रायेणराजबीजिनपतत्पात्रभूतान्सर्वोपरचित्ताव
ग्रमनस्स्खलनिश्चयवन्तोमात्यायापतस्माच्छ्रावयितुंनव
सन्त इतिसूचयितुमारभते तयान्येति श्रुतचरीति पूर्वंश्रु
ताश्रारूढयाविचार्यस्थापितया विश्वस्तैर्दृढनिश्चयभरि
तमतिभीराजकुमारैरनाआवितपरेङ्गितैःकिंनसाध्यतेसर्वं
साध्यतेइत्यर्थः ९३

फेराजातिविशेषास्तेषामिन्दुःश्रेष्ठःसदयेति सदयासानुक
म्पदेवायायतिस्तयाभूषितःयस्यफेरेन्द्राराज्यमेवसर्वतःप्रमो
दहेतुतावद्यानंशुभमासीदितिसंबन्धःशुभत्वमेवाह सम्य
गिति सम्यदेवसर्वोपभोग्यत्वाद्वर्वरिकाकोमलाप्रसूनजा
तिस्तस्याआमोदःसमन्तात्प्रसरणशीलत्वाद्धर्षप्रवातिनि
र्हारिसौगन्ध्यंतेनव्याप्तदिगुदरम् तयाविद्वारास्पदभूषि
तंक्रीडास्थानभूषितं नकस्यसर्वस्य अन्तार्थान्तरंन्यस्यति

फेरेन्दुनामाराजाभूत्सदयायतिभूषितः सम्यग्ब
र्वरिकामोदव्याप्तकाष्ठोदरंशुभम् ९४ राजोद्यानं
सदायस्यविद्वारास्पदभूषितं प्रमोदायनकस्यासी
त्साश्रीर्यशोषमोदिनी ९५ युग्मम् हन्तीतिदक्षि
णाश्वास्यात्सववायुःसदाशिवः यस्यामोदभरो
त्सेधैःकस्यनादान्मयोःश्रियं ९६

साश्रीरिति ९५ युग्मम्
हन्तीतीति यस्यचफेरेन्द्रोःकोमलचित्तत्वाद्धन्तीतिरान्तर
प्रमसैवदक्षिणाशाददक्षिणदिक्तत उत्थितोयोसावुत्सवोम
रुःसर्वतोषहेतुदीनपानखादवेशपारितोषिकादिसत्सर्गा
वसरःसपववायुःशिवःसुखदायीआमोदभरोत्सेधैर्हर्षसौ
गन्ध्यातिशयोन्नत्यैःकस्यविद्वारिणमयोःश्रियंनादात्
सर्वेषामेवासावुत्कृष्टगुणैर्वसन्तइवाबभावित्यर्थः ९६ ॥

तस्येति सच्छीलानां माधुर्येण सरागीकृताखिलरूप्यवद्दा
रस्यतस्यानयीनानन्यराथीनानन्देशानन्वीकर्तुमिच्छादभूत आवि
रभूत सा चेच्छा न राजाशयस्वभावेन केवलमित्याह शिवेति
अयं भावः प्रायेण हि राज्ञानोऽसन्तुष्टा विहिताप्रवासा च नत
देवकारणमपि तत्सर्वानुकूलीकरणमिति शिवेत्यक्रम ९७
इच्छायाः शिवत्वमेव प्रकटयति अहो इति मयि फेरेन्द्रावि
न्द्राविवोदिते पतेखलास्तस्कर कल्या मोषकारा जवेशाप्ता

तस्य सच्छीलमाधुर्यरञ्जिताखिलहृत्कृतेः अना
यत्तान्वशयितुं देशानिच्छादभूच्छिवा ९७ अ
हो मय्युदिते दीनाः कथमेताः प्रजाः खलाः कर्ष
यन्तीति सज्जागपलीलाश्लाघ्यैव सर्वथा ९८

दीनाः अकिञ्चनीकृताः कान्दिशीकाः कथं कर्षयन्तीति तन्त
न्तीति प्रायेण हितमसितस्करमोषणे सिद्धेपि उदिते चन्द्रेन
तद्बलमिति मय्युदिते कथं तमः सम्भावना तदभावाच्च क
थं खलाकर्षणमिति शिवेच्छादभूत अत्र सामान्येन सम
र्थयति सज्जागेपति सज्जागपानां या लीला लीलेव लीलाव्य
वहारवर्तिनी सा सर्वथैवायतैतत्काले च श्लाघ्या श्लाघाहा
प्रवकारो स्यार्थ्यस्यावश्यकत्वद्योतकः ९८ ॥

अतैवोद्यतालससर्गानिद्रूपणेनोद्यमखरीकरणाय कवि
रुपदिशति सन्त्येके इति एके इति केचित् मुख्यतया मत्ता
वा स्वजठरस्य समन्तात् पूर्तिः पूरणं गर्तस्येव तत्रैव चिन्तिता
धुनापि जठरगर्तः पूर्णा इति पूरयितुं तेनोषिणोद्यत नेताः स
न्ति स्वजठरगर्तपूर्त्यै चयेतन्मात्रस्वावासिकायामाटतोधि
यो निश्चितधिय उद्यतान्सन्दूषयन्ति सम्प्रगेदाषारोपणेन
मलिनयन्ति अहो अमी तृसालवोऽसन्तुष्टाः परहिंस

सन्त्येके धरणीतले स्वजठराघूर्त्यैचितिनोधि
यो येतन्मात्रस्वावासिकाटतधियः सन्दूषयन्त्य
द्यतान् औदार्योज्ज्वलचत्तषांकृतधियां नान्या
स्यपायो विनाशं चून्मूलनमेतदीयविषयस्वी
कारिकां चान्तरा ९९

यास्त्वं पोषयितुं रात्रिन्दिनं खिद्यन्तीति पूर्णोद्यमलममगीः
उद्यतसर्गमाह औदार्येति कृतधियः स्वपरैहिकामुत्रिक
हितकरणोन्मावत्वात् एतदीयेति शात्रवीयदेशस्वीकर
णं अन्तरेति विनार्थे अयं भावः एतदेवौदार्यमेतदेव च
कृतधीत्वं यत्स्वपरहितकरणाय खलाकर्षितप्रजावेद
णया तानुन्मूलयितुं तदीयदेशस्वीकारान्यातक्लोकोद्धार
योद्यतमतित्वमिति ९९

अत्रोप्यौदार्यमेवमूलमितिसूचनायप्रकृतंविहायाप्रकृत
मौदार्यमनुवर्तयति औदार्यमिति सर्वथेति अन्यकारणाना
त् उदारायवल्लिप्रायेणएषमिनइतिततदाह सर्वेइति १० परो
पकृतिमिति अद्रोकथमिमाःप्रजाःखलाःकर्षयन्तीति मू
लात्प्रित्नपरम्परातआगतामौलाहूडामात्यास्तेषामनुमतिरेत
स्यार्थस्यानुमोदनमोसन्नद्धोभवतिसैवदूषकारितात्योपूष
मन्तंतेनसिक्तोपुष्पफलोद्गमोन्मुखोविपातमुपययौसवि

औदार्यंसर्वथाश्लाघ्यंसर्वेयदनुयायिनः गुणा
यदाश्रिताकीर्तिर्विहामनुजप्रभप्रदा १० परोपकृ
तिमात्रत्यसचिवेचात्मनिस्मयः मौलानुमतिपीयू
षसिक्तोन्तांकर्तमुपययौ ११ श्रुत्वायतेनृपडपियः
सविनोप्यात्तसत्क्रियाः नृपंविज्ञपयामासर्व
इवात्मवशात्मताः १२

अयरहस्यंतेषा विर्भावयामासेत्य
र्थः ११ सन्त्येकेइतिप्रतिज्ञातार्थस्वार्थमेतद्विषयत्तयाप्या
जयितमवतारयति श्रुत्वेति नृडपियइतिश्रमात्यसचीय
मौहृष्णइतिसूचनार्थं तत्रापिसाविनःनृडपियांचसात्वा
पातेभेदंनश्येदितिशङ्कयाप्रायेणसर्वथासर्वेषांमानर
त्वणमित्यभिप्रायः तत्राप्यात्तसत्क्रियाः असत्कृतादिस
त्कारार्थेराजानमुद्यमयन्त्यपीतितद्दूषणम् १२

अत्रराजहृदयानुमोदनपूर्वंस्वेप्सितसम्पादनममात्यकृत्यमि
ति तथापक्रमते सत्यमिति नृपाणामौचित्यंयोगपतेतदिति
सत्यमिति राजहृदयमनुमोद्यस्वकृत्यसम्पादनार्थंगूढाश
याउपदिदिक्षुरित्याह परंत्विति उःखसम्पाते संशयेपिप
दार्थाणौचितीतिसूचनार्थंसाविनइति हिताहितमनपेक्ष्या
पिमूर्खोउपन्तीतिउयाइतिविशेषणम् असाविति संशयः

सत्यमेतन्नृपौचित्यंपरंत्वसाविनोवुधाः नार्पय
न्तिपदंजातसंशयेनर्थ्यदोह्यसौ १३ असह्यामा
र्तिमासाद्यविधेयेसंशयास्पदे पदबन्धंविदध
तांनोपहासोस्तिकर्हिचित् १४ ॥

नयप्रात्तिःसर्वथासंशयितत्वात् १३ यतदेवविवृणोति अ
सह्यामिति आर्तिरान्तरता नोपहासइति आर्तिपीडाहेतोःभ
वत्सिद्धिर्भावाभवत्तेनोपहासइत्यर्थः ३ नचभवांस्तादृश
इत्याह सभवानितिमुदितइत्यान्तरहर्षभरितःश्रोतेति वि
धेयतावर्तिस्वपरप्रकृतिरिति तदर्थमपीदृशीक्रियानुवि
तेतिसूचयति अधिकतापेअपियतत्ते नचभवांस्तथेत्याह

देशस्मिन्निति नचकोशष्टृष्येयत्न उचितइत्याह कोशइति य
यितइति सञ्जातव्यये सततंव्ययितमारब्धेपिनहीनताऽगाध
समृद्धत्वादितिभावः १४ गूढमन्वितमाह तत्पराजेत्तामूकीभा
वार्थमाहइत्याह निष्कारणमहोधीमन्नातरइति अस्याश
मस्यकारणेनान्विष्यमाणेपिनकारणंलभ्यतइत्यहोइति शो
कनिवेदनपूर्वंसम्बोधने अथवाप्रख्यातधीमत्त्वमसतितव।
किमिदंनिष्कारणंजडजन्यइवातरोसीत्याश्चर्यनिवेदनमहो

सम्भवान्मदितःपाल्लादेशोस्मिन्व्ययितेपिकः को
षाक्ताहृदेशोयस्मिन्व्ययितेपिनहीनता १५ नि
ष्कारणमहोधीमन्नातरोसिजडान्यवत् जातोत्य
न्तानुवर्तस्वक्रियांतांस्वकुलोचितां १६ सशान्त
ममलांदीप्तांकथंराजंस्त्वन्नमम चिन्तारेणभरे
णायमृत्वानच्छायांकरोष्यलम् १७

इतिकिंबहुनानायमयमस्त्वधीमत्त्वमेवार्थमेवेनदिति स
र्वोनिवर्तनायप्रकटमेवाहजानामिति स्वकुलोचितामित्य
नेनस्वशुद्धिमवश्यविधेयतांचसूचयति १५ नकेवलम
त्युग्रमपवकेवलंयावदनर्थोपीत्याह सशान्तामिति सशा
न्तामित्यान्तरप्रसन्नतोक्ता अमलामिति पारलौकिकपापेप्या
जेनोचिततोक्ता दीप्तामिति वाग्यारोग्यतोक्ता करोषीतिवर्त
मानसामीप्ये १७

अथतावच्छ्रातक्रियया शुद्धं अथतथ्रनया मलिनया मलाव
हयाऽनर्थचिन्तया शङ्कितयापरहिंसादिलक्षणयाप्रधूमय
सिप्रधूमंकरोषि प्रसिद्धंप्रथमंज्वलनस्यप्रधूमायितात्वत
स्तद्धोपिप्रथममसौपश्चात्प्रधूमायतइतिकथंशब्दोत्याय
मर्थः मानदेत्यपतावदस्मात्समानदायकोमानरक्षकस्त्वा
सौरव्यप्रभृतिमानात्वण्डकोवुभूषसीतियोत्पते १८ तत
त्रालंबहुनानिश्चयेष्टणनेनतस्याथइति अश्रवणेसारमा

शुद्धंप्रतापज्वलनेकथंमलिनयानया अनर्थ
चिन्तयात्वन्तंप्रधूमयसिमानद १८ नैतस्याथ
यदस्तिकिञ्चनसत्यासौदर्यमवीपतेभाग्यप्राप्त
मदारसारममलंनान्यस्ययत्त्वमगं संहृष्येतदद
भ्रदृष्टकलनाद्वेडच्छटाडम्बरैःस्वात्मानंविपद
र्णवावतरणेसज्जीकरोष्यादरात् १८ ॥

हयदस्तीति उर्वीपतइत्यनेनविचाराविचारयोग्यतांसूच
यति यत्तेभाग्यप्राप्तंसारतरमहिंसालब्धंकिंचनराज्यल
क्षणमस्तसौदरमस्ति यच्चभवद्भोग्यमन्यस्यस्वप्नगम
पिनसम्भवेत् स्वप्नगमित्युपलक्षणंमनोरथगस्यापि त
देतदस्वदृष्टकलनैवद्वेडच्छटाविषच्छटास्तासामाडम्ब
रैर्विस्तारैःसंहृष्यभोगायोग्यंविधायकथमादराद्धेम

प॰सं
३२९

यथास्यात्तथास्वात्मानं विपदर्णवावतरणे विपदर्णवेवतर
णार्थं सज्जीकरोषि वडकत्वं करोषीति सर्वथामोहविल
सितमेवेदमित्याशयः ९८ ततश्चैतत्कलनां चिन्तोपास्य
भागधेयोत्सम्हृद्धिसकलयाभूषयेत्याह ईश्वरयेति हृतान
भिमताश्रयाभिमुखागतानर्थिनस्तदर्थितदानैः ईश्वरयेति
तयाऽर्चयापानाशनादिपूजयास्वजनं वान्धवजातिं सर्वथे

ईश्वरयाभिमतपूरणेन हृतानर्थिनः स्वजनमर्चयार्च
या भुङ्क्ष्व मिष्टममलं रसोत्कटं भोगजातममरांश्च
तर्पय ९९ पेयं पिवास्वादय लेह्यमग्र्यं भोज्यं द
शाचूष्यचोष्यजातम् विलासिनीसल्लसितैश्च
सम्यक्तान्तर्पयेहेन्द्रियदैवतानि १० ॥

मानयरसेनास्वादेन रसैः षड्रसैश्च अमरांश्च तर्पयेतिपा
दत्तर्पणहोमादिनेत्यर्थः ९९ पेयमितिपानयोग्यं द्रवद्रव्य
जातं लेह्यमिति रसनेनास्वाद्यं लेह्याद्यादिभोज्यमितिदन्तच्छे
द्यं ईदृशं भक्ष्यस्याप्युपलक्षणं चोष्यजातमित्यादिमाह दश
चूषयेति चूषपानेइति धातः शयेण विलासिनीलसिते
षसर्वेन्द्रियप्रीतिरित्यर्कमिन्द्रियदेवतानीति १० ॥

महत्तां च परप्रीणनेनातीवप्रीतिरिति तथापि समाधत्ते पिवे
ति स्वानात्मीयानापाययभोजयच रमणीयतरेति अत्यन्तपरो
पतर्पणात् आरात्समीपे मुख्यासि इति कार्याकार्यविवेकत्व
त्तयाखिलप्रायोभवसि ११ पीत्वेति अत्र संक्षेपेण सर्ववि
षयोपभोगकथनम् तत्र रसस्य द्रवाद्रवरूपत्वात्पीत्वेति प्र
त्तर्वचनं नकेवलमिदं वानेन तव प्रीतिरपितु परलोकार्थम

पिव पाययभुङ्क्ष्व भोजय स्वान्तरमणीस्तर्पयसहि
लासभोगैः रमणीयतराद्भाग्यमारात्किमहोम
द्यसिकल्पनाभिसाभिः ११ पीत्वाघ्रात्वास्वादयित्वा
यद्दृष्ट्वाश्रुत्वास्पृष्ट्वाभोगजातान्त्रसेन तर्पिनीत्वा
सर्वथामानसेस्वं देवान्पितॄंस्तर्पयानर्घभोगैः १२
सम्यक्तत्र आयप्रगेविधेयं विधाय सत्क्रीलसि
ताशयेभ्यः दत्वान दादीन्सितवस्त्रभोगैः सन्तर्प
यन्नास्वसिद्धोहृथीमन् १३
पृथुकीर्तिर्भवे

त्याह देवानिति १२

संक्षेपेणदिनकर्तव्यमाह सम्यगिति सम्यगिति प्रातःकृ
त्यादि ब्राह्ममुहूर्तकर्तव्यतामाह प्रगेप्रभाते विधेयं सन्ध्या
वन्दनादि विधाय इष्टमन्त्रोपयोगपनस्कारविधिदानमाह स
त्क्रीलेति विशेषणद्वयेनवाह्यान्तरशुद्धिरुक्ता यशःप्रयोज
नं मैत्रिकमविधिपूर्वकं दानमाह नरादीनिति आस्वसिद्धी

ति विश्वस्तमतित्वान्निर्भयो भव धीमन्निति एतदेव धीमत्त्वमितिभावः ॥१३ बुध्यस्वेति प्रबुद्धो भव कर्तव्यापेक्षाः कर्तव्यानुसन्धानं च भ्रमः भ्रममाद् अनयानित्यादि अनेन सम्यग्दूरेण स्वस्यः पर्याप्तबुद्धिः न चेयं कलना कथञ्चनापिश्रुभेत्याद त्वसेति तपयनिश्चेषय ॥१४ त्वस्मायाः पिशाची

बुद्ध्यस्व राजन्भ्रममात्मबुद्धित्वा नर्थान्समारोहसि
किं मृथैव सस्याभवानेन करिष्यते न त्वस्मापि
प्राचीत्तमयात्मबुद्ध्या ॥१४ अन्तेनास्यालभ्य
तेज्ञातधीमन्नन्मकेयं जायते दीर्घदोर्घ्या या
न्तीयान्तीयावत्तां नैव लभ्या यावच्छ्रेपातमेघं
नकुर्यात् ॥१५

त्वंसाधयति अन्तश्रति अन्तेनालंबुद्धिः उन्मत्तारूपदयाउन्मीलिता एनामनुसन्धाय यावतामसोऽपरः परोयान्तीनैवलभ्या अन्तमाद् यावदिति स्वभ्रपाते हि स्वयंप्राणधारणसंभवाशङ्कायामपि विनाशादियमप्यदर्शनं गच्छति पिशाच्याश्रेतात्स्वभावस्वभावः सापिप्राणानुन्मत्तस्य स्वयमदर्शनं यातीति ॥१५

तुल्यं स्वाभिमतं नयवेशाच्छादितं सफलप्रायं मत्वा तेसंचिदिस्पुरित्याद् सर्वथेति विरतिरिति अस्मादनुसन्धित्सितादर्थात् सर्वथेतीहामुत्र स्वस्मिन्परस्मिंश्चानुकूलकारित्वात् तदिति कथितहेतोः न च राज्ञां दण्डयात्राविहितैवेति किं निषिध्यत इत्यत आह दुर्गेति यतोसौ दुर्गतादिविषयात्तोभिन्नविषयत्वान्नात्र विचिकित्सेति भावः पदार्थस्त्वयासौ रणे स्वपरमारणमाशङ्क्य

सर्वथा विरतिरेव शोभना नात्महृष्टमनसां मनीषि
णां दुर्गतानतिरथियां क्रियाहिंसाः दोषकृत्स्वपर
मारणारणे ॥१६ निशम्यासौ मन्त्रिप्रवरगदितं जा
त्वनुगुणं वचो नार्थिं कृत्वा बहिरथ विसृष्टाकृतिर
मून् चपित्वा दीर्णाशो गिरम मलभावो भरसहो
मनोत्सां सा वाध्याम च कयत पीयूषलहरीं ॥१७

तातरथियां अदोषकृत् अन्यकर्तव्यताभावाद्राजानो मीकं यं वर्तन्तामिति स्वपरमारणदोषम नुद्दिश्य दुर्गतानुरणां विधीयत्वेन सोक्तेति सतित्त तदभावे कः पिशाचग्रस्तोनिःशङ्कः स्वपरमारणायां प्रवर्तेतेति ॥१६ अथ सज्ञायकलित्त पराववराज चरित्रमलौकिकमेवेति सूचयितमुपक्रमते निशम्येति जात्वनुगुणमिति मन्त्रिमन्त्रणमीदृशमेवेति स

ततंप्रवृद्धमतिभीराजभिर्भाव्यमितिसूचनार्थं राजगाभीर्यमा
द अन्तर्थिह्नात्वेति वहिरिवहित्यामभिनीयेत्यर्थः तदाह
वहिरिति अर्थायातस्यशब्देनपुनःकथनमन्तराशयत्वाना
मपिमन्त्रिणामेतदाशयाःविदितत्वकथनार्थं अत्यन्तप्रती
तितननार्थमाह अमंत्रस्यपित्वेति सान्त्वयित्वेत्यर्थः चपसा
न्त्वनेइतियातः उदीर्णाशःसर्वोद्धताशयः अमलभावोपर्य
न्तस्मुद्धाम भरसह्यामिति विमर्षाविमर्दैक्रियमाणेसर्वथाभे
ददायिनीविमर्दसह्यामित्यर्थः मनोज्ञांदुष्टाशायानामप्य

गभीरभावाविषणामतावीचाल्याप्रवीणेनयरी
तिरम्या सविस्मयंकस्यमनोनकुर्यात्सर्वाङ्ग·ब
द्धाभरणेवनारी ॥१८

शयावर्जकां सा राज्ञांमहाशक्ति
प्रदांपीयूषलहरीं श्रवणमात्रेणापिपीयूषास्वादद‌ां ॥१७ ता
मेवगिरस्वरूपेणाह गभीरभावेति भोधीयनामन्त्रिणावे
धिषणाईदृशीकस्यमनोविस्मयमग्नंनकुर्यात अपितुसर्व
स्यापीतिभावः अथवा कस्यवाकान्तेर्ब्रह्मणोमनःसविस्मयं
नकुर्यादितिशिरश्चालनेनकाकाव्याख्येयम अत्रविशेष
णाद्वारेणविस्मयकारणतामाह गभीरभावेत्यादि यतइयं
पूर्वापरानुसन्धानेनगभीरभावागूढाभिप्राया अतश्चमते

रभीष्टा यतोनयरीतिरम्यानीतिवन्धरमणीया अतश्चप्रवी
णेरचाल्या प्रवीणाग्रेण्यैनांचालयितुंनशक्नुवन्तीत्यर्थः अत्रो
पादेयत्वउपमासर्वाङ्गेत्यादि अत्रचाचाल्याप्रवीणैरपीतिसनि
यमंवक्तव्येःनियमपरिहृत्नायंदोषइतिनवक्तव्यं वक्रोक्ति
रूपगूढाभिप्रायरूपत्वाद्राजोक्तेदोषस्यापिगुणावहत्वात
यथाःचाल्याप्रवीणैरित्युक्तेःप्रवीणैश्चाल्यैवेतिगूढाशयेप्र
वीणचाल्यतादपरहापिकथैवसिद्धा इत्यंचैकत्रविशेषणे
उष्टमहिकापातन्यायेनसर्वमेवेदंवाक्यडष्टमेवततश्चग
भीरभावेति उन्नानभावा मतेतिचामता नयरीतिरम्यान
यस्तावेणापरमार्थितोऽरम्या अतश्चकस्यहृद्गवक्तमनइयं
सविस्मयंनकुर्यात स्मयस्याभावोविस्मयंसहतेनवर्तते
इतिसविस्मयंनिरहङ्कारंनकुर्यात्कयादेवअनयाभवन्ता
मद्यप्रभृतिनिरहङ्काराभविष्यन्तीति अत्रोपमासर्वाङ्ग·
ति यथानारीसर्वाङ्गबद्धाभरणासर्वाङ्गेषुवाह्यान्तरेषुब
द्धाभःसंवद्धव्याधयोरोणयथासर्वाङ्गलक्ष्यमाणकोलाहले
त्यर्थः तथाचकाव्यालङ्कारे वक्राद्योविन्यवशाद्दोषोपिगु
णइतिदोषस्यगुणत्वमुक्तम ॥१८ अथकोमलांहृन्निमाश्रि
तशाम्यत्कुटिलचेष्टितमितिनयरहस्यवेदीराजासमर्थय
ते सन्तोषेति सन्तोषवृत्तिमिति परमशान्तमुनिवृत्तिरियम

तद्वृत्तियोग्यानामपिभवतांस्वभावादुदिताकस्मान्निर्गतानाव
भवतांदोषइत्यर्थः भवत्सुनचेयमस्माकंपरस्पर्धोभयावहइ
तिप्रामाणिकवचनादुचितेत्याह उदारसत्वैरिति उदारसत्वा
अस्मादृशाराजानः तिष्ठत्ववनेकशरणामुनिचरितमिदत्तभु
वीयमल्पसन्तोषलक्षणावृत्तिः पशूनांस्वभावः एतदेकश
रणैर्मनुष्यैरपिपशुत्वमवाप्यतइतिभावः पशुस्वभावमाह
सन्नाम्यति अमीइतिपशवः माकश्चिद्दल्पागम्यमस्तकंछे

सन्तोषवृत्तिरुदितेयमुदारसत्वैर्नाङ्गीकृताभुविनि
सर्गइयंपशूनाम् सन्नाम्यमस्तकममीक्वचिदन्य
गर्तेजीवन्तिसामिग्रसितेनपुरोगतेन ११९ ॥

त्स्यतीतिमस्तकसन्नमनम् सामिग्रसितेन जठरार्धक्षीण
पुरोगतेनस्वयमुपनतेन अथवासामिग्रसितेनपरोच्छि
ष्टेन नद्विजस्वकायाः स्ववीर्योत्पादितदन्तिमस्तिकनिः
शोषितसारार्धभक्ष्यमांसलखाद्यमात्पदवीवदइतिझाप्र
पिसिंहं तस्मान्निवारयन्तीति तेभ्योपिभवन्तोयमाइति सा
मिग्रसितेनेतिपुरोगतेनेतिचसूचितम् ११९ ॥

अथापिवेति एतान्तरे आद्यशब्देनमूकबधिरान्धकुणिप
ङ्ग्वादिग्रहणम् अयमितिसन्तोषवृत्त्याख्यः अतस्मानार्यवृत्ति
र्नीचवृत्तिः १२० नचवाच्यंभवत एवंसम्पत्कालेसम्पद्भोगेना
तिवाह्यकालान्तरेयत्नतइतिद्वयसिद्धिरितिसर्वथानवद्या
यंप्रकारइत्यत्राह प्रतिगणयतेयति अयंसमयः समृद्धि
लक्षणः अत्रहेतुः नावल्पितिविलशब्दोद्देशो अस्थिरत्व

अथापिवायेमनुजाविहीनावाद्यान्तरैःसत्करणो
जेडायाः अशक्तिसंश्लेषितभूमिपृष्ठास्तेषांनिस
र्गोयमनार्यवृत्तिः १२· प्रतिगणयतयाद्वयेविचि
न्त्यःसमयोयंनखलुस्थिरत्वमस्य दिविभिन्नमि
वाभ्रमेघखण्डंविलयंयास्यतिकिंततोनुतापैः १२१

मेवदृष्टान्तेनविशदयति दिवीति एषइति समृद्धिसमयः
भिन्नमिति वद्धमूलमेघाच्छिन्नमभ्रंअभ्रखण्डइत्यर्थः तत
इतिसमृद्धिसमयेविलेनेनुतापैःपश्चात्तापैः किंनकिञ्चि
त्सार्थेविलसितवापनेनविनेत्यर्थः १२१ ततश्चतत्कार्ये
इति ततस्माद्धेतोरस्मिन्कार्ये उद्यमलक्षणेसाहसवृत्ति
र्हेदालकुलास्यवृत्तिः सिद्ध्यतीदंनवासिद्ध्यतीतिकातरकल्पि

तमयंसंग्रस्यहरतोपास्यशत्रुरयंवलीतिदैवमनुकूलंनवेति
चभयंपृष्ठेकृत्वागणनापदवीमनारोप्ययतेतेत्येषामतिर्नि
श्चयः अयंभावः सिद्धिपरिपन्थिभूतावलभयशङ्कास्वा
त्यापिता तांचोद्योगेनसमुन्मूल्यनिष्परिपन्थिनीसिद्धिःस
मुल्लसतीत्यवधेयमवधानधनैः १२२ अत्यंनिश्चयंद्रढीक
त्यायतोदारालसरूपणयोरेकाध्यवसानायानयोःपरस्प
रव्यतिरेकेणश्लाघ्याऽवाच्यप्रथिकयति सवद्धइतियःस्वो

तत्कार्येस्मिन्साहसव्यग्रस्यासंग्रस्यसिद्धासिद्धिभय
म् शत्रुभयंदैवभयंपृष्ठेकृत्वायतेतमतिरेषा १२२
सपाशवद्धोस्तिनवडकद्येपायःस्वोदराभरणमा
त्रतुष्टः सवडकत्वोस्तिनपाशवद्धोयोशेषसौ
ख्यायगृहीतकृच्छ्रः १२३

दराभरणमात्रतुष्टयेवडकस्योस्तितावन्मात्रार्थमेवकस्टं
वद्धाप्रयततेसनवडकस्योपितपाशवद्धः पाशेनसावनेन
वद्धश्चार्थयश्चदारतोयन्त्रतयोरैक्यम् अमुमेवार्थंवैपरी
त्येनसाधयति सइति योशेषसौख्यायपाशवद्धःस्वीकृत
कृच्छ्रःसवडकत्वः पाशेनाप्यसौवद्धः कदापेवद्धः स्व
परसौख्यायतस्यतथात्वात्इति १२३ ॥ ❀ ॥

ततश्चउदारशीलइति भास्वान्सूर्यः दोषाश्चानर्थानिमालिन्य
हेतवश्च अन्यत्रिगदगतार्थम् १२४ अतिसारमाह सर्वथेति
शास्त्रसर्वस्वशास्त्रार्थसारम् एतद्वक्ष्यमाणार्थरूपंमनीषया
मतंतंबुद्धौनिवेशयम् १२५ अत्रैवान्यकलनोत्थापनायपूर्वा
परसंगतिंपूर्वविशेषयति आभातीति अयंभावः उत्तमाध
मभेदेनद्वैविध्येवयंजगद्रचना तत्रयाविमातृयमात्रयमोता

उदारशीलोसवतितमशास्तिःसदोद्यतोयोस्तिमही
महेन्द्रः सकृच्छ्रमग्नोपिसखीसकीर्तिर्विभाति।
भास्वानिवदोषहारी १२४ सर्वथाशास्त्रसर्वस्वं।
सार्थमेतन्मनीषया आलस्यपश्चतादेतर्थेत्नोदे
वत्वकारणं १२५ आभातिसुखमालस्यंसर्वथाऽऽदुः
खमधमः अथमेवैपरीत्येनद्वयमेतन्महाशये १२६

वष्यापातपर्यवसानभेदेनद्विधा तत्रोद्यमश्चापातप्रतिकूलः
पर्यवसानानुकूलः आलस्यापरपर्यायश्चानुद्यमएतद्विप
रीतः तत्रैताभ्यामुत्तमाधमविभागइतिदर्शयति आभाती
तिआलस्यंसर्वथासुखमाभातिनोचस्यपरंततत्र पर्यवसा
नेदुःखदायित्वात् तथा तस्येवोद्यमःसर्वथादुःखमाभाति

नचतत् पर्यवसाने दुःखदायित्वात् उत्तमस्य पुनरुद्यमः सर्वे
ष्वासुखमाभातीतितत्र आरम्भे दुःखदायित्वात् इत्यंचाभान
स्य शुक्तिरजतादौ व्यभिचारदर्शनात्पर्यवसानभानमेवभान
मित्यालस्यं दुःखमेव उद्यमः सुखमेव इत्युत्तमस्तद्गेवाव्यभि
चारिणी ॥२९ इत्यंविधिसूत्रकल्पश्लोकंमत्वार्थवादरूपेणे
तिहासेनव्याख्यातमारभंते तथाहीति पुरावृत्तमितिहासः

तथापीदंपुरावृत्तंदृष्टान्तविशदीकृतं केनचित्क
लयेपुत्रःशत्रुमुद्दिश्यप्रेषितः ॥२२ सराजानगरा
ण्यंतस्यसेनाङ्गमनुयोज्यच मार्गचर्यापरीक्षायै
स्वचारान्समसूत्रजत् ॥२८ मार्गेमार्गेचावसथे
वसथेदिनरात्रितः अरण्यदुर्गशैलेषुवार्तासंचा
र्यतामिति ॥२५

कलयेइति क लिर्युद्धं अनुगुणमौचि
त्यानुसारेण सेनाङ्गं हस्त्यश्वरथपादातलक्षणमनुयोज्य
सान्नाय्येनपश्चाद्गामिनंकृत्वामार्गचर्यागच्छन्सौकथं
